आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८

प्रश्नोपनिषत् ।

आनन्दगिरिविरचितटीकासंवलितशांकरभाष्यसमेता ।

तथा

शंकरानन्दविरचिता प्रश्नोपनिषद्दीपिका च ।

एतत्पुस्तकद्वयमानन्दाश्रमस्थपण्डितैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिणा

विनायक गणेश आपटे

इत्यनेन

पुण्याख्यपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-

यमहाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

पञ्चमीयमङ्कनाद्वाचिः ।

शालिवाहनशकाब्दाः १८५४

खिस्ताब्दाः १९३२

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यमेको रूपकः ।

आदर्शपुस्तकोल्लेखपत्रिका ।

प्रश्नोपनिषद् आदर्शपुस्तकानि शुद्धीकरणार्थं येषां मिलितानि तेषां नामानि पुस्तकानां संज्ञाश्च प्रदर्श्यन्ते—

(क.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता "बिब्लिओथिकाइण्डिका" इतिग्रन्थावल्यां मुद्रिता, कैलासवासिनां वे० शा० सं० देवोपाह्वबालशास्त्रिणाम् ।

(ख.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, श्रीयुतानां किबे इत्युपाह्वानामिन्दूरपुरनिवासिनां रा० रा० भाऊसाहेब बाळासाहेब इत्येतेषाम् ।

(ग.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, काश्यां शिलामुद्रिता रा० रा० "महादेव चिमणाजी आपटे" इत्येतेषाम् । मुद्रणकालः संवत्—१९४१

(घ.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, वटोदरनिवासिनां श्रीयुतानां पटवर्धनोपाह्वानां रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् ।

(ङ.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, वटोदरनिवासिनां श्रीयुतानां खेडकरोपाह्वानां रा० रा० "आनन्दराव लक्ष्मण" इत्येतेषाम् ।

(च.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, बडलीग्रामनिवासिनां श्रीयुतानां वे० रा० रा० "मार्तण्ड दीक्षित" इत्येतेषाम् । लेखनकालः शके १७६९

(छ.) इति संज्ञिता—केवलप्रश्नोपनिषद्भाष्यं विंचूरग्रामनिवासिनां श्रीमतां रा० रा० "रावसाहेब" इत्येतेषाम् ।

(ज.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, नागपुरनिवासिनां श्रीयुतानां रा० रा० "अप्पासाहेब बुटी" इत्येतेषाम् ।

(झ.) इति संज्ञिता—प्रश्नोपनिषत्सटीकभाष्योपेता, करवीरपुरनिवासिनां श्रीमतां वे० शा० सं० रा० रा० गुरुमहाराजानाम् । लेखनकालः संवत्—१८७८

केवलमूलपुस्तकानि ।

———:०:———

(क.) इति संज्ञिता—प्रश्नोपनिषत्, पुण्यपत्तननिवासिनां श्रीयुतानां रा०रा० "भाऊसाहेब नगरकर" इत्येतेषाम् ।

(ख.) इति संज्ञिता—प्रश्नोपनिषत्, पुण्यपत्तननिवासिनां श्रीयुतानां भाऊसाहेब नगरकर इत्येतेषाम् ।

(ग.) इति संज्ञिता—प्रश्नोपनिषत्, वटोदरनिवासिनां श्रीयुतानां रा० रा० दादासाहेब फडणवीस इत्येतेषाम् ।

दीपिकायाः पुस्तकानि ।

(क.) इति संज्ञिता—प्रश्नोपनिषद्दीपिका, वटोदरनिवासिनां पटवर्धनोपाह्वानां श्रीयुतानां रा० रा० "कृष्णराव भीमाशंकर" इत्येतेषाम् ।

(ख.) इति संज्ञिता—प्रश्नोपनिषद्दीपिका समूला, मुम्बापुरनिवासिनां वे० शा० सं० रा० रा० जयकृष्णमहाराजानाम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

अथास्याः प्रश्नोपनिषदो मन्त्रप्रतीकानां वर्णानुक्रमणी ।

मन्त्रप्रतीकानि	म०	प्रश्नः	पृ०
अ.			
अत्रैष देवः स्वप्ने	९	४	३६
अथ कबन्धी कात्यायनः	३	१	३
अथ यदि द्विमात्रेण	४	५	४९
अथ हैनं कौसल्यः ...	१	२	२१
अथ हैनं भार्गवः ...	१	२	१४
अथ हैनं सुकेशाः ...	१	६	९४
अथ हैनं सौर्यायणी	१	४	२९
अथाऽऽदित्य उदयन् ...	६	१	९
अथैकयोर्ध्व उदानः ...	७	३	२९
अथोत्तरेण तपसा ...	१०	१	८
अन्नं वै प्रजापतिः	१४	१	१२
अरा इव रथनाभौ ...	६	२	१७
,, ,, ,,.... ...	६	६	७४
अहोरात्रो वै प्रजा—	१३	१	११
आ.			
आत्मन एष प्राणः	३	३	२२
आदित्यो ह वै प्राणः....	९	१	९
आदित्यो ह वै बाह्यः....	८	३	२९
इ.			
इन्द्रस्त्वं प्राण तेजसा	९	२	१९
उ.			
उत्पत्तिमायतिम् ...	१२	३	२९
ऋ.			
ऋग्भिरेतं यजुर्भिः	७	९	९३
ए.			
एतद्वै सत्यकाम	२	६	४७
एष हि द्रष्टा स्प्रष्टा ...	९	४	४४
एषोऽग्निस्तपति	९	२	१७
त.			
तद्ये ह वै तत् ...	१९	१	१३
तस्मै स होवाच ...	४	१	४
,, ,, ,, ...	२	२	१९
,, ,, ,, ...	२	३	२१
,, ,, ,, ...	२	४	३२
,, ,, ,, ...	२	६	९६
तान्वरिष्ठः प्राणः	३	२	१६
तान्ह स ऋषिः	२	१	३
तान्होवाचैतावत् ...	७	६	७४
तिस्रो मात्रा मृत्युमत्यः	६	५	९२
तेजो ह वा उदानः	९	३	२७
ते तमर्चयन्तः...	८	६	७९
तेषामसौ विरजः	१६	१	१३
द.			
देवानामसि वह्नितमः	८	२	१८
प.			
पञ्चपादं पितरम्	११	१	१०
परमेवाक्षरम्	१०	४	४४
पृथिवी च पृथिवी-	८	४	४२
पायूपस्थेऽपानम्	९	३	२३
प्रजापतिश्चरसि	७	२	१७
प्राणस्येदं वशे ...	१३	२	२०
प्राणाग्नय एवैतस्मिन्	३	४	३३

मन्त्रप्रतीकानि	म०	प्रश्नः	पृ०
भ.			
भगवन्नेतस्मिन्पुरुषे	१	४	३०
भगवन्हिरण्यनामः	१	६	५४
भद्रं कर्णेभिः	१	१	१
म.			
मासो वै प्रजापतिः	१२	१	११
य.			
य एवं विद्वान्प्राणम्	११	३	२८
यच्चित्तस्तेनैष प्राणम्	१०	३	२७
यथा सम्राडेव	४	३	२२
यदा त्वमभिवर्षसि	१०	२	१९
तदुच्छ्वासनिश्वासौ ...	४	४	३४
यः पुनरेतं त्रिमात्रेण	५	५	५०
या ते तनूर्वाचि	१२	२	२०
व.			
विज्ञानात्मा सह	११	४	४५

मन्त्रप्रतीकानि	म०	प्रश्नः	पृ०
विश्वरूपं हरिणम् ...	८	१	६
व्रात्यस्त्वं प्राणैक- ...	११	२	१९
स.			
स ईक्षांचक्रे	३	६	६३
स एष वैश्वानरः	७	१	६
स प्राणमसृजत ...	४	६	७१
स यथेमा नद्यः	५	६	७२
स यदा तेजसा	६	४	४१
स यदा सोम्य ...	७	४	४२
स यद्येकमात्रम्	३	५	४८
स यो ह वै तत्	१	६	४६
संवत्सरो वै प्रजापतिः	९	१	७
सुकेशा च भारद्वाजः ...	१	१	१
सोऽभिमानादूर्ध्वम्	४	२	१६
ह.			
हृदि ह्येष आत्मा	६	३	२४

इतीयं मन्त्रवर्णानुक्रमणी ।

ॐ तत्सद्ब्रह्मणे नमः ।

प्रश्नोपनिषत् ।

—०—:⊙:—०—

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता ।

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सुकेशा च भारद्वाजः, शैब्यश्च सत्यकामः, सौर्यायणी च गार्ग्यः, कौसल्यश्चाऽऽश्वलायनो, भार्गवो वैदर्भिः, कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ १ ॥

मन्त्रोक्तस्यार्थस्य विस्तारानुवादीदं ब्राह्मणमारभ्यते। ऋषिप्रभृतिवचनाख्यायिका तु विद्यास्तुतये। एवं संवत्सरब्रह्मचर्यसंवासादिर्युक्तैस्तपोयुक्तिर्ग्राह्या पिप्पलादादिवत्सर्वज्ञकल्पैराचार्यैर्वक्तव्या च । न सा येन केनचिदिति विद्यां स्तौति । ब्रह्मचर्यादिसाधनसूचनाच्च तत्कर्तव्यता स्यात् । सुकेशा च नामतः । भरद्वाजस्यापत्यं भारद्वाजः । शैब्यश्च शिबेरपत्यं शैब्यः । सत्यकामो नामतः । सौर्यायणी सूर्यस्यापत्यं सौर्यस्तस्यापत्यं सौर्यायणिश्छान्दसः सौर्यायणीति । गार्ग्यो गर्गगोत्रोत्पन्नः । कौसल्यश्च नामतोऽश्वलस्यापत्यमाश्वलायनः । भार्गवो भृगोर्गोत्रापत्यं भार्गवः । वैदर्भिर्विदर्भे भवः । कबन्धी नामतः । क(का)त्यस्यापत्यं

---

१ क. च. कौशल्य° । २ ख. ङ. °युक्ततपो° । ३ क. च. कौशल्य° । ४ ख. घ. ङ. °मत आश्व° । ५ क. °दर्भेः प्रभ° । ६ ग. घ. ङ. °र्भेर्भवः । च. °र्भे प्रभ° ।

कात्यायनः । विद्यमानः प्रपितामहो यस्य सः + युवमत्ययः[1] ते हैते ब्रह्मपरा अपरं ब्रह्म परत्वेन गतास्तदनुष्ठाननिष्ठाश्च ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः, किं तत् । यन्नित्यं विज्ञेयमिति । तत्प्राप्त्यर्थं यथा-
१ कामं यतिष्यामहइत्येवं तदन्वेषणं कुर्वन्तस्तदधिगमायैष ह वै तत्सर्वं वक्ष्यतीत्याचार्यमुपजग्मुः । कथम् । ते ह समित्पाणयः समिद्भारगृहीत-हस्ताः सन्तो भगवन्तं पूजावन्तं पिप्पलादमाचार्यमुपसन्ना उपजग्मुः॥१॥

आथर्वणे[2] ब्रह्मा देवानामित्यादिमन्त्रैरेवाऽऽत्मतत्त्वस्य निर्णीतत्वात्तत्रैव ब्राह्मणेन तदभिधानं पुनरुक्तमित्याशङ्क्य तस्यैवेह विस्तरेण प्राणोपासनादिसाधनसहित्येनाभि-धानान्न पौनरुक्त्यमिति वदन्ब्राह्मणमवतारयति—मन्त्रेति । विस्तरेति । मन्त्रे हि द्वे विद्ये वेदितव्ये परा चैवापरा चेत्युक्त्वा तत्रापरर्ग्वेदाद्यभिधेयेत्युक्तम् । सा च विद्या कर्मरूपोपासनारूपा च । तत्र द्वितीया द्वितीयतृतीयप्रश्नाभ्यां विब्रियते । आद्या कर्मकाण्डे ब्रिवृतेति नेह विब्रियते । उभयोः फलं तु ततो वैराग्यार्थं प्रथमप्रश्ने स्पष्टी क्रियते । परविद्या चाथ परा यया तदक्षरमधिगम्यत इत्युपक्रम्य कृत्स्नेन मुण्डकेन प्रतिपादिता । तत्रापि यथा सुदीप्तादित्यादिमन्त्रद्वयोक्तार्थस्य विस्तरार्थं चतुर्थः प्रश्नः । प्रणवो धनुरित्यत्रोक्तप्रणवोपासनविवरणार्थं पञ्चमः प्रश्नः । एतस्माज्जायते प्राण इत्यादिना शेषेण मुण्डकेनोक्तस्यार्थस्य स्पष्टीकरणार्थः षष्ठः प्रश्न इतीदं ब्राह्मणं तद्विस्तरानुवा-दीत्यर्थः । अत एव विषयप्रयोजनादिकं तत्रैवोक्तमिति नेह पुनरुच्यत इति बोध्यम् । आख्यायिकाया ब्रह्मचर्यतपआदिसाधनविधानं पुराकल्पस्वरूपेण प्रयोजनान्तरं चास्ती-त्याह—ब्रह्मचर्यादिसाधनेति । सौर्यायणीति । सौर्यायणिरिति वक्तव्ये दैर्घ्यं छान्दसमित्यर्थः । युवमत्यय इति । क(का)त्यस्य युवापत्ये विवक्षिते फक्[3]त्यये तस्याऽऽयनादेशे च कात्यायन इति सिध्यतीत्यर्थः । ब्रह्मपराणां पुनर्ब्रह्मान्वेषणमयु-क्तमित्यत आह—अपरं ब्रह्मेति । नन्वपरब्रह्मान्वेषणेनैव पुरुषार्थसिद्धेः किं पर-ब्रह्मान्वेषणेनेत्याशङ्क्ते—किं तदिति । तस्य कोऽतिशय इत्यर्थः । तस्यानित्यत्वेन तत्प्राप्तेरप्यनित्यहेतुत्वेनापुरुषार्थत्वात्परस्यैव नित्यत्वात्तत्प्राप्तेस्तज्ज्ञानमात्रसाध्यत्वे-नापि नित्यत्वाच्च तस्यैवान्वेषणीयत्वमिति परस्वरूपकथनेनाऽऽह—यदिति । पर-ब्रह्मान्वेषमाणानां कोऽतिशय इत्यत आह—तत्प्राप्त्यर्थमिति । तत्प्राप्त्यर्थं तद-धिगमाय तदन्वेषणं कुर्वन्तो यथाकामं यतिष्यामह इत्येवमभिप्रायेणेत्यन्वयः । समिदिति । समिदुग्रहणं यथायोग्यं(ग्य?)दन्तकाष्ठाद्युपहारोपलक्षणार्थम् ॥ १ ॥

---

१ क. ख. ग. घ. ङ. युवार्थप्र° । २ क. घ. अथर्वणे । ३ क. घं. ङ. च. °त्युक्ता त° । ४ क. °धनायाऽऽह ।

तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ॥ २ ॥

तानेवमुपगतान्ह स किल ऋषिरुवाच भूयः=पुनरेव, यद्यपि यूयं पूर्वं तपस्विन एव, तपसेन्द्रियसंयमेन, तथाऽपीह विशेषतो ब्रह्मचर्येण श्रद्धया चाऽऽस्तिक्यबुद्ध्याऽऽदरवन्तः संवत्सरं कालं संवत्स्यथ सम्यग्गुरुशुश्रूषापराः सन्तो वत्स्यथ । ततो यथाकामं यो यस्य कामस्तमनतिक्रम्य यथाकामं यद्विषये यस्य जिज्ञासा तद्विषयान्प्रश्नान्पृच्छत । यदि तद्युष्मत्पृष्टं विज्ञास्यामः । अनुद्धतत्वप्रदर्शनार्थो यदिशब्दो नाज्ञानसंशयार्थः, प्रश्ननिर्णयादवसीयते । सर्वं ह वो वः पृष्टं वक्ष्याम इति ॥२॥

तथाऽपीत्यस्य तपसेत्यतः पूर्वमन्वयः । विशेषत इत्यस्य पूर्वत्राप्यन्वयः । निष्कृष्टमर्थमाह—यद्विषय इति । अज्ञानाद्यर्थत्वाभावे हेतुमाह—प्रश्नेति । अत्रेतिशब्दोऽध्याहार्यः । सर्वप्रश्नानां निर्णयादज्ञानाद्यसंभवादित्यर्थः ॥ २ ॥

अथ कबन्धी कात्यायन उपेत्य पप्रच्छ । भगवन्कुतो ह वा इमाः प्रजाः प्रजायन्त इति ॥३॥

अथ संवत्सरादूर्ध्वं कबन्धी कात्यायन उपेत्योपगम्य पप्रच्छ पृष्टवान् । हे भगवन्कुतः कस्माद्ध वा इमा ब्राह्मणाद्याः प्रजाः प्रजायन्त उत्पद्यन्ते । अपरविद्याकर्मणोः समुच्चितयोर्यत्कार्यं या गतिस्तद्वक्तव्यमिति तदर्थोऽयं प्रश्नः ॥ ३ ॥

परं ब्रह्मान्वेषमाणा इत्युपक्रान्तेऽस्मिन्ब्रह्मप्रकरणे प्रजापतिकर्तृकप्रजासृष्टिविषयप्रश्नप्रत्युक्त्योरसंगतिमाशङ्क्य प्रश्नप्रत्युक्तिरूपायाः श्रुतेस्तात्पर्यमाह—अपरविद्येति । तेषामसौ विरजो ब्रह्मलोक इति समुच्चितकार्यस्य ब्रह्मलोकस्याथोत्तरेणेति तद्गतेर्देवयानमार्गस्य चेह वक्ष्यमाणत्वादित्यर्थः । इदमुपलक्षणं केवलकर्मणां चेत्यपि द्रष्टव्यम् । केवलकर्मकार्यस्यापि चन्द्रलोकस्य तद्गतेः पितृयाणस्य च ' तेषामेवैष ब्रह्मलोकः ' ' प्रजाकामा दक्षिणं प्रतिपद्यन्ते ' इति वक्ष्यमाणत्वादिति । यद्यपीदमपि परब्रह्मजिज्ञासावसरेऽसंगतमेव तथाऽपि केवलकर्मकार्यात्समुच्चितकर्मकार्याच्च विरक्तस्यैव तत्राधिकार इति ततो वैराग्यार्थमिदमुच्यते । यद्यपि मुखतः सृष्टिः प्रतीयते

---

१ क. °पेत्याऽऽपत्य प° । २ क. च. °मुचितासमुच्चि° । ३ क. च. °त्युक्तेर° । ४ क. °यानस्य ।

तथाऽपि तदुक्तौ प्रयोजनाभावात्सृष्ट्युक्तिव्याजेन परविद्याफलमेवात्रोच्यत इति भावः । प्रश्न इति प्रतिवचनं चेत्यपि द्रष्टव्यं ताभ्यामेव तदुक्तेरिति ॥ ३ ॥

तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत *स तपस्तप्त्वा स मिथुनमुत्पादयते । रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति ॥ ४ ॥

तस्मा एवं पृष्टवते स होवाच । तदपाकरणायाऽऽह । प्रजाकामः प्रजा आत्मनः सिसृक्षुर्वै प्रजापतिः सर्वात्मा सञ्जगत्सृक्ष्यामीत्येवं विज्ञानवान्यथोक्तकारी तद्भावभावितः कल्पादौ निर्वृत्तो हिरण्यगर्भः सृज्यमानानां प्रजानां स्थावरजङ्गमानां पतिः सञ्जन्मान्तरभावितं ज्ञानं श्रुतिप्रकाशितार्थविषयं तपोऽन्वालोचयदतप्यत । अथ तु स एवं तपस्तप्त्वा श्रौतं ज्ञानमन्वालोच्य सृष्टिसाधनभूतं मिथुनमुत्पादयते मिथुनं द्वंद्वमुत्पादितवान् । रयिं च सोममन्नं प्राणं चाग्निमत्तारमेतावग्नीषोमावन्नभूतौ मे मम बहुधाऽनेकधा प्रजाः करिष्यत इत्येवं संचिन्त्याण्डोत्पत्तिक्रमेण सूर्याचन्द्रमसावकल्पयत् ॥ ४ ॥

तस्मै स होवाचेति प्रतिज्ञातं विशेषतो दर्शयति—तदपाकरणायेति । आद्यस्य सन्नित्यस्य प्रजाकामः सन्नित्यन्वयः । यथोक्तकारीति । ज्ञानकर्मसमुच्चयकारीत्यर्थः । तद्भावभावित इति । प्रजापतिरहं सर्वात्मेत्युपासनकालीनप्रजापतिभावनायुक्त इत्यर्थः । पूर्वकल्पीयतद्भावभावित एतत्कल्पादौ हिरण्यगर्भात्मना निर्वृत्तः प्रजापतिः सन्पश्चात्प्रजाकामः संस्तपो जन्मान्तरभावितं ज्ञानं श्रुतिप्रकाशितार्थविषयमतप्यतान्वालोचयच्चिन्तादिना[1] तत्संस्कारमुद्बोध्य ज्ञानमुत्पादितवानित्यन्वयः । तत्र प्रथममादित्यचन्द्रोत्पादनेन तद्भावमापद्य पश्चाच्चन्द्रादित्यसाध्यसंवत्सरभावमापद्यैवमेव तदवयवायनद्वयमासपक्षाहोरात्रभावमापद्य ततस्तत्साध्यत्रीह्याद्यन्नभावं रेतोभावं चाऽऽपद्य तेन रेतसा प्रजाः सृजेयमित्येवं निश्चित्य प्रथमं रयिप्राणशब्दितैश्चन्द्रसूर्यद्वंद्वमुत्पादितवानित्याह—स एवमिति । रयिशब्देन धनवाचिना भोज्यजातं लक्षयित्वा भोज्यस्य सोमकिरणामृतयुक्तत्वात्तद्द्वारा सोमो लक्ष्यत इत्याह—रयिं चेति । एवं प्राणशब्देनापि ।

---

* अत्र भाष्यानुसारेण शांकरानन्दकृतदीपिकानुसारेण च " स तपस्तप्त्वा " इति पदत्रयमधिकं भाति ।

---

१ क. °चितादि° । २ क. च. °तसूर्यचन्द्र° ।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

इति स्मृतेरग्नेः प्राणसंबन्धादग्निर्भोक्ता लक्ष्यत इत्याह-प्राणं चेति । अग्नीषोमयोरण्डान्तर्गतत्वेनाण्डोत्पत्त्यनन्तरमुत्पत्तिरित्याशयेनाऽऽह--अण्डोत्पत्तीति । उद्यन्तं वावाऽऽदित्यमग्निरनुसमारोहतीति श्रुतेः सूर्याग्न्योरेकत्वमभिप्रेत्याग्निं सूर्यपदेनाऽऽह--सूर्याचन्द्रमसाविति ॥ ४ ॥

आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिः ॥५॥

तत्राऽऽदित्यो ह वै प्राणोऽत्ताऽग्निः । रयिरेव चन्द्रमाः । रयिरेवान्नं सोम एव । तदेतदेकमत्ता चान्नं च प्रजापतिरेकं तु मिथुनम् । गुणप्रधानकृतो भेदः । कथम् । रयिर्वा अन्नं वा एतत्सर्वं किं तद्यन्मूर्तं च स्थूलं चामूर्तं च सूक्ष्मं च मूर्तामूर्तं अन्नरूपे रयिरेव । तस्मात्प्रविभक्तादमूर्ताद्यदन्यन्मूर्तरूपं मूर्तिः सैव रयिरमूर्तेनाद्यमानत्वात् ॥ ५ ॥

रयिप्राणौ श्रुतिः स्वयमेव व्याचष्ट इत्याह-तत्राऽऽदित्य इति । प्रजापतेरेव संवत्सरादिप्रजापर्यन्तस्रष्टृत्वं वक्तुं रयिप्राणयोः संवत्सरस्रष्ट्रोः प्रजापत्युपादानत्वात्प्रजापत्यात्मत्वमाह-तदेतदेकमिति । कथमेकस्यात्ताऽन्नं चेति भेद इत्याशङ्क्य तस्यैव गुणभावविवक्षयाऽन्नत्वं प्राधान्यविवक्षया चात्तृत्वमिति भेद इत्याह-गुणेति । रयिप्राणयोः कथं प्रजापत्यात्मत्वमिति शङ्कते-कथमिति । तत्र रयेः सर्वात्मकत्वात्प्रजापतित्वमित्याह-रयिरिति । अमूर्तस्यापि वाय्वादेः केनचिद्द्यमानत्वाद्रयित्वमित्यर्थः । ननु मूर्तामूर्तयोरन्नयोरुभयोरपि रयित्वेऽन्नमेव रयिरिति कथमुक्तमित्याशङ्क्य मूर्तामूर्तत्वविभागमकृत्वा सर्वस्य गुणभावमात्रविवक्षया सर्वं रयिरित्युच्यते । यदोभे विभज्य गुणप्रधानभावेन विवक्ष्येते तदाऽमूर्तेन प्राणेन मूर्तस्याद्यमानत्वान्मूर्तस्यैव रयित्वमित्याह—तस्मादिति ॥ ५ ॥

तथाऽमूर्तोऽपि प्राणोऽत्ता सर्वमेव यच्चाऽऽद्यम् । कथम्—

अथाऽऽदित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणान्रश्मिषु संनिधत्ते । यद्दक्षिणां यत्प्र-

---

१ ख. मूर्तैरेवान्नमम्° । घ. ङ. मूर्तिरेवान्नं सै° । २ क. मूर्ते वि° ।

तीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु संनिधत्ते ॥६॥

अथाऽऽदित्य उदयन्नुद्गच्छंन्प्राणिनां चक्षुर्गोचरमागच्छन्यत्प्राचीं दिशं स्वप्रकाशेन प्रविशति व्याप्नोति । तेन स्वात्मव्याप्त्या सर्वांस्तस्थान्प्राणान्प्राच्यानन्तर्भूतान्रश्मिषु स्वात्मावभासरूपेषु व्याप्तिमत्सु व्याप्तत्वात्प्राणिनः संनिधत्ते संनिवेशयति, आत्मभूतान्करोतीत्यर्थः । तथैव यत्प्रविशति दक्षिणां यत्प्रतीचीं यदुदीचीमध ऊर्ध्वं यत्प्रविशति यच्चान्तरा दिशः कोणदिशोऽवान्तरदिशो यच्चान्यत्सर्वं प्रकाशयति तेनं स्वप्रकाशव्याप्त्या सर्वान्सर्वदिक्स्थान्प्राणान्रश्मिषु संनिधत्ते ॥ ६ ॥

रयिशब्दितस्यान्नस्य प्रजापतित्वार्थं सर्वात्मत्वमुक्त्वा प्राणस्यापि तदर्थमेव सर्वात्मत्वमुच्यतेऽथाऽऽदित्य इति वाक्येनेत्याह—तथेत्यादिना । यच्चाऽऽद्यं तदपि प्राणोऽत्तोऽत्ता प्राणोऽपि सर्वमेवेति सर्वात्मक इत्यर्थः । स्वप्रकाशेनेति । स्वकीयप्रकाशेन स्वप्रमयेत्यर्थः । अन्तर्भूतानिति । यद्यपि प्राणस्यात्तृत्वमुक्तं तथाऽपि रयिर्वा एतत्सर्वमित्यत्रामूर्तस्य प्राणस्यापि गुणभावविवक्षयाऽन्नत्वमुक्तमिति तथोक्तम् । स्वात्मावभासरूपेष्विति । स्वात्मप्रभारूपेषु रश्मिष्वित्यर्थः । व्याप्तत्वादिति । संबद्धत्वादित्यर्थः ॥ ६ ॥

स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते । तदेतदृचाऽभ्युक्तम् ॥ ७ ॥

स एषोऽत्ता प्राणो वैश्वानरः सर्वात्मा विश्वरूपो विश्वात्मत्वाच्च प्राणोऽग्निश्च स एवात्तोदयत उद्गच्छति प्रत्यहं सर्वा दिश आत्मसात्कुर्वन् । तदेतदुक्तं वस्तु ऋचा मन्त्रेणाप्यभ्युक्तम् ॥ ७ ॥

तस्य प्रत्यक्षत्वमाह—स एष इति । वैश्वानर इति । नरा जीवा विश्वे च ते नराश्च विश्वानराः । स एव वैश्वानरः । सर्वजीवात्मक इत्यर्थः । विश्वरूपः सर्वप्रपञ्चात्मक इति भेदः । उक्तं वस्त्विति । आदित्यस्योक्तं माहात्म्यमित्यर्थः ॥ ७ ॥

विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् । सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८ ॥

---

१ क. °च्छन्यत्प्राचीं दिशं प्रविशति तेन तत्प्राचीं दिशं स्व° । २ ख. ग. सर्वान्तस्थान्प्रा° । ३ क. ज. °णोऽत्ता ।

विश्वरूपं सर्वरूपं हरिणं रश्मिवन्तं जातवेदसं जातप्रज्ञानं परायणं सर्वप्राणाश्रयं ज्योतिरेकं सर्वप्राणिनां चक्षुर्भूतमद्वितीयं तपन्तं तापक्रियां कुर्वाणं स्वात्मानं सूर्यं सूरयो विज्ञानवन्तो ब्रह्मविदः । कोऽसौ यं विज्ञातवन्तः । सहस्ररश्मिरनेकरश्मिः शतधाऽनेकधा प्राणिभेदेन वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८ ॥

विश्वरूपमित्यादिद्वितीयान्तानां सहस्ररश्मिरित्यादिप्रथमान्तानां सामानाधिकरण्येनान्वयायोगादध्याहारं कृत्वा वाक्यभेदेन व्याचष्टे—स्वात्मानमित्यादिना ॥ ८ ॥

यश्चासौ चन्द्रमा मूर्तिरन्नममूर्तिश्च प्राणोऽत्ताऽऽदित्यस्तदेकमेतन्मिथुनं सर्वं कथं प्रजाः करिष्यत इति, उच्यते—

संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च । तद्ये ह वै तदिष्टापूर्ते कृतमित्युपासते । ते चान्द्रमसमेव लोकमभिजयन्ते । त एव पुनरावर्तन्ते तस्मादेत ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते । एष ह वै रयिर्यः पितृयाणः ॥ ९ ॥

तदेव कालः संवत्सरो वै प्रजापतिस्तन्निर्वर्त्यत्वात्संवत्सरस्य । चन्द्रादित्यनिर्वर्त्यतिथ्यहोरात्रसमुदायो हि संवत्सरस्तदनन्यत्वाद्रयिप्राणौमिथुनात्मक एवेत्युच्यते, तत्कथम् । तस्य संवत्सरस्य प्रजापतेरयने मार्गौ द्वौ दक्षिणं चोत्तरं च । द्वे प्रसिद्धे ह्ययने षण्मासलक्षणे याभ्यां दक्षिणेनोत्तरेण च याति सविता केवलकर्मिणां ज्ञानसंयुक्तकर्मवतां च लोकान्विदधत् । कथं तत् । तत्र च ब्राह्मणादिषु ये ह वै तदुपासत इति क्रियाविशेषणो द्वितीयस्तच्छब्दः । इष्टं च पूर्तं चेष्टापूर्ते इत्यादि कृतमेवोपासते नाकृतं नित्यं ते चान्द्रमसं चन्द्रमसि भवं प्रजापतेर्मिथुनात्मकस्यांशं रयिमन्नभूतं लोकमभिजयन्ते कृतरूपत्वाच्चान्द्रमसस्य ते तत्रैव च कृतक्षयात्पुनरावर्तन्त इमं लोकं हीनतरं वा विशन्तीति ह्युक्तम् । यस्मादेवं प्रजापतिमन्नात्मकं फलत्वेनाभिनिर्वर्तयन्ति चन्द्रमिष्टापूर्तकर्मणैत ऋषयः स्वर्गद्रष्टारः प्रजाकामाः प्रजार्थिनो गृहस्थास्तस्मात्स्वकृतमेव दक्षिणं दक्षिणायनोपलक्षितं चन्द्रं प्रतिपद्यन्ते । एष ह वै रयिरन्नं यः पितृयाणः पितृयाणोपलक्षितश्चन्द्रः ॥ ९ ॥

---

१ क ग. °णस्तन्मिथु° ।

स मिथुनमुत्पादयत इत्युपक्रान्तं मिथुनमुपसंहरति—यश्चासाविति । यश्चासौ चन्द्रमा यश्चामूर्तः(र्तिः) प्राणस्तदेकं मिथुनं सर्वं सर्वात्मकमित्यन्वयः । एतौ मे बहुधा प्रजाः करिष्यत इत्युक्तं तत्केन प्रकारेणेति पृच्छति—कथमिति । रयिप्राणयोः संवत्सरादिद्वारा प्रजास्रष्टृत्वमित्याह—उच्यत इति । तदेव मिथुनमेव संवत्सरः कालः स च प्रजापतिः प्रजापत्यात्मकमिथुननिर्वर्त्यत्वादित्याह—तन्निर्वर्त्यत्वादिति । तदुपपादयति—चन्द्रेति । चन्द्रनिर्वर्त्यास्तिथय आदित्यनिर्वर्त्यान्यहोरात्राणीति विभागः । तन्निर्वर्त्यत्वेऽपि कालस्य कथं तदात्मकतेत्याशङ्क्य कार्यकारणयोरभेदादित्याह—तदनन्यत्वादिति । न केवलं तिथ्यादिद्वारा चन्द्रादिनिर्वर्त्यत्वं संवत्सरस्य किंत्वयनद्वयद्वाराऽपीति वक्तुं तस्यायने इत्यादिवाक्यं तत्प्रश्नपूर्वकं व्याचष्टे—तत्कथमिति । चन्द्रादित्यनिर्वर्त्यत्वं कुतो हेत्वन्तरादित्यर्थः । केवलकर्मिणां लोकान्विदधद्दक्षिणेन याति । ज्ञानयुक्तकर्मवतां लोकान्विदधदुत्तरेण यातीत्यन्वयः । सवितेत्युपलक्षणं चन्द्रस्यापि । ज्येष्ठादिर्दक्षिणायनं मार्गशीर्षादिरुत्तरायणमिति श्रुतिषु प्रसिद्धेः । ततश्च कर्मिणां लोकान्विधातुं तयोर्दक्षिणोत्तराभ्यां मार्गाभ्यां गमनात्तन्निमित्तत्वाच्चायनद्वयप्रसिद्धेस्तन्निर्वर्त्यत्वं तयोरनयोरिति तद्द्वारा संवत्सरस्यापि तन्निर्वर्त्यत्वमित्यर्थः । चन्द्रादित्ययोः कथं लोकविधायकत्वमिति पृच्छति—कथमिति । चन्द्रादित्यनिर्वर्त्यदक्षिणोत्तरायणद्वारा लोकप्राप्तेः । प्राप्यस्य लोकस्यापि चन्द्रादित्यात्मकत्वाच्च तयोस्तद्विधायकत्वमिति तद्ये ह वा इत्यादिवाक्येन परिहरति—तत्तत्रेति । इष्टं चेति ।

अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ।
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥
वापीकूपतडागादि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥

इति तयोर्भेदः । कृतमित्युपासत इति कृतशब्दोपरितनामितिशब्दमिष्टापूर्ते इति पूर्तशब्दोपर्याकूत्याऽऽदिशब्दपर्यायतया व्याचष्टे—इत्यादीति । दत्तमादिशब्दार्थः । कृतमेवोपासते कार्यमेवानुतिष्ठन्तीत्यर्थः । इदं च विशेषणं पुनरावृत्तौ हेतुतयोक्तम् । कृतरूपेष्ट्यादिजन्यत्वाच्चन्द्रस्यापि कृतत्वेनानित्यत्वात्पुनरावृत्तिरित्याह—कृतरूपत्वादिति । पुनरावृत्तौ मन्त्रवाक्यं प्रमाणयति—इमं लोकमिति ॥ ९ ॥

अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्याऽऽदित्यमभिजयन्ते एतद्वै

---

१ च. °दित्यानि° । २ क. ज. °दिदक्षि° । ३ क. च. °र्षाद्युत्त° । ४ क, घ. °भ्यां य,म्योत्तरलोकाभ्यां ग° । ५ क. °दानामुपलम्भनम् । ६ ख, ग, घ. °तटाकादि । ७ क. इत्युभयो° ।

प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोधस्तदेष श्लोकः ॥ १० ॥

अथोत्तरेणायनेनं प्रजापतेरंशं प्राणमत्तारमादित्यमभिजयन्ते । केन । तपसेन्द्रियजयेन विशेषतो ब्रह्मचर्येण श्रद्धया विद्यया च प्रजापत्यात्मविषययाऽऽत्मानं प्राणं सूर्यं जगतस्तस्थुषश्चान्विष्याहमस्मीति विदित्वाऽऽदित्यमभिजयन्तेऽभिप्राप्नुवन्ति । एतद्वा आयतनं सर्वप्राणानां सामान्यमायतनमाश्रयमे(ए) तदमृतमविनाशि, अभयमत एव भयवर्जितं न चन्द्रवत्क्षयवृद्धिभयवदेतत्परायणं परा गतिर्विद्यावतां कर्मिणां च ज्ञानवतामेतस्मान्न पुनरावर्तन्ते यथेतरे केवलकर्मिण इति यस्मादेषोऽविदुषां निरोध आदित्याद्धि निरुद्धा अविद्वांसो नैते संवत्सरमादित्यमात्मानं प्राणमभिप्राप्नुवन्ति । स हि संवत्सरः कालात्माऽविदुषां निरोधः । तत्तत्रास्मिन्नर्थ एष श्लोको मन्त्रः ॥ १० ॥

अथेति । मार्गान्तरारम्भार्थोऽथशब्दः । प्रजापत्यात्मविषययेति । तत्तादात्म्यविषययेत्यर्थः । आदित्यमभिजयन्त इति पूर्वमन्वयार्थमुक्तमिदानीं व्याख्यानार्थमिति द्रष्टव्यम् । सामान्यमिति । समष्टिरूपमित्यर्थः । विद्यावतामिति । कर्मानधिकारिणामत एव केवलोपासनवतामित्यर्थः । कर्मिणां च ज्ञानवतामिति । समुच्चयवतामित्यर्थः । ननु केवलकर्मिणामप्यादित्यप्राप्तावपुनरावृत्तिर्भविष्यतीत्याशङ्क्य तेषामादित्यप्राप्तिरेव नास्तीति वक्तुमित्येष इति वाक्यं व्याचष्टे—इति यस्मादिति । तस्मात्तेषामादित्यप्राप्तिरनाशङ्कचेति शेषः (१०) । यद्वा—तस्यायन इत्यारभ्येत्येष निरोध इत्यन्तं श्रुतिवाक्यमयनयो रयिप्राणरूपत्वप्रतिपादनपरतया व्याख्येयम् । तथा हि—संवत्सरस्य रयिप्राणमिथुननिर्वर्त्यत्वे रयिप्राणरूपत्वं च वक्तव्यं तत्कथमिति पृच्छति—तत्कथमिति । तदवयवयोरयनयोस्तद्रूपं वक्तुं तयोः प्रथमं प्रसिद्धिमाह—तस्येति । प्रसिद्धिमेवाऽऽह—याभ्यामिति । एवमपि कथं तयोस्तदात्मकत्वमित्याह—कथमिति । दक्षिणायनस्य रयित्वं वक्तुं कर्मिणां रयिरूपचन्द्रनिर्वर्तकत्वमाह—तत्तत्रेति । लोकमिति । सोमरूपं शरीरमित्यर्थः । तस्य कर्मकृतत्वं पुनरावृत्त्या साधयति—कृतरूपत्वादिति । रयिरूपचन्द्रस्य दक्षिणायनद्वारा प्राप्यत्वात्तस्यायनस्य तदन्तर्भाव इति वक्तुं तस्य कर्मिभिः प्राप्यत्वमाह—यस्मादिति । एवं च तस्य रयित्वं सिद्धमित्याह—एष इति । पितृयाणोपलक्षित इति । तत्प्राप्य इत्यर्थः । ततश्च तद्विशेषणस्यायनस्यापि रयित्वमित्यर्थः (९) । इदानीमुत्तरायणस्य प्राणत्वमाह—अथेति ।

---

१ क. °न प्राजापत्यं प्रा° । २ क. च. °मन° । ३ क. च. °रन° ।

प्राणरूपादित्यप्रापकत्वादुत्तरायणस्य तस्यापि प्राणत्वमिति संवत्सरस्य रयिप्राणमिथुनात्मकत्वमिति तत्कार्यत्वं युक्तमिति भावः । अस्य कर्मसाध्यचन्द्रवैलक्षण्यमाह— एतद्वा इति । इतरत्सर्वं समानम् । अस्मिन्नर्थे इति । संवत्सरस्वरूप इत्यर्थः ॥ १० ॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडर आहुरर्पितमिति ॥ ११ ॥

पञ्चपादं पञ्चर्तवः पादा इवास्य संवत्सरात्मन आदित्यस्य तैरसौ पादैरिवर्तुभिरावर्तते । हेमन्तशिशिरावेकीकृत्येयं कल्पना । पितरं सर्वस्य जनयितृत्वात्पितृत्वं तस्य, तं द्वादशाकृतिं द्वादश मासा आकृतयोऽवयवा आकरणं वाऽवयविकरणमस्य द्वादशमासैस्तं द्वादशाकृतिम् । दिवो द्युलोकात्[1]परे ऊर्ध्वेऽर्धे स्थाने तृतीयस्यां दिवीत्यर्थः । पुरीषिणं पुरीषवन्तमुदकवन्तमाहुः कालविदः । अथ तमेवान्य इम उ परे कालविदो विचक्षणं निपुणं सर्वज्ञं सप्तचक्रे सप्तहयरूपेण चक्रे सततं गतिमति कालात्मनि षडरे षड्ऋतुमत्याहुः सर्वमिदं जगत्कथयन्ति । अर्पितमरा इव रथनाभौ निविष्टमिति । यदि पञ्चपादो द्वादशाकृतिर्यदि वा सप्तचक्रः षडरः सर्वथाऽपि संवत्सरः कालात्मा प्रजापतिश्चन्द्रादित्यलक्षणोऽपि जगतः कारणम् ॥ ११ ॥

इयं कल्पनेऽपि । पञ्चधा कर्मसाध्यचन्द्रवैलक्षण्यकल्पनेत्यर्थः । जनयितृत्वादिति । संवत्सरात्मककालस्य सर्वजनकत्वादित्यर्थः । समानाधिकरणबहुव्रीहितया व्याख्याय व्यधिकरणबहुव्रीहिर्वेत्याह—आकरणं वेति । अवयविकरणमिति । अवयवित्वेन करणमित्यर्थः । पक्षद्वयेऽप्येक एवार्थः । द्युलोकादिति । आकाशरूपादन्तरिक्षलोकादित्यर्थः । अन्यथा स्वर्गलोकात्परस्य चतुर्थत्वेन तृतीयस्यामित्यनन्वयापत्तेः । उदकवन्तमिति । आदित्याज्जायते वृष्टिरिति स्मृतेरित्यर्थः । अन्य इत्यस्य पूर्वार्धगतेनाऽऽहुरित्यनेन संबन्धः । उ इति । तुशब्दसमानार्थो निपातः । परे तु तमेव विचक्षणमाहुरित्यन्वयः । किमाहुरित्यत आह—सप्तचक्र इति । तस्मिन्विचक्षणे सप्तचक्राद्यात्मके सर्वमिदं जगदर्पितमित्याहुरित्यर्थः । मतद्वयेऽपि कीदृशोऽर्थभेद इत्यत आह— यदीति । पूर्वमत ऋतूनां पादत्वकल्पनया मासानामवयवत्वकल्पनयाऽऽदित्यात्मना संवत्सरः काल एवोक्तः । द्वितीये तु हेमन्तशिशिरौ पृथक्कृत्य षण्णामृतू-

---

१ ख. घ. ङ. °कादाहुः पर° । २ क. च. °धाकल्पसा° ।

नामरत्वकल्पनया संवत्सरस्य परिवर्तनगुणयोगेन चक्रत्वकल्पनया कालप्राधान्येन सर्वाश्रयत्वेन च स एवोक्तः । पक्षद्वयेऽपि गुणभेदेन कल्पनाभेदेन च भेदो न धर्मिभेद इत्यर्थः ॥ ११ ॥

मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेत ऋषयः शुक्ल इष्टं कुर्वन्तीतर इतरस्मिन् ॥ १२ ॥

यस्मिन्निदं श्रितं विश्वं स एव प्रजापतिः संवत्सराख्यः स्वावयवे मासे कृत्स्नः परिसमाप्यते । मासो वै प्रजापतिर्यथोक्तलक्षण एवं मिथुनात्मकस्तस्य मासात्मनः प्रजापतेरेको भागः कृष्णपक्षो रयिरन्नं चन्द्रमा अपरो भागः शुक्लः शुक्लपक्षः प्राण आदित्योऽत्ताऽग्निर्यस्माच्छुक्लपक्षात्मानं प्राणं सर्वमेव पश्यन्ति तस्मात्प्राणदर्शिन एत ऋषयः कृष्णपक्षेऽपीष्टं यागं कुर्वन्तः शुक्लपक्ष एव कुर्वन्ति प्राणव्यतिरेकेण कृष्णपक्षस्तैर्न दृश्यते यस्मादितरे तु प्राणं न पश्यन्तीत्यदर्शनलक्षणं कृष्णात्मानमेव पश्यन्ति । इतर इतरस्मिन्कृष्णपक्ष एव कुर्वन्ति शुक्ले कुर्वन्तोऽपि॥ १२॥

कारणत्वे श्लोकोक्तं जगदाश्रयत्वं हेतुमाह—यस्मिन्निति । संवत्सरस्यापि मासाहोरात्ररूपंत्यतिरेकेणौषध्यादिजनकत्वाभावात्तस्य मासाद्यात्मकत्वमाह—स एवेति । यथोक्तेति । संवत्सररूपो रयिप्राणमिथुनात्मक इत्यर्थः । शुक्लकृष्णयोरुभयोरपि दर्शपूर्णमासादिकर्मानुष्ठानदर्शनात्तस्मादेत ऋषय इत्यादि वाक्यमनुपपन्नमित्याशङ्क्य शुक्लस्य प्राणात्मकत्वज्ञानस्तुतिपरतया व्याचष्टे—यस्मादिति । यस्मात्प्राणं सर्वमेव सर्वात्मकमेव पश्यन्ति यस्माच्च प्राणव्यतिरेकेण कृष्णपक्षस्तैर्न दृश्यते तस्मादित्यन्वयः । प्राणस्य शुक्लपक्षात्मकत्वात्कृष्णपक्षादिसर्वजगतः प्राणात्मत्वात्प्राणद्वारा कृष्णपक्षस्यापि शुक्लपक्षत्वे सति कृष्णे कुर्वन्तोऽपि प्रकाशात्मके शुक्ल एव कुर्वन्तीति शुक्लपक्षे प्राणत्वज्ञानस्य स्तुतिरित्यर्थः । एतत्स्तुत्यर्थमेव ज्ञानरहितान्निन्दति—इतरे त्विति । ये तु सर्वात्मानं प्राणं न पश्यन्त्यज्ञत्वात्तेषां शुक्लपक्षः प्राणत्वेनाज्ञायमानत्वादज्ञानात्मकः सन्कृष्णपक्षत्वमापद्यतेऽतः शुक्ले कुर्वन्तोऽप्यदर्शनात्मकत्वात्प्रकाशरहिते कृष्ण एव कुर्वन्तीति ते निन्द्यन्त इत्यर्थः । उक्तमर्थं श्रुत्यारूढं करोति—इतर इति ॥ १२ ॥

अहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते प्रस्कन्दन्ति ये दिवा

---

१ क. इष्टिं । २ ख. ग. घ. एवं ।

रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्-
द्वात्रौ रत्या संयुज्यन्ते ॥ १३ ॥

सोऽपि मासात्मा प्रजापतिः स्वावयवेऽहोरात्रे परिसमाप्यते पूर्ववत् । तस्यैष्यहरेव प्राणोऽत्ताऽग्नी रात्रिरेव रयिः पूर्ववत् । प्राणमहरात्मानं वा एते प्रस्कन्दन्ति निर्गमयन्ति शोषयन्ति वा स्वात्मनो विच्छिद्यापनयन्ति । के । ये दिवाऽहनि रत्या रतिकारणभूतया सह स्त्रिया संयुज्यन्ते मिथुनं मैथुनमाचरन्ति मूढाः । यत एवं तस्मात्तन्न कर्तव्यमिति प्रतिषेधः प्रासङ्गिकः । यद्रात्रौ संयुज्यन्ते रत्या ऋतौ ब्रह्मचर्यमेव तदिति प्रशस्तत्वादृतौ* भार्यागमनं कर्तव्यमिति । अयमपि प्रासङ्गिको विधिः । प्रकृतं तूच्यते सोऽहोरात्रात्मकः प्रजापतिर्व्रीहियवाद्यन्नात्मना व्यवस्थितः ॥ १३ ॥

रयिः पूर्ववदिति । रयिरन्नं चन्द्रमा इत्यर्थः । अह्नः प्राणत्वोक्तिप्रसङ्गादाह मैथुनं निषेधति—प्राणमिति । प्रकृतमिति । कुतो ह वा इमाः प्रजाः प्रजायन्त इति पृष्टमित्यर्थः । पूर्वोक्तं सर्वमेतदुपयोगितयोक्तं न तु साक्षात्प्रकृतमिति भावः ॥ १३ ॥

अन्नं वै प्रजापतिस्ततो ह वै तद्रेतस्तस्मा-
दिमाः प्रजाः प्रजायन्त इति ॥ १४ ॥

एवं क्रमेण परिणम्य तदन्नं वै प्रजापतिः । कथम् । ततस्तस्माद्ध वै रेतो नृबीजं तत्प्रजाकारणं तस्माद्योषिति सिक्तादिमा मनुष्यादिलक्षणाः प्रजाः प्रजायन्ते यत्पृष्टं कुतो ह वै प्रजाः प्रजायन्त इति । तदेवं चन्द्रादित्यमिथुनादिक्रमेणाहोरात्रान्तेनान्नासृग्रेतोद्वारेणेमाः प्रजाः प्रजायन्त इति निर्णीतम् ॥ १४ ॥

एवं क्रमेणेति । रयिप्राणसंवत्सरादिक्रमेण परिणम्य व्रीह्याद्यात्मना व्यवस्थितः सन्नन्नं वै प्रजापतिरन्नात्मको जातः प्रजापतिरित्यन्वयः । कथमिति । अन्नरूपत्वेऽपि तस्य कथं प्रजाजनकत्वमित्यर्थः । तत इति । भक्षितादन्नादित्यर्थः । रेत इति । शोणितस्याप्युपलक्षणं तुल्यत्वादिति ॥ १४ ॥

---

* अत्र रात्रावित्यर्थलभ्यम् ।

---

१ ख. ग. ङ. °स्याह° । २ च. °न्ते मै° । ३ क. °थुनमा° । ४ क. °मेणाहोरात्रः प्रजापतिरन्ने विपरिणम्यतेऽन्नं । ५ क. च. °नान्नरेतो° ।

तपो ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुन-
मुत्पादयन्ते । तेषामेवैष ब्रह्मलोको येषां तपो
ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम् ॥ १५ ॥

[1]तच्चैवं सति ये गृहस्थाः 'ह वै' इति प्रसिद्धस्मरणार्थौ निपातौ । तत्प्रजापतेर्व्रतमृतौ भार्यागमनं चरन्ति कुर्वन्ति तेषां दृष्टफलमिदम् । किम् । ते मिथुनं पुत्रं दुहितरं चोत्पादयन्ते । अदृष्टं च फलमिष्टापूर्तदत्तकारिणां तेषामेवैष यश्चान्द्रमसो ब्रह्मलोकः पितृयाणलक्षणो येषां तपः स्नातकव्रतादीनि, ब्रह्मचर्यम् । ऋतावन्यत्र मैथुनासमाचरणं ब्रह्मचर्यम् । येषु च सत्यमनृतवर्जनं प्रतिष्ठितमव्यभिचारितया वर्तते नित्यमेवँ॥१५॥

प्रजापतिव्रताचरणमात्रेण नादृष्टफलं चन्द्रलोकः प्राप्यते मूर्खाणामपि प्रसङ्गादत आह—इष्टापूर्तेति । चान्द्रमसो ब्रह्मलोक इत्यपरब्रह्मणः प्रजापतेरंशत्वाद्रयिरूपस्य चन्द्रस्य ब्रह्मलोकत्वमित्यर्थः । इष्टादिकारिणां तपआदिकमपि चन्द्रलोकप्राप्त्यर्थमपेक्षितमित्यत आह—येषां तप इति ॥ १५ ॥

तेषामसौ विरजो ब्रह्मलोको न येषु
जिह्ममनृतं न माया चेति ॥१६॥
इत्यथर्ववेदीयप्रश्नोपनिषदि प्रथमः प्रश्नः ॥ १ ॥

[2]यस्तु पुनरादित्योपलक्षित उत्तरायणः प्राणात्मभावो विरजः शुद्धो न चन्द्रब्रह्मलोकवद्रजस्वलो वृद्धिक्षयादियुक्तोऽसौ केषां तेषामित्युच्यते यथा गृहस्थानामनेकविरुद्धसंव्यवहारप्रयोजनवत्त्वाज्जिह्मं कौटिल्यं वक्रभावोऽवश्यंभावी तथा न येषु जिह्मम् । यथा च गृहस्थानां क्रीडानर्मादिनिमित्तमनृतमवर्जनीयं तथा न येषु तत्, तथा माया गृहस्थानामिव न येषु विद्यते । माया नाम बहिरन्यथाऽऽत्मानं प्रकाश्यान्यथैव कार्यं करोति सा माया मिथ्याचाररूपा । मायेत्येवमादयो दोषा येष्वधिकारिषु ब्रह्मचारिवानप्रस्थभिक्षुषु निमित्ताभावान्न विद्यन्ते तत्साधनानुरूपेणैव तेषामसौ विरजो ब्रह्मलोक इत्येषा ज्ञानयुक्तकर्मवतां गतिः । पूर्वोक्तस्तु ब्रह्मलोकः केवलकर्मिणां चान्द्रलक्षण इति॥१६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-
श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये प्रथमः प्रश्नः ॥ १ ॥

---

१ क. ङ. तत एवं । २ ख. ग. घ. ङ. °व वस्तु ॥ १५ ॥ ३ ख. ग. ङ. तेषां । ४ क. च. चन्द्रलोक इ° ।

तेषामसौ विरज इत्यादिवाक्यं व्याचष्टे--यस्त्विति । उत्तरायण इति । तेन प्राप्य इत्यर्थः । प्राणात्मभावोऽपरब्रह्मतयाऽवस्थानमित्यर्थः । असौ केषां तेषामिति। तेषामसौ विरज इत्यत्र तेषामित्यनेन केषां निर्देश इति प्रश्नार्थः, न येषु जिह्ममित्यत्र जिह्मादिशब्दं व्यतिरेकप्रदर्शनेन व्याचष्टे—यथेत्यादिना । मायाग्रहणं तादृशानां दोषाणामुपलक्षणमिति वदन्वाक्यार्थं संगृह्य दर्शयति—मायेत्येवमिति । भिक्षुष्विति परमहंसव्यतिरिक्तानां कुटीचकादीनां ग्रहणम् । तेषां ब्रह्मलोकादपि विरक्तत्वेन तत्रानर्थित्वात् । इतिशब्दार्थमाह—इत्येषेति ॥ १६ ॥

इति श्रीमदानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां प्रथमः प्रश्नः ॥ १ ॥

अथ द्वितीयः प्रश्नः ।

—०—:⊙:—०—

प्राणोऽत्ता प्रजापतिरित्युक्तम् । तस्य प्रजापतित्वमत्तृत्वं चास्मिञ्शरीरेऽवधारयितव्यमित्ययं प्रश्न आरभ्यते—

अथ हैनं भार्गवो वैदर्भिः पप्रच्छ । भगवन्कत्येव देवाः प्रजां विधारयन्ते कतर एतत्प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति ॥ १ ॥

अथानन्तरं ह किलैनं भार्गवो वैदर्भिः पप्रच्छ । हे भगवन्कत्येव देवा प्रजां शरीरलक्षणां विधारयन्ते विशेषेण धारयन्ते । कतरे बुद्धीन्द्रियकर्मेन्द्रियविभक्तानामेतत्प्रकाशनं स्वमाहात्म्यप्रख्यापनं प्रकाशयन्ते कोऽसौ पुनरेषां वरिष्ठः प्रधानः कार्यकरणलक्षणानामिति ॥ १ ॥

प्रश्नान्तरस्य प्रथमप्रश्नेन संगतिमाह–प्राणोऽत्तेति। अवधारयितव्यमिति । अत्ता विश्वस्य सत्पतिरित्यत्तृत्वस्यैषोऽग्निस्तपतीत्यारभ्यारा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायस इत्यादिना च प्रजापतित्वस्योत्तरत्र वक्ष्यमाणत्वादित्यर्थः । इदमुपलक्षणं पूर्वं गतिश्रवणेन विरक्तस्यापि चित्तैकाग्र्यं विना वक्ष्यमाणात्मज्ञानासिद्धेस्तदर्थं मन्दानां फलविशेषार्थं च प्राणोपासनार्थं प्रश्नद्वयारम्भः। तत्रापि श्रेष्ठत्वात्तृत्वप्रजापतित्वादिगुणनिर्धारणार्थं द्वितीयः प्रश्नः । तदुत्पत्त्यादिनिर्धारणपूर्वकं तदुपासनविधानार्थं तृतीयः प्रश्नः इत्यपि द्रष्टव्यम् । प्रजाशब्देन शरीरमेव गृह्यते न जीवस्तस्य प्राणधारकत्वेन तद्धार्यत्वाभावादित्याह—शरीरेति । विभक्तानामिति निर्धारणे षष्ठी । स्वमाहात्म्यख्यापनमिति । अवकाशदानादि-

---

१ क. °चराणां प्र° । २ क. °र्थितत्वा° । ३ ख. ग. घ. ङ. च. को वै तेषां । ४ क. °रस्यैतेन प्रश्ने° ।

कमाकाशादीनां माहात्म्यं तस्य ख्यापनं तस्य लोकान्प्रति प्रकटनं तत्प्रकाशयन्ते कुर्वन्तीत्यर्थः । पाकं पचतीतिवत् । अवकाशदानादिकं स्वस्वकार्यं सर्वलोकप्रकटनं यथा तथा कतरे कुर्वन्तीत्यर्थः ॥ १ ॥

तस्मै स होवाचाऽऽकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च । ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः ॥ २ ॥

एवं पृष्टवते तस्मै स होवाच । आकाशो ह वा एष देवो वायुरग्निरापः पृथिवीत्येतानि पञ्च महाभूतानि शरीरारम्भकाणि वाङ्मनश्चक्षुः श्रोत्रमित्यादीनि कर्मेन्द्रियबुद्धीन्द्रियाणि[1] ते कार्यलक्षणाः करणलक्षणाश्च ते देवा आत्मनो माहात्म्यं प्रकाश्याभिवदन्ति स्पर्धमाना ×अहंश्रेष्ठतायै । कथं वदन्ति । वयमेतद्बाणं कार्यकरणसंघातमवष्टभ्य प्रासादमिव स्तम्भादयोऽविश्रिथिलीकृत्य विधारयामो विस्पष्टं धारयामः । मयैवैकेनायं संघातो ध्रियत इत्येकैकस्याभिप्रायः ॥ २ ॥

एष देव इति । वक्ष्यमाणाभिवदनादिव्यवहारसिद्ध्यर्थं चेतनत्वं संभावयितुं देव इति विशेषणम् "अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" इति न्यायेनाऽऽकाशाद्यभिमानिदेवताग्रहणार्थम् । तच्च विशेषणं वाग्वादिष्वपि सर्वत्र संबध्यते । वाग्ग्रहणं कर्मेन्द्रियोपलक्षणार्थं चक्षुरादिग्रहणं ज्ञानेन्द्रियोपलक्षणार्थमिति मत्वाऽऽह—कर्मेन्द्रियेति । कार्यलक्षणाः शरीराकारेण परिणता आकाशादयः । कारणलक्षणानीन्द्रियाणि । माहात्म्यमिति । आकाशादीनामवकाशदानादिरूपं शरीरधारणैकदेशात्मकं प्रकाश्यं स्वकार्यं प्रकाश्य सर्वलोकप्रकटं यथा तथा कृत्वाऽभिवदन्ति, अभितः सर्वत्र कृत्स्नं शरीरधारणं प्रत्येकं वयमेव कुर्म इति वदन्तीत्यर्थः । बाणमिति । बवयोरभेदाद्वाति कुत्सितं गन्धं वहतीति वा [बाणम्] । विनाशं गच्छतीति वा देशादेशान्तरं गच्छतीति वा बणं बणमेव बाणं कार्यकरणसंघातं शरीरमित्यर्थः ॥ २ ॥

× क. पुस्तकेऽहंपदरहितः पाठः ।

१ क. घ. ङ. °णि च शरीरं धारयन्ते ते तन्मध्ये कर्मेन्द्रियबुद्धीन्द्रियाणि शरीरे स्वमाहात्म्यख्यापनं प्रकाश्यन्ते का° । २ क. ग. °णं शरीरं का° ।

तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति तेऽश्रद्दधाना बभूवुः ॥ ३ ॥

तानेवमभिमानवतो वरिष्ठो मुख्यः प्राण उवाचोक्तवान् । मा मैवं मोहमापद्यथाविवेकतयाऽभिमानं मा कुरुत यस्मादहमेवैतद्बाणमवष्टभ्य विधारयामि पञ्चधाऽऽत्मानं प्रविभज्य प्राणादिवृत्तिभेदं स्वस्य कृत्वा विधारयामीत्युक्तवांतं च तस्मिंस्तेऽश्रद्दधाना अप्रत्ययवन्तो बभूवुः कथमेतदेवमिति ॥ ३ ॥

कथमेतदिति । एतत्त्व(द)हमेवैतादित्यालुक्तम् । एवं यथाभूतं कथमित्यर्थः॥३॥

सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते तस्मिꣳश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठन्ते । तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते तस्मिꣳश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वन्ति ॥ ४ ॥

स च प्राणस्तेषामश्रद्दधानतामालक्ष्याभिमानादूर्ध्वमुत्क्रमत इवेदमुत्क्रान्तवानिव * सरोषान्निरपेक्षस्तस्मिन्नुत्क्रामति यद्वृत्तं तद्दृष्टान्तेन प्रत्यक्षी करोति । तस्मिन्नुत्क्रामति सत्यथानन्तरमेवेतरे सर्व एव प्राणाश्चक्षुरादय उत्क्रामन्त उच्चक्रमिरे । तस्मिंश्च प्राणे प्रतिष्ठमाने तूष्णीं भवत्यनुत्क्रामति सति सर्व एव प्रातिष्ठन्ते तूष्णीं व्यवस्थिता अभूवन् । तत्तत्र यथा लोके मक्षिका मधुकराः स्वराजानं मधुकरराजानमुत्क्रामन्तं प्रति सर्वा एवोत्क्रामन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्ते प्रतितिष्ठन्ति । यथाऽयं दृष्टान्त एवं वाङ्मनश्चक्षुः श्रोत्रं चेत्यादयस्त उत्सृज्याश्रद्दधानतां बुद्ध्वा प्राणमाहात्म्यं प्रीताः प्राणं स्तुन्वन्ति स्तुवन्ति ॥ ४ ॥

---

* सरोषत्वादिति वक्तुं युक्तम् ।

---

१ क. च. °ति चास्मि° । २ घ. च. °मुत्काम° । ३ क. °मुत्कामत इवोत्कामतीवे° । च. °मुत्कामत इवोत्कान्त° । ४ क. °मन्त्युच्चक्रमुः । त° । ५ क. तद्यथा ।

उत्क्रान्तवानिवेति । अत्यन्तोत्क्रान्त्यभावादिवशब्दः । निरपेक्ष इति । स्वयमेवेत्यर्थः । दृष्टान्तेनेति । तत्र यथे(तद्यथे)ति वक्ष्यमाणेनेत्यर्थः ॥ ४ ॥

कथम्—

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायु-
रेष पृथिवी रयिर्देवः सदसच्चामृतं च यत् ॥ ५ ॥

एष प्राणोऽग्निः संस्तपति ज्वलति । तथैष सूर्यः सन्प्रकाशते । तथैष पर्जन्यः सन्वर्षति । किंच मघवानिन्द्रः सन्प्रजाः पालयति जिघांसन्त्यसुररक्षांसि । एष वायुरावहप्रवहादिभेदः । किंचैष पृथिवी रयिर्देवः सर्वस्य जगतः सन्मूर्तमसदमूर्तं चामृतं च यद्देवानां स्थितिकारणं किं बहुना ॥ ५ ॥

सूर्यः सन्निति । तपतीत्यनुषङ्गः । संतापयतीत्यर्थः । आवहप्रवहादीति । आवहादयः सप्त वायुगुणास्तथाभूतः सन्मेघाज्ज्योतिश्चक्रादींश्च वहतीति शेषः । एष देवः पृथिवी सन्सर्वस्य जगतो धारयिता रयिश्चन्द्रः सन्सर्वं पुष्णातीत्यर्थः ॥ ५ ॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् । ऋचो
यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च ॥ ६ ॥

अरा इव रथनाभौ श्रद्धादि नामान्तं सर्वं[1] स्थितिकाले प्राण एव प्रतिष्ठितम् । तथर्चो यजूंषि सामानीति त्रिविधा मन्त्रास्तत्साध्यश्च यज्ञः क्षत्रं च सर्वस्य पालयितृ ब्रह्म च यज्ञादिकर्मकर्तृत्वेऽधिकृतं चैवैष प्राणः सर्वम् ॥ ६ ॥

श्रद्धादीति । प्राणाच्छ्रद्धां खं वायुर्ज्योतिरिति इत्यादिना वक्ष्यमाणषोडशकलात्मक इत्यर्थः । ब्रह्म चेति । ब्राह्मणजातिरित्यर्थः । शब्दार्थमाह—यज्ञादीति । अधिकृतं सर्वमेवेत्यन्वयः ॥ ६ ॥

किंच—

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे । तुभ्यं प्राण
प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि ॥ ७ ॥

यः प्रजापतिरपि सन्त्वमेव गर्भे चरसि पितुर्मातुश्च प्रतिरूपः *सन्प्र-

---

* अत्र प्रतिशब्दष्टीकायां प्रशब्दश्चाधिकः ।

---

१ क. किंच ब° । २ क. °वं शरीरं स्थि° ।

तिजायसे प्रजापतित्वादेव प्रागेव सिद्धं तव * मातृपितृत्वं सर्वदेहदेहाकृतिच्छेदेऽनेकः प्राणः सर्वात्माऽसीत्यर्थः । तुभ्यं त्वदर्थं या इमा मनुष्याद्याः प्रजास्तु हे प्राण चक्षुरादिद्वारैर्बलिं हरन्ति । यस्त्वं प्राणैश्चक्षुरादिभिः सह प्रतितिष्ठसि सर्वशरीरेष्वतस्तुभ्यं बलिं हरन्तीति युक्तम् । भोक्ता हि यतस्त्वं तथैवान्यत्सर्वं भोज्यम् ॥ ७ ॥

किंचेति । यः प्रजापतिर्विराट्सोऽपि त्वमेवेत्यन्वयः । पितुर्गर्भे रेतोरूपेण मातुर्गर्भे पुत्ररूपेण यश्चरति पश्चात्तयोरेव प्रतिरूपः सन्सदृशः सन्यः प्रजायते स त्वमेव प्रजायस इत्यन्वयः । प्रतिशब्दार्थ उक्तः—प्रतिरूपः सन्निति । ननु प्राणस्य पुत्ररूपत्वमेवोक्तं न तु * पितृमातृरूपत्वं तत्कस्मादत आह—प्रजापतित्वादेवेति । तस्य सर्वात्मत्वादित्यर्थः । निष्कृष्टार्थमाह—सर्वदेहेति । अत्रापि निष्कृष्टार्थमाह—भोक्ता हीति । अतस्तवैवेत्यतःशब्दाध्याहारेण योज्यम् ॥ ७ ॥

किंच—

देवानामसि वह्नितमः पितॄणां प्रथमा स्वधा ।
ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ॥ ८ ॥

देवानामिन्द्रादीनामसि भवसि त्वं वह्नितमो हविषां प्रापयितृतमः । पितॄणां नान्दीमुखे श्राद्धे या पितृभ्यो दीयते स्वधाऽन्नं सा देवधानमपेक्ष्य प्रथमा भवति । तस्यां अपि पितृभ्यः प्रापयिता त्वमेवेत्यर्थः । किंचर्षीणां चक्षुरादीनां प्राणानामङ्गिरसामङ्गिरसभूतानामथर्वणां तेषामेव ' प्राणो वाऽथर्वा ' इति श्रुतेः । चरितं चेष्टितं सत्यमवितथं देहधारणाद्युपकारलक्षणं त्वमेवासि ॥ ८ ॥

हविषां प्रापयितृतम इति । वह्निशब्दो वहनाद्वह्निरिति यौगिक इत्यर्थः । प्रथमा भवतीति । यज्ञादिदैवे(व)कर्मणि प्रथमं नान्दीमुखश्राद्धस्यावश्यकर्तव्यत्वात्सा प्रथमेत्यर्थः । ऋष गताविति धातोर्ज्ञानार्थत्वादृषिशब्दस्य ज्ञानजनकचक्षुराद्यर्थत्वमित्यर्थः । अङ्गिरसभूतानामिति । प्राणाभावेऽङ्गानां शोषदर्शनात्तेषामङ्गिरसत्वमित्यर्थः । मुख्यप्राणस्याथर्वत्वं श्रुत्याऽभिहितं यद्यपि तथाऽपि चक्षुरादीनामपि तदंशत्वादथर्वशब्दार्थत्वमिति भावः ॥ ८ ॥

* मध्यमपदलोपी समासः ।

१ क. °च्छन्न एकः । २ क. पितॄणां । ३ ख. च. °पितॄणां । ४ क. च. °प्रदान° । ५ ख. घ. ङ. °स्यापि ।

किंच—

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता ।
त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥ ९ ॥

इन्द्रः परमेश्वरस्त्वं हे प्राण तेजसा वीर्येण रुद्रोऽसि संहरञ्जगत् । स्थितौ च परि समन्ताद्रक्षिता पालयिता परिरक्षिता त्वमेव जगतः सौम्येन रूपेण । त्वमन्तरिक्षेऽजस्रं चरस्युदयास्तमयाभ्यां सूर्यस्त्वमेव च सर्वेषां ज्योतिषां पतिः ॥ ९ ॥

इहेन्द्रशब्देन परमेश्वरत्वमुच्यते मघवानित्यनेन त्विन्द्र उक्त इति भेदमाह—इन्द्रः परमेश्वर इति । वीर्येण संहारसामर्थ्येनेत्यर्थः । सौम्येनेति । विष्ण्वादिरूपेणेत्यर्थः ॥ ९ ॥

यदा त्वमभिवर्षस्यथेमाः प्राणते प्रजाः । आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति ॥ १० ॥

यदा पर्जन्यो भूत्वाऽभिवर्षसि त्वमथ तदाऽन्नं प्राप्येमाः प्रजाः प्राणते प्राणचेष्टां कुर्वन्तीत्यर्थः । अथवा प्राण ते तवेमाः प्रजाः स्वात्मभूतास्त्वदन्नसंवर्धितास्त्वदभिवर्षणदर्शनमात्रेण चाऽऽनन्दरूपाः सुखं प्राप्ता इव सत्यस्तिष्ठन्ति । कामायेच्छातोऽन्नं भविष्यतीत्येवमभिप्रायः ॥ १० ॥

॥ १० ॥

किंच—

व्रात्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः ।
वयमाद्यस्य दातारः पिता त्वं मातरिश्व नः ॥ ११ ॥

प्रथमजत्वादन्यस्य संस्कर्तुरभावादसंस्कृतो व्रात्यस्त्वम् । स्वभावत एव शुद्ध इत्यभिप्रायः । हे प्राणैकऋषिस्त्वमाथर्वणानां प्रसिद्ध एकर्षिनामाऽग्निः सन्नत्ता सर्वहविषाम् । त्वमेव विश्वस्य सर्वस्य सतो विद्यमानस्य पतिः सत्पतिः । साधुर्वा पतिः सत्पतिः । वयं पुनराद्यस्य तवादनीयस्य हविषो दातारः । त्वं पिता मातरिश्व हे मातरिश्वन्नोऽस्माकम् । अथवा मातरिश्वनो वायोस्त्वम् । अतश्च सर्वस्यैव जगतः पितृत्वं सिद्धम् ॥ ११ ॥

असंस्कृत इति । संस्कारहीनो व्रात्य इति स्मृतेरित्यर्थः । अनेन स्वतःशुद्धत्वं

---

१ ग. श्वन्, अः, अकारो ब्रह्मविष्णुश्चेत्यर्थान्तरं नोऽस्मा' ।

विवक्षितमित्याह—स्वभावत एवेति । मातरिश्वेति । मातरिश्व न इत्यत्र नलोपश्छान्दस इत्यर्थः । वायोस्त्वमिति । पितेत्यनुषङ्गः । अस्मिन्व्याख्याने वायुमात्रपितृत्वादस्मदादिसर्वपितृत्वमनुक्तं स्यादत आह—अतश्चेति । अस्मदादिसर्वजनकत्वाद्वायोस्तज्जनकस्याऽऽकाशात्मनः प्राणस्य सर्वजनकत्वं सिद्धमित्यर्थः ॥ ११ ॥

किं बहुना—

या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि ।
या च मनसि संतता शिवां तां कुरु मोत्क्रमीः ॥ १२ ॥

या ते त्वदीया तनूर्वाचि प्रतिष्ठिता वक्तृत्वेन वदनचेष्टां कुर्वती । या श्रोत्रे या च चक्षुषि या च मनसि संकल्पादिव्यापारेण संतता समनुगता तनूस्तां शिवां शान्तां कुरु मोत्क्रमीरुत्क्रमणेनाशिवां मा कार्षीरित्यर्थः ॥ १२ ॥

वाचि प्रतिष्ठितेति । वाच्यपानरूपा तनूः प्रतिष्ठिता । श्रोत्रे व्यानरूपा । चक्षुषि प्राणरूपा । मनसि समानरूपा । 'स प्राणस्तच्चक्षुः स व्यानस्तच्छ्रोत्रं सोऽपानः सा वाक्स समानस्तन्मनः' इति श्रुतेरित्यर्थः । उत्क्रमणेनेति । प्राणोत्क्रमणे सत्यपानाद्यात्मिका वागादिरूपा तनूरशिवा कार्यायोग्या स्यादित्यर्थः ॥ १२ ॥

किं बहुना—

प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् । मातेव
पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति ॥ १३ ॥
इत्यथर्ववेदीयप्रश्नोपनिषदि द्वितीयः प्रश्नः ॥ २ ॥

अस्मिल्लोके प्राणस्यैव वशे सर्वमिदं यत्किंचिदुपभोगजातं त्रिदिवे तृतीयस्यां दिवि च यत्प्रतिष्ठितं देवाद्युपभोगलक्षणं तस्यापि प्राण एवेक्षिता रक्षिता । अतो मातेव पुत्रानस्मान्रक्षस्व पालयस्व । त्वन्निमित्ता हि ब्राह्मण्यः[1] क्षात्रियाश्च श्रियस्तास्त्वं श्रीश्च श्रियश्च प्रज्ञां च त्वत्स्थितिनिमित्तां विधेहि नो विधत्स्वेत्यर्थः । इत्येवं सर्वात्मतया[2] वागादिभिः प्राणैः स्तुत्या गमितमहिमा प्राणः प्रजापतिरित्येवमवधृतम् ॥ १३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये
द्वितीयः प्रश्नः ॥ २ ॥

---

१ क. °त्मना यो वा° । २ क. °मानः स प्रजापतिरेवेत्य° ।

ब्राह्म्य इति । ऋगादिमन्त्ररूपा ब्राह्म्यः श्रियः । 'ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम्' इति श्रुतेः । क्षात्र्यः प्रसिद्धा धनाद्यैश्वर्यरूपाः । अस्मिन्प्रश्ने निर्धारितं गुणं संगृह्याऽऽह—इत्येवमिति । इदं वरिष्ठत्वादेरुपलक्षणम् ॥ १३ ॥

इत्यानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां द्वितीयः प्रश्नः ॥ २ ॥

अथ तृतीयः प्रश्नः ।

—०-:⊙:-०—

अथ हैनं कौसल्यश्चाऽऽश्वलायनः पप्रच्छ । भगवन्कुत एष प्राणो जायते कथमायात्यस्मिञ्शरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं बाह्यमभिधत्ते कथमध्यात्ममिति ॥ १ ॥

अथ हैनं कौसल्यश्चाऽऽश्वलायनः पप्रच्छ । प्राणो ह्येवं प्राणैर्निर्धारितस्तत्त्वैरुपलब्धमहिमाऽपि संहतत्वात्स्यादस्य कार्यत्वमतः पृच्छामि । भगवन्कुतः कस्मात्कारणादेष यथावधृतः प्राणो जायते । जातश्च कथं केन वृत्तिविशेषेणाऽऽयात्यस्मिञ्शरीरे । किंनिमित्तकमस्य शरीरग्रहणमित्यर्थः । प्रविष्टश्च शरीर आत्मानं वा प्रविभज्य प्रविभागं कृत्वा कथं केन प्रकारेण प्रातिष्ठते प्रतितिष्ठति । केन वा वृत्तिविशेषेणास्माच्छरीरादुत्क्रमत उत्क्रामति । कथं बाह्यमधिभूतमधिदैवं चाभिधत्ते धारयति कथमध्यात्ममिति ॥ १ ॥

एवं प्रजापतित्वात्तृत्वादिगुणजातं निर्धार्य प्राणस्योत्पत्त्यादि निर्धारयंस्तदुपासनां विधातुं प्रश्नान्तरमवतारयति—अथेति । वैदर्भिप्रश्नानन्तरमित्यर्थः । प्राणैरिति । यैर्वागादिप्राणैराकाशादिभिश्च प्राणस्य तत्त्वमुपलब्धं तैरित्यर्थः । प्राणस्य पूर्वोक्तमहिमत्वादेवोत्पत्तिशङ्कामावात्कुत इति प्रश्नानुपपत्तिमाशङ्क्याऽऽह—अपि संहतत्वादिति । अनेकात्मकत्वात्सावयवत्वादित्यर्थः । शरीरग्रहणमिति । शरीरप्रवेश इत्यर्थः । प्रातिष्ठित इति । आङ्प्रश्लेषाद्दीर्घत्वम् ॥ १ ॥

तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोऽसीति तस्मात्तेऽहं ब्रवीमि ॥ २ ॥

---

१ क. प्राणैर्ह्येवं निर्धारिततत्त्व उप° । २ ख. °वं निर्धारिततत्त्व उप° । ३ घ. ङ. °तत्वा उप । ४ क. °दैवं चा° । च. °दैवं वाऽभि° । ५ क. °ति धारयतीति शेषः ॥ १ ॥

एवं पृष्टस्तस्मै स होवाचाऽऽचार्यः प्राण एव तावद्दुर्विज्ञेयत्वाद्विषमप्रश्नार्हस्तस्यापि जन्मादि त्वं पृच्छस्यतोऽतिप्रश्नान्पृच्छसि । ब्रह्मिष्ठोऽसीत्यतिशयेन त्वं ब्रह्मविदतस्तुष्टोऽहं तस्मात्ते तुभ्यं ब्रवीमि यत्पृष्टं शृणु ॥ २ ॥

विषमेति । विषमं दुर्घटं यथा तथा प्रश्नार्ह इत्यर्थः । अतिप्रश्नानिति । त्वदन्येषां प्रश्नानतिक्रान्तानन्यदीयप्रश्नागोचरान्सूक्ष्मप्रश्नान्प्रष्टव्यार्थानित्यर्थः । अतिशयेनेति । अपरब्रह्मापेक्षयाऽतिशयितमुख्यब्रह्मविदसि त्वमिति प्रोत्साहार्थं स्तौतीति भावः ॥ २ ॥

आत्मन एष प्राणो जायते । यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनाऽऽयात्यस्मिञ्शरीरे ॥ ३ ॥

आत्मनः परस्मात्पुरुषादक्षरात्सत्यादेष उक्तः प्राणो जायते । कथमित्यत्र दृष्टान्तः । यथा लोक एषा पुरुषे शिरःपाण्यादिलक्षणे निमित्ते छाया नैमित्तिकी जायते तद्वदेतस्मिन्ब्रह्मण्येतत्प्राणाख्यं छायास्थानीयमनृतरूपं तत्त्वं सत्ये पुरुष आततं समर्पितमित्येतत् । छायेव देहे मनोकृतेन मनःसंकल्पेच्छादिनिष्पन्नकर्मनिमित्तेनेत्येतद्वक्ष्यति हि पुण्येन पुण्यमित्यादि । तदेव सक्तः सह कर्मणेति च श्रुत्यन्तरात् । आयात्यागच्छत्यस्मिञ्शरीरे ॥ ३ ॥

'दिव्यो ह्यमूर्तः पुरुषः, अक्षरात्परतः परः' 'एतस्माज्जायते प्राणः' इति मन्त्रावत्र संवादयितुं तद्गतविशेषणान्याह—परस्मादिति । अत्र दृष्टान्त इति । तस्यानृतत्वार्थं दृष्टान्त उच्यत इत्यर्थः । छायेति । प्रतिबिम्बादिरूपेत्यर्थः । एतस्मिन्निति । प्रकृते जनक आत्मनि ब्रह्मणीत्यर्थः । कथमायातीत्यस्योत्तरमाह—मनोकृतेनेति । संधिरार्षः । तदेव सक्त इति । अस्य कर्मिणो मनो यस्मिन्फले निषक्तं संसक्त आसक्तः संस्तदेव फलं कर्मणा सहैतीति श्रुतौ च शरीरग्रहणं कर्मसाध्यमुक्तमित्यर्थः ॥ ३ ॥

यथा सम्राडेवाधिकृतान्विनियुङ्क्ते । एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव संनिधत्ते ॥ ४ ॥

१ क. इत्येवं । २ ख. घ. ङ. °वितं मुख्यं ब्राह्मासि त्वं° । ३ क. °देवैष । ४ ग. °मैणेति । ५ क. °सक्तमास° ।

यथा येन प्रकारेण लोके राजा सम्राडेव ग्रामादिष्वधिकृतान्वानियुङ्क्ते । कथम् । एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेति । एवमेव यथा दृष्टान्तः । एष मुख्यः प्राण इतरान्प्राणांश्चक्षुरादीनात्मभेदांश्च पृथक्पृथगेव यथास्थानं संनिधत्ते वियुङ्क्ते ॥ ४ ॥

आत्मानं वा प्रविभज्येत्यस्योत्तरं दृष्टान्तेनाऽऽह—यथेति । इतरानिति । इतरांश्चक्षुरादीन्यथास्थानमक्ष्यादिगोलकस्थाने संनिधत्ते संनिधापयति । आत्मभेदान्मुख्यप्राणस्य वृत्तिभेदान्प्राणापानादीन्वाय्वादिषु नियुङ्क्त इति । अत्र श्रुत्या नेत्रादीनां चक्षुरादिस्थानानां स्पष्टत्वात्तानि नोक्तानीति द्रष्टव्यम् ॥ ४ ॥

तत्र विभागः—

पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समानः । एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवन्ति ॥ ५ ॥

पायूपस्थे पायुश्चोपस्थश्च पायूपस्थं तस्मिन्नपानमात्मभेदं मूत्रपुरीषाद्यपनयनं कुर्वंस्तिष्ठति संनिधत्ते । तथा चक्षुःश्रोत्रे चक्षुश्च श्रोत्रं च चक्षुःश्रोत्रं तस्मिंश्चक्षुःश्रोत्रे । मुखनासिकाभ्यां च मुखं च नासिका च ताभ्यां मुखनासिकाभ्यां च निर्गच्छन्प्राणः स्वयं सम्राट्स्थानीयः प्रातिष्ठते प्रतितिष्ठति । मध्ये तु प्राणापानयोः स्थानयोर्नाभ्याम् । समानोऽशितं पीतं च समं नयतीति समानः । एष हि यस्माद्यदेतद्धुतं भुक्तं पीतं चाऽऽत्मन्यग्नौ प्रक्षिप्तमन्नं समं नयति तस्मादशितपीतेन्धनादग्नेरौदर्याद्धृदयदेशं प्राप्तादेताः सप्तसंख्याका अर्चिषो दीप्तयो निर्गच्छन्त्यो भवन्ति * शीर्षण्यः । प्राणद्वारा दर्शनश्रवणादिलक्षणरूपादिविषयप्रकाशा इत्यभिप्रायः ॥ ५ ॥

यः कुर्वंस्तिष्ठति तं संनिधत्ते वियुङ्क्त इत्यर्थः । मध्य इति । प्राणापानयोर्मध्ये या नाभिस्तस्यां समानः प्रतितिष्ठतीत्यन्वयः । समानशब्दार्थमुक्तं श्रुत्यारूढं करोति—एष हीति । आत्मन्यग्नाविति । आत्मनि शरीरेऽग्निर्जाठराग्निस्तस्मिन्नित्यर्थः । एवं हुतपदबलादन्नस्य हविष्ट्वं जाठराग्नेराहवनीयत्वं प्रक्षेपस्य होमत्वं चोक्त्वा

* शीर्षण्यप्राणद्वारेति क्वचित्पाठः स एव साधीयान् ।

१ ख. ग. घ. ङ. च. °माद्यधि° ।

शीर्षण्यसप्तद्वारान्निर्गतानां ज्ञानानामर्चिष्ट्वं वक्तुं तस्मादेता इति वाक्यं व्याचष्टे—तस्मादिति। प्राप्तादिति। अग्नेरौदर्याद्धेतोः प्राप्तपरिपाकादन्नरसादन्ननाडीद्वारा देहं प्राप्तं नाडीस्थानं हृदयं प्राप्तादन्नरसादिति शेषः। दर्शनद्वयं श्रवणद्वयं प्राणद्वयं मुखं चैकं रसना(न)मिति सप्तार्चिषः। जाठराग्निपाकजन्यान्नरसबलेन दर्शनादीनां प्रवृत्तेस्तेषु तदर्चिष्ट्वारोप इत्यर्थः ॥ ५ ॥

हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्त्यासु व्यानश्चरति ॥ ६ ॥

हृदि ह्येष पुण्डरीकाकारमांसपिण्डपरिच्छिन्ने हृदयाकाश एष आत्माऽऽत्मनेना संयुक्तो लिङ्गात्मा। अत्रास्मिन्हृदय एतदेकशतमेकोत्तरशतं संख्यया प्रधाननाडीनां भवतीति। तासां शतं शतमेकैकस्याः प्रधाननाड्या भेदाः। पुनरपि द्वासप्ततिर्द्वासप्ततिर्द्वे द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि। सहस्राणां द्वासप्ततिः प्रतिशाखानाडीसहस्राणि प्रतिप्रतिनाडीशतं संख्यया प्रधाननाडीनां सहस्राणि भवन्ति। आसु नाडीषु व्यानो वायुश्चरति। व्यानो व्यापनात्। आदित्यादिव रश्मयो हृदयात्सर्वतोगामिनीभिर्नाडीभिः सर्वदेहं संव्याप्य व्यानो वर्तते। संधिस्कन्धमर्मदेशेषु विशेषेण प्राणापानवृत्त्योश्च मध्य उद्भूतवृत्तिर्भीर्यवत्कर्मकर्ता भवति ॥ ६ ॥

व्यानस्य नाडीरूपं स्थानं दर्शयितुं नाडीनामुत्पत्तिस्थानं वक्तुमाह—हृदीत्यादिना। हृदयस्य लिङ्गात्मस्थानत्वोक्तेः। प्रयोजनं तु केचिद्योगिनो नाभिकन्दस्य नाड्युत्पत्तिस्थानत्वं वदन्ति तन्निराकरणम्। तत्रैव[3] लिङ्गात्मनः संचरणार्था[4] नाड्यः। नाडीभिः प्रत्यवसृप्येत्यादिश्रुतेः। तच्च लिङ्गात्मनो हृदयस्थानत्वे तत्संचारमार्गभूतनाडीनामपि[5] तदेवोत्पत्तिस्थानम्। अन्यथा प्रदेशान्तरस्थनाडीनां तन्मार्गत्वायोगात्। द्वासप्ततिसहस्राणि हृदयात्पुरीततमभितिष्ठन्त इति श्रुतेश्चेति। लिङ्गशरीरस्याऽऽत्मत्वमात्मोपाधित्वेन तद्योगादित्याह—आत्मनेना[6] संयुक्त इति। यस्माल्लिङ्गात्मा हृदि वर्तते तत्संचारमार्गभूतनाडीनामपि तदेव स्थानमित्याह—अत्रेति। नाडीनां शरीरविधारकत्वेन प्रसिद्धत्वं वक्तुमेतदिति विशेषणम्। तस्य स्पष्टत्वाद्भाष्ये न व्याख्यातम्। एकैकस्या नाड्याः शाखानाड्यः शतं शतं भवतीत्याह—

---

१ क. च. °त्मसं°। २ क. °त्मा जीवात्मेत्यर्थः। अ°। ३ ग. घ. ङ. °त्रैवं लि°। ४ क. °गार्थं ना°। ५ क. च. °त्मसं°। ६ ख. °त्यानम्।

तासामिति । ततश्च शतोत्तरमयुतं शाखानाड्य इत्यर्थः । शाखानाडीनां च प्रत्येकं द्व्यधिकसप्ततिसहस्राणि प्रतिशाखानाड्यः सन्तीत्याह—पुनरपीति । सप्ततिरिति पदस्य संख्याप्रधानत्वे सहस्राणीत्यस्य तेन सामानाधिकरण्यायोगात्षष्ठ्यन्ततया व्याचष्टे—सहस्राणामिति । प्रतिशाखेति । प्रतिशाखाभ्यो निर्गता अल्पशाखाः प्रतिशाखाः । द्वासप्ततिरित्यत्र वीप्सार्थमाह—प्रतिप्रतीति । प्रतिप्रतिनाडीशतमित्यनन्तरमेकैकस्या इत्यनुषङ्गः । तथा च प्रतिप्रतिनाडीशतमेकैकस्या नाड्याः प्रतिशाखानाडीनां द्वासप्ततिसहस्राणि भवन्तीत्यर्थः । तथा च मूलशाखाप्रतिशाखानाड्यो मिलित्वा द्वासप्ततिकोट्यो द्वासप्ततिलक्षाणि दशसहस्रं च शतद्वयमेका च भवन्तीति द्रष्टव्यम् । एवं नाडीरुक्त्वा व्यानस्य तत्स्थानत्वमाह—आसिवति । सूक्ष्मासु नाडीषु विद्यमानस्य व्यानस्य कथं व्यापकत्वमित्याशङ्क्य नाडीनां सर्वदेहव्याप्तेस्तत्स्थस्यापि व्यानस्य तद्द्वारा व्याप्तिरित्याह—आदित्यादिवेति । यथाऽऽदित्याद्विनिर्गत्य रश्मयः सर्वतो गतास्तथा हृदयात्सर्वतोगामिन्यो नाड्यस्ताभिरिति योज्यम् । सामान्येन सर्वशरीरव्याप्तावपि विशेषस्थानमाह—संधीति । प्राणेति । उच्छ्वासनिःश्वासयोः प्राणापानवृत्त्योरभावे व्यानवृत्तिरुद्भवतीत्यर्थः । वीर्यवदिति । अथ यः प्राणापानयोः संधिः स व्यान इत्युक्त्वा यानि वीर्यवन्ति कर्माणि बलवता पुरुषेण साध्यानि धनुरायमनादीनि तान्यप्राणन्नपानन्करोतीति श्रुत्यन्तरोक्तेरित्यर्थः ॥ ६ ॥

अथैकयोर्ध्व उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम् ॥ ७ ॥

अथ या तु तत्रैकशतानां नाडीनां मध्य ऊर्ध्वगा सुषुम्नाख्या नाडी तयैकयोर्ध्वः सन्नुदानो वायुरापादतलमस्तकवृत्तिः संचरन्पुण्येन कर्मणा शास्त्रविहितेन पुण्यं लोकं देवादिस्थानलक्षणं नयति प्रापयति । पापेन तद्विपरीतेन पापं नरकं तिर्यग्योन्यादिलक्षणम् । उभाभ्यां समप्रधानाभ्यां पुण्यपापाभ्यामेवं मनुष्यलोकं नयतीत्यनुवर्तते ॥ ७ ॥

इदानीमुदानस्य स्थानं वदन्केनोत्क्रमत इत्यस्योत्तरमाह—या त्विति । उभाभ्यां समप्रधानाभ्यामिति । अनेन पुण्याधिक्ये देवलोकं पापाधिक्ये नरकलोकं नयतीति पूर्वं व्याख्यातं भवति ॥ ७ ॥

आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं

---

१ क, °णि षट्सह°।

चाक्षुषं प्राणमनुगृह्णानः । पृथिव्यां या
देवता सैषा पुरुषस्यापानमवष्टभ्यान्तरा
यदाकाशः स समानो वायुर्व्यानः ॥ ८ ॥

आदित्यो ह वै प्रसिद्धो ह्यधिदैवतं बाह्यः प्राणः । स एष उदयत्युद्गच्छति । एष ह्येनमाध्यात्मिकं चक्षुषि भवं चाक्षुषं प्राणं प्रकाशेनानुगृह्णानो रूपोपलब्धौ चक्षुष आलोकं कुर्वन्नित्यर्थः । तथा पृथिव्यामभिमानिनी या देवता प्रसिद्धा सैषा पुरुषस्यापानमपानवृत्तिमवष्टभ्याऽऽकृष्य वशीकृत्याध एवापकर्षणेनानुग्रहं कुर्वती वर्तत इत्यर्थः । अन्यथा हि शरीरं गुरुत्वात्पतेत्सावकाशे वोद्गच्छेत् । यदेतदन्तरा मध्ये द्यावापृथिव्योर्य आकाशस्तत्स्थो वायुराकाश उच्यते । मञ्चस्थवत् । स समानः समानमनुगृह्णानो वर्तत इत्यर्थः । समानस्यान्तराकाशस्थत्वसामान्यात् । सामान्येन च यो बाह्यो वायुः स व्यानसामान्याद्व्यानो व्यानमनुगृह्णानो वर्तत इत्यभिप्रायः ॥ ८ ॥

कथं बाह्यमभिधत्ते कथमध्यात्ममित्यस्योत्तरमाह—आदित्य इति । या देवता प्रसिद्धेति । अग्निदेवता पृथिव्येव यस्याऽऽयतनमग्निर्लोक इति श्रुतेरग्निसंबद्धा(न्धा?) वगमादित्यर्थः । अवष्टभ्येत्यनन्तरमध्याहारेण वाक्यं पूरयति—अध एवापकर्षणेनेति । वृत्त्यर्थ स्तम्भादेरुर्ध्वमुखेन निखातस्य परितो विद्यमानरज्जुभिरध एवापकर्षणेन पतनाभाववदध एवापकर्षणेन शरीरस्य पतनाभावः सिध्यतीत्यर्थः । अनुग्रहमिति । शरीरधारणलक्षणमित्यर्थः । अन्यथेति । पृथिवीदेवताया विधारणाकरणे गुरुत्वादपानेनाध आकर्षणाच्च सावकाशे भूम्यादिपतनप्रतिबन्धकाभावस्थले पतेदित्यर्थः । अन्तरा यदाकाश इति वाक्यं व्याचष्टे—यदेतदिति । यदिति क्लीबत्वं छान्दसमित्याह—य आकाश इति । मञ्चस्थवदिति । मञ्चाः क्रोशन्तीत्यत्र मञ्चशब्देन मञ्चस्था यथा लक्ष्यन्ते तथाऽऽकाशशब्देन तत्स्थो वायुर्लक्ष्यत इत्यर्थः । स समान इति । सामानाधिकरण्यमनुग्राह्यानुग्राहकयोरभेदोपचारादित्याह—समानमनुगृह्णान इति । एवमुत्तरत्राप्यनुग्रहे हेतुमाह—समानस्येति । शरीरान्तराकाशस्थत्वं समानस्य द्यावापृथिव्यन्तराकाशस्थत्वं बाह्यवायोरित्यन्तराकाशस्थत्वं तयोस्तुल्यमित्यर्थः । वायुर्व्यान इत्यत्र त्वन्तराकाशस्थत्वं विशेषरहितं वायुसामान्येन समुच्चीयत इति न पूर्वाभेद इत्याह—सामान्येनेति ॥ ८ ॥

---

१ क, च. वृत्त्यर्थं । २ क. च. °स्थत्वविशेषरहितो वा° । ख, ग. °स्थश्चवि° ।

तेजो ह वा उदानस्तस्मादुपशान्ततेजाः ।
पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः ॥ ९ ॥

यद्ग्राह्यं ह वै प्रसिद्धं सामान्यं तेजस्तच्छरीर उदान उदानं वायुमनुगृह्णाति स्वेन प्रकाशेनेत्यभिप्रायः । यस्मात्तेजःस्वभावो बाह्यतेजोनुगृहीत उत्क्रान्तिकर्ता तस्माद्यदा लौकिकः पुरुष उपशान्ततेजा भवति । उपशान्तं स्वाभाविकं तेजो यस्य सः । तदा तं क्षीणायुषं मुमूर्षुं विद्यात् । स पुनर्भवं शरीरान्तरं प्रतिपद्यते । कथम् । सहेन्द्रियैर्मनसि संपद्यमानैः प्रविशद्भिर्वागादिभिः ॥ ९ ॥

तेजो ह वाँ इति वाक्यं व्याचष्टे—यद्ग्राह्यमिति । पूर्वमादित्यात्मकं विशेषतेज उक्तमत्र तेजःसामान्यमुच्यत इति न पौनरुक्त्यमित्याह—सामान्यं तेज इति । एवमादित्यादिना रूपेण मुख्यप्राणस्य प्राणापानसमानोदानव्यानानुग्राहकत्वोक्त्याऽध्यात्मं प्राणादिवृत्त्यनुग्राहकत्वमुक्तम् । आदित्याग्न्याकाशसामान्यवायुतेजोरूपी सन्बाह्यमधिदैवमादित्यादिकं धारयतीत्युक्तम् । तद्रूपेणावस्थानमेव तद्धारणं प्राणापानाद्यनुग्रहेण चक्षुराद्यनुग्रहोक्तेस्तद्द्वारा तद्ग्राह्याधिभूतविधारकत्वमुक्तम् । स प्राणस्तच्चक्षुः सोऽपानः सा वाक्स व्यानस्तच्छ्रोत्रं स समानस्तन्मनः स उदानः स वायुरिति श्रुत्यन्तरे चक्षुरादीनां प्राणाद्यात्मकत्वोक्तेश्चक्षुराद्यनुग्राहकत्वोक्त्या चक्षुरादिरूपाध्यात्मविधारकत्वं चोक्तमिति कथं बाह्यमभिधत्ते कथमध्यात्ममित्यस्योत्तरमुक्तमिति द्रष्टव्यम् । तेजस उदानवाय्वनुग्राहकत्वं व्यतिरेकप्रदर्शनेन साधयति—यस्मादिति । यस्मात्तेजःस्वभाव उत्क्रान्तिकृदप्युदानवायुर्बाह्यतेजोनुगृहीतः सन्नेव शरीरे वर्तते तस्माज्जीवंजीवनहेतुकर्मोपरमे बाह्यतेजोनुग्रहाभावेनोपशान्ततेजा मुमूर्षुर्भवतीत्यन्वयः । स्वाभाविकमिति । जाठराग्निकृतं हस्तादिना स्वशरीरस्पर्शे सत्युष्णत्वेनोपलभ्यमानं तेज इत्यर्थः । भवत्युत्पद्यत इति भवः शरीरमित्यर्थः । शरीरान्तरप्रतिपत्तिरात्मनोऽक्रियस्य न भवतीति शङ्कते—कथमिति । इन्द्रियोपाधिवशादित्याह—सहेति । मनसि संपद्यमानैरिन्द्रियैः सह शरीरान्तरं प्रतिपद्यत इति पूर्वेणान्वयः ॥ ९ ॥

यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः ।
सहाऽऽत्मना यथासंकल्पितं लोकं नयति ॥ १० ॥

मरणकाले यच्चित्तो भवति तेनैव चित्तेन संकल्पेनेन्द्रियैः सह प्राणं

---

१ क. वै । ख. ग. च. वाव° । २ ख. घ. ङ. वा । च. वाव । ३ क. च. वाव । ४ च. °न्तिदोऽप्यु° । ५ ख. ग. घ. ङ. °वनजी° । ६ क. °नैष जीवश्चित्ते° ।

मुख्यप्राणवृत्तिमायाति । मरणकाले क्षीणेन्द्रियवृत्तिः सन्मुख्यया प्राणवृत्त्यैवावतिष्ठत इत्यर्थः । तदाऽभिवदन्ति ज्ञातय उच्छ्वसिति जीवतीति । स च प्राणस्तेजसोदानवृत्त्या युक्तः सन्सहाऽऽत्मना स्वामिना भोक्त्रा स एवमुदानवृत्त्यैव युक्तः प्राणस्तं भोक्तारं पुण्यपापकर्मवशाद्यथासंकल्पितं यथाभिप्रेतं लोकं नयति प्रापयति ॥ १० ॥

उक्तशरीरान्तरप्राप्तिमेवोत्क्रान्तिक्रमप्रदर्शनेन स्पष्टीकर्तुं यच्चित्त इत्यादि वाक्यं तदपेक्षिताध्याहारं कुर्वन्व्याचष्टे— मरणेति । यच्चित्त इति । यदेव देवतिर्यगादि शरीरं सम्यगिति चित्ते यस्य स यच्चित्त इत्यर्थः । प्राणं प्रत्यागमनं लोकव्यवहारेण प्रथयति—तदेति । तेजसा तेजोनुगृहीतयोदानवृत्त्येत्यर्थः । एवंभूतो भोक्तो(क्तृ)दानसंयुक्तः प्राणः कं नयतीत्यपेक्षायां तमेव भोक्तारं नयतीति वदन्वाक्यार्थमाह—स एवमिति । एवकारस्य तमेवेत्यन्वयः । यथासंकल्पितमिति । कर्मज्ञानादिसाधनानुष्ठानदशायां संकल्पितं मरणकाले वासनारूपेण पुनरभिव्यक्तं लोकं देवादिशरीरमित्यर्थः ॥ १० ॥

य एवं विद्वान्प्राणं वेद । न हास्य प्रजा
हीयतेऽमृतो भवति तदेष श्लोकः ॥ ११ ॥

यः कश्चिदेवं विद्वान्यथोक्तविशेषणैर्विशिष्टमुत्पत्त्यादिभिः प्राणं वेद जानाति तस्येदं फलमैहिकमामुष्मिकं चोच्यते । न हास्य नैवास्य विदुषः प्रजा पुत्रपौत्रादिलक्षणा हीयते छिद्यते । पतिते च शरीरे प्राणसायुज्यतयाऽमृतोऽमरणधर्मा भवति । तदेतस्मिन्नर्थे संक्षेपाभिधायक एष श्लोको मन्त्रो भवति ॥ ११ ॥

एवं प्राणस्वरूपं निर्धार्य तदुपासनं विधत्ते—यः कश्चिदिति । उत्पत्त्यादिभिर्यथोक्तविशेषणैर्विशिष्टम् । आत्मनः प्राणो जायते, मनःकृताभ्यां धर्माधर्माभ्यां शरीरं गृह्णाति । आत्मानं च पञ्चधा विभज्य पायूपस्थयोरपानं, स्वस्वरूपं प्राणं चक्षुःश्रोत्रयोः, नाभौ समानं, नाडीसमूहे व्यानम्, उदानं च सुषुम्नायां स्थापयति । उदानेनोत्क्रामति, बाह्यैः प्राणापानव्यानसमानोदानानुग्राहकैरादित्यपृथिवीदेवताकाशवायुतेजोरूपैरधिदैवमादित्यादिकृतानुग्रहैरध्यात्मं चक्षुर्वाक्श्रोत्रमनस्त्वक्चक्षुरादिग्राह्यमधिभूतं च धारयति । स एवोदानवृत्त्या भोक्त्रा च युक्तो भोक्तारं लोकान्तरं नयति । स एव च वरिष्ठः प्रजापतिरित्ता चेत्येवं प्राणं वेदेत्यर्थः । ऐहिकफलमुक्त्वाऽऽमुष्मिकफलमाह—पतित इति । अमृतत्वं च नात्र मुख्यं किंतु प्राणसायुज्य-

१ क. च. °दा हि व° । २ क. घ. °यन्तेऽमृ° । ३ क. ख. ग. घ. ङ. प्रजाः । ४ क. ङ. °यते हीयन्ते छिद्यन्ते । प° । ख. ग. घ. °यन्ते छिद्यन्ते प° ।

मेवेत्याह—प्राणेति । इदं कामिनः, निष्कामस्य तु चित्तैकाग्र्यम् । तच्छुद्धिद्वारा मुख्यमेवामृतत्वं भवतीति द्रष्टव्यम् ॥ ११ ॥

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा । अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुत इति ॥ १२ ॥

इत्यथर्ववेदीयप्रश्नोपनिषदि तृतीयः प्रश्नः ॥ ३ ॥

—०—:⊙:—०—

उत्पत्तिं परमात्मनः प्राणस्याऽऽयतिमागमनं मनोकृतेनास्मिञ्शरीरे स्थानं स्थितिं च पायूपस्थादिस्थानेषु विभुत्वं च स्वाम्यमेव सम्राडिव (?) प्राणवृत्तिभेदानां पञ्चधा स्थापनम् । बाह्यमादित्यादिरूपेणाध्यात्मं चैव चक्षुराद्याकारेणावस्थानं विज्ञायैवं प्राण(?)ममृतमश्नुत इति । विज्ञायामृतमश्नुत इति द्विर्वचनं प्रश्नपरिसमाप्त्यर्थम् ॥ १२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये तृतीयः प्रश्नः ॥३॥

आयतिमिति । आयातिमित्यर्थः । ह्रस्वत्वं छान्दसम् ॥ १२ ॥

इति श्रीमदानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां तृतीयः प्रश्नः ॥ ३ ॥

अथ चतुर्थः प्रश्नः ।

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ ।

अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ प्रश्नत्रयेणापरविद्यागोचरं सर्वं परिसमाप्य संसारं व्याकृतविषयं साध्यसाधनलक्षणमनित्यम् । अथेदानीमसाध्यसाधनलक्षणमप्राणममनोगोचरमतीन्द्रियविषयं शिवं शान्तमविकृतमक्षरं सत्यं परविद्यागम्यं पुरुषाख्यं सबाह्याभ्यन्तरमजं वक्तव्यमित्युत्तरं प्रश्नत्रयमारभ्यते ।

एवं कर्मविद्यागतिश्रवणेन विरक्तस्य प्राणविद्यया चित्तैकाग्र्यतच्छुद्धिमतोऽत एव साधनचतुष्टयवतो मुख्याधिकारिणः परविद्योक्त्यर्थं प्रश्नत्रयमारभ्यते—अथ हैनमिति । पूर्वविद्ययैवामृतत्वोक्तेरुत्तरप्रश्नारम्भो व्यर्थ इत्यत आह—प्रश्नत्रयेणेति । संसार-

---

१ क. ख. घ. ङ. च. °यमविष° । २ क. च. °काग्र्यं त° । ३ क. च. °रभ्यते । ४ क. च. °र्वं वि° ।

मिति । अतो न तन्मुख्यममृतत्वमित्यर्थः । तस्य संसारत्वे व्याकृतत्वं हेतुमाह—व्याकृतविषयमिति । व्याकृताश्रयं तदन्तर्गतमित्यर्थः । साध्यसाधनलक्षणमिति । साध्यसाधनसंबन्धेन लक्ष्यतेऽभिव्यज्यत उत्पद्यत इति तथा । यद्वाऽपरब्रह्मणः प्राणस्य साध्यसाधनोभयात्मकत्वाद्वा तथा । तस्मादनित्यमित्यतोऽपि संसारत्वमित्यर्थः । वक्ष्यमाण आत्मा तु न तथेत्याह—असाध्येत्यादिना । अतीन्द्रियविषयमिति । इन्द्रियविषयत्वमतिक्रान्तमित्यव्याकृतमकार्यमित्यर्थः । तत्र हेतुः—अप्राणमिति । प्राणागोचरत्वेन तदात्मककर्मेन्द्रियागोचरत्वं मनोगोचरत्वेन ज्ञानेन्द्रियागोचरत्वमुक्तम् । सुखरूपतामाह—शिवमिति । निवृत्तानर्थत्वमाह—शान्तमिति । तत्र भावविकाररहितत्वं हेतुमाह—अविकृतमिति । अनेनोत्पत्तिपरिणामवृद्धयो निषिद्धाः । अक्षरमित्यपक्षयविनाशौ निषिद्धौ । उत्पत्तिनिषेधेन तदनन्तरभाव्यस्तित्वं निषिद्धम् । अत्र सर्वत्र हेतुः—सत्यमिति । कालत्रयेऽप्येकरूपमित्यर्थः । तत्र 'अथ परा यया तदक्षरमधिगम्यते' इत्यादि वाक्यं मानमाह—परविद्यागम्यमिति । दिव्यो ह्यमूर्तः पुरुष इति मन्त्रमप्याह—पुरुषाख्यमिति । कथं पुरुषशब्दोदितं पूर्णत्वं बाह्याभ्यन्तरवस्तुभेदादत आह—सबाह्येति । स एव बाह्याभ्यन्तरात्मकस्तद्व्यतिरेकेण तदुभयं नास्तीत्यर्थः । प्रश्नत्रयमिति । यद्यपि पञ्चमः प्रश्नोऽपरविद्याविषय एव प्रणवोपासनविषयत्वात्तथाऽपि तस्य क्रममुक्तिफलत्वेन निर्विशेषात्मन्येव सविशेषब्रह्मप्राप्तिद्वारा पर्यवसानात्सोऽपि पराविषय एवेति भावः ।

तत्र सुदीप्तादिवाग्नेर्यस्मात्परादक्षरात्सर्वे भावा विस्फुलिङ्गा इव जायन्ते तत्र चैवापियन्तीत्युक्तं द्वितीये मुण्डके, के ते सर्वे भावा अक्षराद्विभज्यन्ते । कथं वा विभक्ताः सन्तस्तत्रैवापियन्ति । किंलक्षणं वा तदक्षरमिति । एतद्विवक्षयाऽधुना प्रश्नानुद्भावयति—

भगवन्नेतस्मिन्पुरुषे कानि स्वपन्ति कान्यस्मिञ्जाग्रति कतर एष देवः स्वप्नान्पश्यति कस्यैतत्सुखं भवति कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्तीति ॥ १ ॥

भगवन्नेतस्मिन्पुरुषे शिरःपाण्यादिमति कानि करणानि स्वपन्ति स्वापं कुर्वन्ति स्वव्यापारादुपरमन्ते । कानि चास्मिञ्जाग्रति जागरणमनिद्रावस्थां स्वव्यापारं कुर्वन्ति । कतरः कार्यकरणलक्षणयोरेष देवः स्वप्नान्पश्यति । स्वप्नो नाम जाग्रद्दर्शनाभिवृत्तस्य जाग्रद्वदन्तःशरीरे यद्दर्शनम् । तत्किं कार्यलक्षणेन देवेन निर्वर्त्यते किंवा करण-

---

१ क. च. °माणात्मा । २ क. च. °यमवि° । ३ क. °वस्थाव्या° । ४ क. °न्ति स्वव्यापारान्कुर्वन्तीत्यर्थः । क° । ५ क. °क्षणानां य एष ।

लक्षणेन केनचिदित्यभिप्रायः । उपरते च जाग्रत्स्वप्नव्यापारे यत्प्रसन्नं निरायासलक्षणमनाबाधं सुखं कस्यैतद्भवति । तस्मिन्काले जाग्रत्स्वप्नव्यापारादुपरताः सन्तः कस्मिन्नु सर्वे सम्यगेकीभूताः संप्रतिष्ठिताः । मधुनि रसवत्समुद्रं प्रविष्टनद्यादिवच्च विवेकानर्हाः प्रतिष्ठिता भवन्ति संगताः संप्रतिष्ठिता भवन्तीत्यर्थः । ननु न्यस्तदात्रादिकरणवत्स्वव्यापारादुपरतानि पृथक्पृथगेव स्वात्मन्यवतिष्ठन्त इत्येतद्युक्तं कुतः प्राप्तिः सुषुप्तपुरुषाणां करणानां कस्मिंश्चिदेकीभावगमनाशङ्कायाः प्रष्टुः । युक्तैव त्वाशङ्का । यतः संहतानि करणानि स्वाम्यर्थानि परतन्त्राणि च जाग्रद्विषये । तस्मात्स्वापेऽपि संहतानां पारतन्त्र्येणैव कस्मिंश्चित्संगतिर्न्याय्येति तस्मादाशङ्कानुरूप एव प्रश्नोऽयम् । अत्र तु कार्यकरणसंघातो यस्मिंश्च प्रलीनः सुषुप्तप्रलयकालयोस्तद्विशेषं बुभुत्सोः स को नु स्यादिति कस्मिन्सर्वे संप्रतिष्ठिता भवन्तीति ॥ १ ॥

एवं सामान्येन प्रश्नत्रयस्यापि संबन्धमुक्त्वा चतुर्थप्रश्नस्य प्रातिस्विकसंबन्धमाह—तत्रेति । यस्मादित्यस्य किंलक्षणं वा तदक्षरमिति तच्छब्देनान्वयः । उक्तमिति । यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपास्तथाऽक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्तीति मन्त्रेणेत्यर्थः । एतद्विवक्षयेति । मन्त्रोक्तार्थविस्तरानुवादित्वादस्य ब्राह्मणस्येति भावः । अत्राक्षरस्वरूपस्यैव विवक्षितत्वात्तन्निर्णयार्थं कानि स्वपन्तीत्यादिप्रश्नो जागरितादिना धर्मिविशेषनिर्धारणार्थः । अन्यथा तेषामात्मधर्मत्वशङ्कायां तन्निर्विशेषत्वनिर्णयासिद्धेः । भावानां स्वरूपविभागादिविवक्षा तु ताः पुनः पुनरुदयतः प्रचरन्तीति दृष्टान्तबलाद्यत्रैकीभावस्ततो विभागेन निर्ममनमित्यक्षर एकीभूतानां पृथिव्यादिकार्यकरणानामक्षराद्विभागप्रतीतेस्तावन्मात्रेण भाष्य उक्तेति द्रष्टव्यम् । तत्राऽऽद्यप्रश्नेन जागरितस्य धर्मी पृष्टः । स्वप्ने यस्य व्यापारोपरमे जागरितं नास्ति स तस्य धर्म इति (धर्मीति ?) निश्चेतुं शक्यत्वात् । द्वितीयेनावस्थात्रयेऽपि शरीररक्षणं कस्य धर्म इति पृष्टम् । जाग्रतोऽनुपरतव्यापारस्य प्राणस्य देहरक्षकत्वोपपत्तेः । तृतीयेन स्वप्नस्य धर्मी पृष्टः । चतुर्थेन सुषुप्तिधर्मी । सुखमहमस्वाप्समिति सुप्तोत्थितस्य परामर्शे सुखस्य सुषुप्तिसंबन्धावगमात् । पञ्चमप्रश्नेनावस्थात्रयविनिर्मुक्तमवस्थात्रयपर्यवसानभूमिरूपं तुरीयमक्षरं पृष्टमिति विवेकः । कार्येति । कार्यं शरीरं प्राणो वा, करणानि मनआदीनि । पदार्थानुक्त्वा वाक्यार्थं

---

१ ग. च. °मुद्रप्र° । २ क. °तिष्ठा भ° । ३ क. च. °र्थकार° । ४ क. ख. ङ. च. किंवा ल° । ५ क. च. सौम्य । ६ ग. °तादीनां थ° । ७ ख. ग. घ. ङ. °मेश° । ८ क. च. र्थकार° ।

पिण्डीकृत्याऽऽह—तत्किमिति । तत्पदं पूर्वापरयोः संबध्यते । प्रसन्नामिति । विषयसंपर्ककालुष्यराहित्यम् । [निरायासेति] । निरायासेन विक्षेपाभावमात्रेण लक्ष्यतेऽभिव्यज्यते निर्वातस्थापितदीपालोकवदनाबाधं विनाशरहितं सत्यमात्मस्वरूपमित्यर्थः । एतदिति । सुषुप्ते प्रकाशमानं सुखमहमस्वाप्समितिपरामर्शमूलभूतमित्यर्थः । तस्मिन्काल इति । यद्यपि पञ्चमेन प्रश्नेन तुरीयं पृच्छ्यते न सुषुप्तिस्तथाऽपि संसारदशायां सर्वोपाधिरहिततुरीयावस्थाभावेन विवेकत एव तस्य प्रदर्शनीयत्वात्तत्सुषुप्तावज्ञाने सत्यपीतरोपाधिराहित्येन तत्रैव सर्वोपाधिविवेककरणेन तुरीयप्रदर्शनस्य सुकरत्वात्तस्मिन्काले तुरीयप्रदर्शनार्थं सर्वसंप्रतिष्ठोक्तेति । सम्यगेकीभूता इति । तदात्मभावप्राप्त्या विलयं गता इत्यर्थः । मधुनि रसवदिति । यथा नानापुष्परसा मधुन्येकी भवन्ति तद्वदित्यर्थः । विवेकाभावमात्रेण दृष्टान्तावुक्तौ, तत्र सर्वात्मना लयाभावादित्याह—विवेकानर्हा इति । पूर्वं विवेकानर्हाः सन्तः पश्चात्संप्रतिष्ठिता इत्यर्थः । न चानेनापि प्रश्नेनाविद्यावासनाभिरविविक्तः सौषुप्त एव पृष्ट इति शङ्क्यम् । पर आत्मन्यक्षरे संप्रतिष्ठन्त इति वक्ष्यमाणत्वात्सुषुप्ते चाज्ञान एव संप्रतिष्ठानादेष हि द्रष्टेत्याद्यज्ञानप्रतिबिम्बस्य भोक्तुरपि संप्रतिष्ठाया अभिधास्यमानत्वादच्छायामित्यज्ञानाभावोक्तेश्च तुरीयमेव पृष्टमिति भावः । ननु कार्यकारणव्यतिरिक्ते संप्रतिष्ठानाधिकरणे सामान्येन कस्मिंश्चिदवगते कस्मिन्संप्रतिष्ठिता इति विशेषप्रश्नो घटते । न च तस्यावगतिरस्ति । न च संप्रतिष्ठानस्य साधिकरणत्वेन सामान्येनाधिकरणावगतिरस्तीति वाच्यम् । तत्तदुपादानानामेवाचेतनानां तदधिकरणत्वेन तदतिरिक्तस्य चेतनस्यासिद्धि(द्धे)रिति शङ्कते—नन्विति । दात्रं नाम सस्यादिलवनार्थः शस्त्रविशेषः । स्वात्मनीति । सोपादान इत्यर्थः । सुषुप्तपुरुषाणां करणानामिति । सुषुप्तपुरुषाणां यानि करणानि तेषामित्यर्थः । एष हि द्रष्टेत्यादिना पुरुषाणामप्येकीभावस्य वक्ष्यमाणत्वाद्वा पुरुषाणामित्युक्तम् । अस्मिन्पक्षे करणानां चेति चकारो द्रष्टव्यः । प्रष्टुः शङ्कायाः कुतः प्राप्तिरित्यन्वयः । संहतानां परार्थत्वेन व्याप्तत्वात्संहतत्वेन हेतुना परस्मिंश्चेतने सामान्येनावगते प्रष्टुर्विशेषप्रश्नो युक्त इत्याह—युक्तैव त्विति । स्वार्थानि संघातामिमान्यर्थानीत्यर्थः । आशङ्कानुरूप इति । मनसि विद्यमानाशङ्कानुरूपो वाचिकः प्रश्न इत्यर्थः । अत्र संप्रतिष्ठानविशिष्ट आत्मा न पृष्टः किंतु तदुपलक्षितः केवल आत्मा पृष्ट इति वाक्यतात्पर्यमाह—अत्र त्विति । भवन्तीत्यनन्तरं पृष्टमिति शेषः ॥ १ ॥

तस्मै स होवाच । यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकी भवन्ति । ताः पुनःपुनरुदयतः प्रचरन्त्येवं ह

१ च. 'तिष्ठोक्तिः । सं ।

वै तत्सर्वं परे देवे मनस्येकी भवति । तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नाऽऽनन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २ ॥

तस्मै स होवाचाऽऽचार्यः । शृणु हे गार्ग्य यत्त्वया पृष्टम् । यथा मरीचयो रश्मयोऽर्कस्याऽऽदित्यस्यास्तमदर्शनं गच्छतः सर्वा अशेषत एतस्मिंस्तेजोमण्डले तेजोराशिरूप एकी भवन्ति विवेकानर्हत्वमविशेषतां गच्छन्ति, मरीचयस्तस्यैवार्कस्य ताः पुनः पुनरुदयत उद्गच्छतः प्रचरन्ति विकीर्यन्ते । यथाऽयं दृष्टान्तः । एवं ह वै तत्सर्वं विषयेन्द्रियादिजातं परे प्रकृष्टे देवे द्योतनवति मनसि चक्षुरादिदेवानां मनस्तन्त्रत्वात्परो देवो मनस्तस्मिन्स्वप्नकाल एकी भवति, मण्डले मरीचिवदविशेषतां गच्छति जिजागरिषोश्च रश्मिवन्मण्डलान्मनस एव प्रचरन्ति(ति) स्वव्यापाराय प्रतिष्ठन्ते(ते) । यस्मात्स्वप्नकाले श्रोत्रादीनि शब्दाद्युपलब्धिकरणानि मनस्येकीभूतानीव करणव्यापारादुपरतानि तेन तस्मात्तर्हि तस्मिन्स्वापकाल एष देवदत्तादिलक्षणः पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नाऽऽनन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते लौकिकाः ॥ २ ॥

यत्त्वया पृष्टं तच्छृण्वित्यन्वयः । तस्यैवार्कस्य ता मरीचय इत्यन्वयः । विकीर्यन्त इति । दशदिक्षु क्षिप्यन्त इत्यर्थः । स्वप्नेऽपि चक्षुरादिव्यापारोपलब्धेरकीभावोऽसिद्ध इत्याशङ्क्य वासनामयेन्द्रियव्यापारेऽपि बाह्यशब्दादिश्रवणादिव्यापाराभावेन तं साधयितुं तेनेति वाक्यं व्याख्याति—यस्मादिति । श्रोत्रादीनामेकीभावो नाम स्वस्वव्यापारं विहाय मनस्तन्त्रतयाऽवस्थानमात्रं न तु मुख्यमकत्वं तेषां मनःप्रकृतिकत्वाभावेनाप्रकृतौ तदनुपपत्तेरित्यभिप्रेत्येवकारः प्रयुक्तः । नेयायत इति । इणो गत्यर्थस्य यङन्तस्य रूपमेतन्न गच्छतीत्यर्थः ॥ २ ॥

प्राणाग्नय एवैतस्मिन्पुरे जाग्रति । गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो, यद्वार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः ॥ ३ ॥

---

१ क. ग. घ. ङ. °विद्यै° । २ ख. घ. ङ. क्षिप्यन्त ।

सुप्तवत्सु श्रोत्रादिषु करणेष्वेतस्मिन्पुरे नवद्वारे देहे प्राणाग्नयः प्राणादिपञ्चवायवोऽग्नय इवाग्नयो जाग्रति । अग्निसामान्यं हि । गार्हपत्यो ह वा एषोऽपानः । कथमित्याह—यस्माद्गार्हपत्यादग्नेरग्निहोत्रकाल इतरोऽग्निराहवनीयः प्रणीयते प्रणयनात्प्रणीयतेऽस्मादिति प्रणयनो गार्हपत्योऽग्निः । तथा सुप्तस्यापानवृत्तेः प्रणीयत इव प्राणो मुखनासिकाभ्यां संचरत्यत आहवनीयस्थानीयः प्राणः । व्यानस्तु हृदयाद्दक्षिणसुषिरद्वारेण निर्गमाद्दक्षिणदिक्संबन्धादन्वाहार्यपचनो दक्षिणाग्निः ॥ ३ ॥

कानि स्वपन्तीत्यस्य प्रविषयाणि बाह्यकरणानि स्वपन्त्युपरमन्तेऽतस्तेषामेव जागरणं धर्म इत्युत्तरमुक्त्वा कानि जाग्रतीत्यस्योत्तरमाह—सुप्तवत्स्विति । प्राणानामग्नित्वं गौणमित्याह—अग्नय इवेति । अपानस्य गार्हपत्यत्वे यद्गार्हपत्यात्प्रणीयते प्रणयनादितीदं वाक्यं व्यवहितमपि हेतुत्वेन योजयति—यस्मादिति । प्रणयनादिति पदं गार्हपत्यविशेषणमित्याह—प्रणयनो गार्हपत्य इति । तत्सदृशमाहवनीयः प्राण इति वाक्यं सादृश्यमिध्यानपूर्वं व्याचष्टे—तथेति । गार्हपत्यत्वेनोक्तेऽपाने ऽन्तर्गच्छति सति बहिर्गच्छन्प्राणस्ततो निर्गच्छन्न इव (खिव) लक्ष्यत इति प्राण आहवनीय इत्यर्थः । परिशेषात्सिद्धं व्यानोऽन्वाहार्यपचन इति वाक्यमिदानीं व्याचष्टे—व्यानस्त्विति । छान्दोग्ये गायत्रीविद्यायां तस्य वा एतस्य हृदयस्य पञ्च देवसुषय इत्युपक्रम्याथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रमित्येनेन व्यानस्य दक्षिणसुषिता निर्गमनमुक्तमित्यस्यान्वाहार्यपचनत्वाद्दक्षिणदिक्संबन्धित्वं व्यानस्येति व्यानोऽन्वाहार्यपचन इत्यर्थः ॥ ३ ॥

> यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः । मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ४ ॥

अत्र च होताऽग्निहोत्रस्य यद्यस्मादुच्छ्वासनिःश्वासावग्निहोत्राहुती इव नित्यं द्वित्वसामान्यादेव त्वेतावाहुती समं साम्येन शरीरस्थितिभावाय नयति यो वायुरग्निस्थानीयोऽपि होता चाऽऽहुत्योर्नेतृत्वात् ।

---

१ क. ङ. °र्म ह्याह गा° । २ क. °ल इतराग्निहोत्रकाल इ° । ३ क. ख. °योऽग्निर्यथा त° । ४ ख. घ. °णीत । ५ ख. ग. घ. ङ. °क्षिणादि° । ६ क. ग. घ. तत्संबद्धमा° । ७ क. °सुषिरा इ° । ८ क. सुषिरः स । ९ क. °धिरतौ । १० ख. ग. घ. ङ. °व्यासोऽन्वा° ।

कोऽसौ स समानः । अतश्च विदुषः स्वापोऽप्यग्निहोत्रहवनमेव । तस्माद्विद्वान्नाकर्मीत्येवं मन्तव्य इत्यभिप्रायः । सर्वदा सर्वाणि भूतानि विचिन्वन्त्यपि स्वपत इति हि वाजसनेयके । अत्र हि जाग्रत्सु प्राणाग्निषूपसंहृत्य बाह्यकरणानि विषयांश्चाग्निहोत्रफलमिव स्वर्गं ब्रह्म जिगमिषुर्मनो ह वाव यजमानो जागर्ति यजमानवत्कार्यकरणेषु प्राधान्येन संव्यवहारात्स्वर्गमिव ब्रह्म प्रति प्रस्थितत्वाद्यजमानो मनः कल्प्यते । इष्टफलं यागफलमेवोदानो वायुः । उदाननिमित्तत्वादिष्टफलप्राप्तेः । कथम्, स उदानो मनआख्यं यजमानं स्वप्नवृत्तिरूपादपि मर्त्याद्व्याहरहः सुषुप्तिकाले स्वर्गमिव ब्रह्माक्षरं गमयति । अतो यागफलस्थानीय उदानः ॥४॥

अत्र चेति । अग्निहोत्रस्य होता होमस्य कर्ता, ऋत्विगुच्यत उत्तरवाक्येने(णे)ति शेषः । अत्रोच्छ्वासनिःश्वासयोराहुतित्वस्य पूर्वमसिद्धत्वेन सिद्धवन्निर्देशायोगात्स समान इति तच्छब्दानन्वयाच्च वाक्यत्रयं कृत्वाऽन्वयत्रयेण योजयति—यद्यस्मादिति । उच्छ्वासनिःश्वासावित्यनन्तरमाहुती इति पदं भाष्येऽध्याहृत्यैतावुच्छ्वासनिःश्वासावाहुती आहवनीयाधिकरणाग्निहोत्राहुती [इ]व द्वि(द्वि)त्व+साम्यादेवेत्येकोऽन्वयः । अनन्तरं भाष्ये तुशब्दश्चार्थे । श्रुतिगत इतिशब्दस्तस्मादित्यर्थे । यस्मादेतावाहुती यस्माच्चैतौ समं नयति शरीरस्थितिभावाय साम्येन नयति प्रवर्तयति यो वायुर्यथाऽग्निहोत्रे होमकर्ताऽऽहुतिद्वयमाहवनीयं प्रति समं नयति प्रापयति तद्वत्तस्मादाहुत्योर्नेतृत्वात्स वायुर्होतेति यच्छब्दहोतृशब्दाध्याहारेण द्वितीयोऽन्वयः । कोऽसौ वायुरिति तद्विशेषप्रश्ने स होता वायुः स समान इति तृतीयोऽन्वय इति विभागः । ननु प्राणाग्नय इत्यत्र सर्वेषां प्राणानामग्नित्वोक्तेः कथमिह समानस्य होतृत्वमुच्यत इत्याशङ्क्याह—अग्निस्थानीयोऽपीति । अग्नित्वेनोक्तोऽपीति भावः । होता चेति । चकारोऽवधारणे । होतैवेत्यर्थः । आहुतिनेतृत्वाद्धोतृत्वे स्थितेऽग्नित्वोक्तिरुच्छ्वासन्यायेनान्यनाग्नितमुदाये लाक्षणिकीत्यर्थः । अवस्थात्रयवर्तिनामुच्छ्वासनिःश्वासप्राणानां चाग्निहोत्रावयवत्वसंपादनस्य नोपासनं प्रयोजनं निर्विशेषात्मप्रकरणत्वात्तद्विध्यदर्शनाच्च । किंत्विन्द्रियाण्युपरमन्ते प्राणा जाग्रतीत्येवं त्वंपदार्थशोधनरूपस्य ज्ञानस्य स्तुतिरेवेत्याह—अतश्चेति । सर्वदेति । वाजसनेयके हि वाक्यिचतः प्राणश्चितश्चक्षुश्चित इत्यादिना सर्वप्राणव्यापारेषु प्रत्येकमग्निचितत्वदृष्टिं विधायैवंदृष्टिमतः सर्वाणि भूतान्यस्य स्वापकालेऽपि चयवं

+ अत्र सामान्यादिति युक्तं पठितुम् ।

---

१ ख. ग. घ. ङ. °पीत्यर्थः । हो° ।

कुर्वन्तीति सा दृष्टिः स्तुता तद्वदिहापीत्यर्थः । अत्र हीति । अत्र मनो यजमानः कल्प्यत इति व्यवहितान्वयः । तत्कल्पनायां हेतुद्वयमाह—यजमानवदिति । हेतुद्वयं साधयति—जाग्रत्स्विति । अत्र स्वप्नकाले विषयान्करणानि चोपसंहृत्य मनो जागर्ति प्राधान्येन स्वव्यापारं कुर्वद्वर्तते । अग्निहोत्रफलं स्वर्गं जिगमिषुर्यजमान इव सुषुप्तिकाले स्वर्गरूपब्रह्म जिगमिषु च मन इत्यन्वयः । भाष्ये यजमान इत्यनन्तरमिवशब्दो द्रष्टव्यः । ह वावशब्देन तत्प्रसिद्धमित्युक्तम् । इष्टेति । उदाननिमित्तकमरणानन्तरं यागादिफलप्राप्तेस्तस्य तन्निमित्तत्वात्कारणे कार्योपचारादुदान इष्टफलत्वेन कल्प्यत इत्यर्थः । न केवलं मरणद्वारा यागफलप्रापकत्वमुदानस्य किंत्वेतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः सर्वयागफलानामपि ब्रह्मात्मकत्वात्तद्ब्रह्मप्रापकत्वादपि । अहरहरिष्टफलप्रापकत्वमुदानस्येति प्रश्नपूर्वकमाह—कथमिति । स्वर्गमिवेति । स्वर्गमेवेत्यर्थः । सर्वयागफलात्मकस्वरूपमेव ब्रह्माक्षरं गमयतीत्यर्थः । यद्यप्यहरहर्ब्रह्मप्राप्तिर्न यागसाध्या यागरहितानामपि तत्प्राप्तेस्तथाऽपि ब्रह्मण एव सर्वयागफलत्वेन तत्प्रापकस्योदानस्येष्टफलप्रापकत्वमस्तीति भावः । नचोदानस्य कथं तत्प्रापकत्वमिति शङ्क्यम् । तस्य सुषुम्नानाडीचारित्वेन स मनस्तन्नाडीं प्रवेशयंस्तद्भूतं ब्रह्म प्रापयतीत्युपपत्तेः ॥ ४ ॥

एवं विदुषः श्रोत्राद्युपरमकालादारभ्य यावत्सुप्तोत्थितो भवति तावत्सर्वयागफलानुभव एव नाविदुषामिवानर्थायेति विद्वत्ता स्तूयते । न हि विदुष एव श्रोत्रादीनि स्वपन्ते प्राणाग्नयो वा जाग्रति जाग्रत्स्वप्नयोर्मनः स्वातन्त्र्यमनुभवदहरहः सुषुप्तं वा प्रतिपद्यते । समानं हि सर्वप्राणिनां पर्यायेण जाग्रत्स्वप्नसुषुप्तिगमनमतो विद्वत्तास्तुतिरेवेयमुपपद्यते ॥ यत्पृष्टं कतर एष देवः स्वप्नान्पश्यतीति तदाह—

अत्रैष देवः स्वप्ने महिमानमनुभवति । यद्दृष्टं दृष्टमनुपश्यति । श्रुतं श्रुतमेवार्थमनुशृणोति । देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति । दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति ॥ ५ ॥

अत्रोपरतेषु श्रोत्रादिषु देहरक्षायै जाग्रत्सु प्राणादिवायुषु प्रावसुषुप्तिमतिपत्तेः । एतस्मिन्नन्तराल एष देवोऽर्करश्मिवत्स्वात्मनि संहृतश्रोत्रादिकरणः स्वप्ने महिमानं विभूतिं विषयविषयिलक्षणमनेकात्मभावगमनमनुभवति प्रतिपद्यते ।

ननु गार्हपत्यो वा एषोऽपान इत्यारभ्य मनो ह वाव यजमान इत्यन्तेन ग्रन्थेन विद्वानकर्मी न भवतीति स्तूयत इत्युक्तमस्त्वेवं तत्राग्निहोत्रादिकर्मप्रतीतेरुदानस्य याग-फलस्थानीयत्वोक्तेस्तु न तत्फलत्वं तत्र कर्माप्रतीतेरत आह—एवं विदुष इति । विद्वत्तेति । श्रोत्रादीनि स्वप्न उपरमन्ते प्राणा एव जाग्रतीत्येवंरूपा विद्येत्यर्थः । अस्याश्च विद्याया जागरणं श्रोत्रादिबाह्येन्द्रियधर्मः शरीररक्षणं प्राणधर्मो नाऽऽत्म-धर्म इत्येवं त्वंपदार्थविवेकरूपत्वात्स्तोतव्यत्वोपपत्तिः । अत एव प्राणजागरणस्यादि-वद्[विद्व]त्साधारणत्वात्कथं विद्वत्तास्तुतिरित्यपि शङ्का निरस्ता । तस्यैवंभूतविवेकाभावा-दिति । ननु विद्याप्रकरणत्वादस्य विदुषः श्रोत्राद्युपरमादिकं सर्वं भवतीति विधीयतां किं स्तुत्येत्याशङ्क्य विद्वदविद्वत्साधारण्येन स्वयमेव भवतो न विधेयत्वमित्याह—न हीति । विद्वत्तास्तुतिरेवेति । श्रोत्रादिकं परे देवे मनस्येकी भवति प्राणाग्नयो जाग्रतीत्यत्र पदार्थविवेकरूपं ज्ञानं विवक्षितं तज्ज्ञानं गार्हपत्यो वा एषोऽपान इत्या-दिना स्तूयत उक्तप्रकारेणेत्यर्थः । तृतीयप्रश्नोत्तरत्वेन कतर एष इत्यादि सर्वः पश्यती-त्यन्तं व्याचष्टे—यदिति । कतर इति । अत्रेति श्रौतं पदं गृहीत्वा व्याचष्टे—उपरतेष्वित्यादिनाऽन्तराल इत्यन्तेन । अनेकेति । विषयिविषयाद्यनेकभावगम-नमित्यर्थः । इदं च महत्त्वव्याख्यानम् ।

ननु महिमानुभवने करणं मनोऽनुभवितुस्तत्कथं स्वातन्त्र्येणानुभ-वतीत्युच्यते स्वतन्त्रो हि क्षेत्रज्ञः । नैष दोषः । क्षेत्रज्ञस्य स्वातन्त्र्यस्य मनउपाधिकृतत्वान्न हि क्षेत्रज्ञः परमार्थतः स्वतः स्वपिति जागर्ति वा । मनउपाधिकृतमेव तस्य जागरणं स्वप्नश्चेत्युक्तं वाजसनेयके—"[1] सँधीः स्वप्नो भूत्वा ध्यायतीव लेलायतीव" इत्यादि । तस्मान्मनसो वि-भूत्यनुभवे स्वातन्त्र्यवचनं न्याय्यमेव । मनउपाधिसहितत्वे स्वप्नकाले क्षेत्रज्ञस्य स्वयंज्योतिष्ट्वं बाध्येतेति केचित् । तन्न । श्रुत्यर्थापरिज्ञान-कृता भ्रान्तिस्तेषाम् । यस्मात्स्वयंज्योतिष्ट्वादिव्यवहारोऽप्यामोक्षान्तः सर्वोऽविद्याविषय एव मनआद्युपाधिजनितः ।

स्वप्नद्रष्टुर्जीवस्य स्वातन्त्र्ये वक्तव्ये देवशब्दितमनसस्तदुक्तिः स्वप्नो मनोधर्मो नाऽऽ-त्मधर्म आत्मनि तु तदारोपमात्रं लोकस्येति ख्यापनार्थेति शङ्कापरिहारायाह—नन्विति । मनउपाधिकृतमिति । बाह्येन्द्रिययुक्तमनउपाधिकृतं जागरणं केवलमन-उपाधिकृतः स्वप्न इत्यर्थः । स्वप्नस्य धीशब्दवाच्यमनःपरिणामत्वात् । स्वप्नो भूतेतिश्रुतौ सामानाधिकरण्यनिर्देश इति द्रष्टव्यम् । नन्वियं श्रुतिर्विभूत्यनुभवे

---

१ क. इति श्रुतिमार° । २ क. इतिश्रुत्य° । ३ ख. ग. घ. ङ. हि भवति क्षेत्र° । ४ ख. घ. ङ. सधीर्ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेत्या° । ५ ग. श्रुत्यनुभवने म° । ६ च. °भवे म° ।

मनःस्वातन्त्र्यं वक्तुं न शक्नोति। श्रुत्यन्तरविरोधापत्तेः। अतोऽत्र देवशब्देन क्षेत्रज्ञ एवोच्यते तस्यैव स्वतः स्वातन्त्र्यमिति शङ्कते—मन इति। स्वयंज्योतिष्ट्वमिति। स्वयंज्योतिष्ट्वबोधकश्रुतिरित्यर्थः। अन्यथा द्वितीयसत्त्वेऽपि दीपादीनामिव वास्तवस्य तस्य बाधाभावादित्यत्र किं मनसः सत्त्वे ज्योतिरन्तरस्य मनसो विद्यमानत्वादात्मनः स्वयंज्योतिष्ट्वबोधनं न शक्यमिति श्रुतेः कार्यस्य बोधनस्य बाधोऽभिप्रेत, उत तद्बोधनरूपकार्यसिद्ध्यर्थं मनसोऽभावोऽपि विवक्षितः श्रुतौ। ततश्च तत्सत्त्वे श्रुत्यर्थबाध इति वा। नाऽऽद्यः। मनसि सत्यप्येवं तहींति वक्ष्यमाणरीत्या मनसो दृश्यत्वेन ज्योतिष्ट्वायोगेनाऽऽत्मन एव स्वयंज्योतिष्ट्वस्य बोधयितुं शक्यत्वादित्याह—तन्नेति। न द्वितीयः। तदानीं मनसोऽभावस्तु श्रुत्यर्थ एव न भवतीत्याह—श्रुत्यर्थेति। आत्मनि ज्योतिष्ट्वबोधनात्मकव्यवहारस्य प्रकाश्यादिसापेक्षत्वात्तस्मिन्सत्येव तद्बोधसाधने मनआदौ च सत्येव तद्बोधयितुं शक्यते नान्यथेति मनआद्यभावो न श्रुतौ विवक्षितः, तथा सति तद्बोधनाशक्तेरित्याह—यस्मादिति।

यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येन्मात्रासंसर्गस्त्वस्य भवति "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्यादिश्रुतिभ्यः। अतो मन्दब्रह्मविदामेवेयमाशङ्का न त्वेकात्मविदाम्। नन्वेवं सत्यत्रायं पुरुषः स्वयंज्योतिरिति विशेषणमनर्थकं भवत्यत्रोच्यते। अत्यल्पमिदमुच्यते। य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेत इत्यन्तर्हृदयपरिच्छेदे सुतरां स्वयंज्योतिष्ट्वं बाध्येत। सत्यमेवमयं दोषो यद्यपि स्यात्स्वप्ने केवलतया स्वयंज्योतिष्ट्वेनार्थं तावदपनीतं भारस्येति चेन्न। तत्रापि पुरीतति नाडीषु शेत इति श्रुतेः पुरीतति नाडीसंबन्धात्तत्रापि पुरुषस्य स्वयंज्योतिष्ट्वेनार्थभारापनयाभिप्रायो मृषैव। कथं तर्ह्यत्रायं पुरुषः स्वयंज्योतिरिति। अन्यशाखात्वादनपेक्षा सा श्रुतिरिति चेन्न। अर्थैकत्वस्येष्टत्वादेको ह्यात्मा सर्ववेदान्तानामर्थो विजिज्ञापयिषितो बुभुत्सितश्च। तस्माद्युक्ता स्वप्न आत्मनः स्वयंज्योतिष्ट्वोपपत्तिर्वक्तुम्। श्रुतेर्यथार्थतत्त्वप्रकाशकत्वात्। एवं तर्हि शृणु श्रुत्यर्थं, हित्वा सर्वमभिमानं, न त्वभिमानेन वर्षशतेनापि श्रुत्यर्थो ज्ञातुं शक्यते सर्वैः पण्डितंमन्यैः।

तत्र मानमाह—यत्र वेति। द्वितीयाभावे व्यवहारो नास्तीत्यत्रापि मानमाह—मात्रेति। दृश्यं मात्राशब्दार्थः। असंसर्ग इति च्छेदः। दृश्यासंसर्गे

---

१ क. च. °त्मना ज्यो°। २ ख. ग. घ. ङ. °च्छेदकारणे सु°। ३ खं. ग. घ. ङ. च. °रीतनाडी°। ४ ख. ग. घ. ङ. °न्धादत्रा°।

सुषुप्तौ विशेषविज्ञानाभावोक्त्या द्वितीयाभावे व्यवहारो नास्तीत्यर्थः । अतो न द्वितीयः कल्पः संभवतीत्याह—अत इति । ननु यदि स्वयंज्योतिष्ट्वबोधनार्थं मनआद्यभावो नापेक्षितो जागरितेऽपि तर्हि तद्बोधनसंभवादत्रेति स्वप्नवाचिविशेषणमनर्थकमिति शङ्कते—नन्विति । किं विशेषणबलान्मनसोऽभावः सिषाधयिषित उत विशेष[ण]स्य गतिमात्रं पृच्छ्यते । नाऽऽद्यः । मनसोऽभावाङ्गीकारेऽप्यन्तर्हृदयाकाशस्य तत्कृतपरिच्छेदस्य च श्रुतिसिद्धत्वेन त्वन्मतेऽपि तत्र स्वयंज्योतिष्ट्वबोधनासंभवाद्विशेषणानर्थक्यं तुल्यमित्याह—अत्रोच्यत इति । परिच्छेदोऽधिकोन्नत इति तरपः प्रयोगः । स्वयंज्योतिष्ट्वमिति । तद्बोधनमित्यर्थः । यथाश्रुते वास्तवस्य तस्य बाधस्यानाशङ्क्यत्वादिति । यद्यपि स्वप्नेऽन्तर्हृदयाकाशसत्त्वात्सम्यक्स्वयंज्योतिष्ट्वं बोधयितुं न शक्यमिति दोषस्तथाऽपि स्वप्ने मनसोऽभावेन तद्बोधनप्रतिबन्धकस्याभावाद्दूरविप्रकर्षेण स्वयंज्योतिष्ट्वं स्वप्ने बोधयितुं शक्यमिति तद्विशेषणमर्थवदिति शङ्कते—सत्यमिति । स्यादित्यनन्तरं तथाऽपीति शेषः । केवलतयेति । मनसोऽभावेनेत्यर्थः । भारस्येति । प्रतिबन्धकस्येत्यर्थः । शेषबोधनं तु सुषुप्ते भविष्यतीत्यभिप्रायः । एवं तर्हि सुषुप्ते सर्वस्याप्यभावमाश्रित्य सम्यग्बोधनं विवक्षणीयं न च तत्संभवति । तत्रापि बहुप्रतिबन्धकस्य विद्यमानत्वादित्याह—न । तत्रापीति । सुषुप्तेऽपीत्यर्थः । तत्रापीति । स्वप्नेऽपीत्यर्थः । सुषुप्ते चेत्सर्वभारापनयः स्यात्तदा स्वप्नेऽर्धभारापनयाभिप्रायो वर्णयितुं शक्यते न च तदस्ति । अतोऽत्रेति विशेषणं तदाऽप्यनर्थकमित्यर्थः । तर्हि विशेषणस्य गतिर्वक्तव्येति द्वितीयं शङ्कते—कथं तर्हीति । अत्रैष देवः स्वप्ने महिमानमनुभवतीत्यथर्वशाखावाक्यार्थकथनावसरे काण्वश्रुतिगतविशेषणस्य गतिर्न वक्तव्या प्रकृतानुपयोगादिति सिद्धान्त्येकदेशी कश्चिन्मन्दः शङ्कते—अन्येति । सर्ववेदान्तप्रत्ययन्यायेनाथर्वश्रुत्याविरोधेनैकवाक्यतया श्रुत्यर्थस्य वर्णनीयत्वात्तदविरोधोऽपि वक्तव्य इति पूर्ववाद्याह—नार्थैक्यस्येति । तर्हि काण्वश्रुतिरर्थाभावात्त्यज्यतामत आह—श्रुतेरर्थवत्त्वादिति । स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेरर्थावबोधफलकत्वात्तुल्यं च सांप्रदायिकमिति न्यायाच्चाक्षरमात्रस्याप्यानर्थक्यायोगादित्यर्थः । एवमेकदेशिनि दूषिते सिद्धान्त्युत्तरमाह—एवं तर्हीति ।

यथा हृदयाकाशे पुरीतति नाडीषु च स्वपतस्तत्संबन्धाभावात्ततो विविच्य दर्शयितुं शक्यत इत्यात्मनः स्वयंज्योतिष्ट्वं न बाध्यते । एवं मनस्यविद्याकामकर्मनिमित्तोद्भूतवासनावति कर्मनिमित्ता वासनाऽवि-

---

१ क. °कोऽत्रोच्यत इति तैरयं प्र° । ग. °कोच्यते सुतरामिति । च. °कोऽत्र इ° । २ ख. घ. ङ. °स्यार्थस्य भावाद्दूर° । ग. स्यार्थस्याभावाददूर° । ३ ग, घ. °र्थैः । अत्रा° । ४ ख, घ, ङ. °पस्य । ५ क. च. °द्धान्तैक° ।

यथाऽन्यद्वस्त्वन्तरमिव पश्यतः सर्वकार्यकरणेभ्यः प्रविविक्तस्य द्रष्टुर्वासनाभ्यो दृश्यरूपाभ्योऽन्यत्वेन स्वयंज्योतिष्ट्वं सुदर्पितेनापि तार्किकेण न वारयितुं शक्यते । तस्मात्साधूक्तं मनसि प्रलीनेषु करणेष्वप्रलीने च मनसि मनोमयः स्वप्नान्पश्यतीति ।

तर्ह्यादावेव मुख्यश्रुत्यर्थ उच्यतां किं पूर्वोक्तरीत्या पक्षान्तराशङ्कातन्निराकरणाभ्यामित्याशङ्क्य पाण्डित्याभिमानवतो यथावदर्थबोधेऽनधिकारात्तस्य तदभिमानावतारचिकीर्षया तदीयनानापक्षा निराकृता इति वक्तुं सर्वमभिमानं निरस्येत्याद्युक्तम् । स्वयंज्योतिष्ट्वश्रुतेरनतिशङ्क्यत्वात्तद्बलात्स्वप्नादौ हृदयाकाशादिसत्त्वेऽपि तत्संबन्धप्रतीत्यभावाद्विद्यमानस्याप्यविद्यमानतुल्यत्वेनाऽऽत्मनः केवलत्वात्प्रकाशदर्शनाच्च स्वयंज्योतिष्ट्वमिति बोधनीयं मनसोऽभाववादिनाऽप्येवं मनसि सत्यपि तस्य वासनामयगजतुरगादिविषयतया परिणामादृश्यत्वाच्च द्रष्टुस्ततो भेदेन विवेकतः श्रुत्या स्वप्रकाशत्वं बोध्यत इत्याह—यथेत्यादिना । मनसीति । सत्यपीति शेषः । ननु मनश्चेदविद्यानिमित्तवशाद्गजतुरगादिरूपेणाभिव्यक्तवासनावत्तर्हि जाग्रतीव तस्याहंतयैव प्रतीतिः स्यान्नेदंतयाऽत आह—कर्मनिमित्तेति । तथा प्रतीतिं विना स्वप्ने भोगासिद्धेः स्वप्नभोगप्रदकर्मनिमित्तवशाज्जाग्रति गजादीनामिदंतयाऽनुभवेन तद्वासनानामपि तथैवानुभवार्हत्वेन तद्वासनारूपाविद्यावशाच्च वासनाश्रयस्य मनस इदंतयैव वस्त्वन्तरवत्प्रतीतिरित्यर्थः । इदं च विशेषणं मनसो विषयत्वेन विषयत्वासंभवाद्विषयिण आत्मन एव प्रकाशरूपत्वमिति वक्तुम् । जाग्रत्यादित्यादिकार्यज्योतिषां चक्षुरादिकरणज्योतिषां च सत्त्वेन तत्संकीर्णत्वेनाऽऽत्मनः स्वयंज्योतिष्ट्वं दुर्बोधं स्वप्ने तु तदभावात्सुबोधमिति वक्तुं सर्वकार्येत्यादि विशेषणम् । स्वप्न आदित्यादिकार्यकरणज्योतिषां भासमानत्वेऽपि तेषां वासनामात्रत्व दृष्टदृश्यत्वाच्च विषयप्रकाशनासामर्थ्यमिति वक्तुं वासनाभ्य इत्यादि विशेषणम् । एतैश्च विशेषणैः स्वप्न एवंभूते स्वयंज्योतिष्ट्वस्य बोधयितुं शक्यत्वादन्यत्रासंभवादत्राय मिति श्रुतौ स्वप्नविशेषणग्रहणमर्थवदित्युक्तमिति द्रष्टव्यम् । स्वयंज्योतिष्ट्वमिति । सिद्धमिति शेषः । अतः काण्वश्रुतौ स्वप्ने मनसोऽभावविवक्षाकारणाभावेन तद्विरोधाभावादत्र देवशब्देन परे देवे मनस्येकी भवतीत्युक्तम् । मन एवोच्यत इत्युक्तमुपसंहरति—तस्मादिति ।

कथं महिमानमनुभवतीत्युच्यते । यन्मित्रं पुत्रादि वा पूर्वं दृष्टं तद्वासनावासितः पुत्रमित्रादिवासनासमुद्भूतं पुत्रं मित्रमिव वाऽ-

---

१ ख. ग. ङ. केन । २ ख. ग. घ. ङ. च. °श्यति । ३ क. च. °च स्वप्न° । ४ क. च इति वि° । ५ क. घ. °वंभूतस्व° ।

विद्यया पश्यतीत्येवं मन्यते, तथा श्रुतमर्थं तद्वासनयाऽनुशृणोतीव, देशदिगन्तरैश्च देशान्तरैर्दिगन्तरैश्च प्रत्यनुभूतं पुनः पुनस्तत्प्रत्यनुभवतीवाविद्यया, तथा दृष्टं चास्मिञ्जन्मन्यदृष्टं च जन्मान्तरदृष्टमित्यर्थः। अत्यन्तादृष्टे वासनानुपपत्तेः। एवं श्रुतं चाश्रुतं चानुभूतं चास्मिञ्जन्मनि केवलेन मनसाऽननुभूतं च मनसैव जन्मान्तरेऽनुभूतमित्यर्थः। सच्च परमार्थोदकादि । असच्च मरीच्युदकादि। किं बहुनोक्तानुक्तं सर्वं पश्यति सर्वः पश्यति सर्वमनोवासनोपाधिः सन्नेवं सर्वकरणात्मा मनोदेवः स्वप्नान्पश्यति ॥ ५ ॥

नन्विन्द्रियाणामुपरतत्वाद्विषयसंबन्धाभावात्कथं मनसा महिमानुभव इति शङ्कते—कथमिति। पूर्वं ज्ञातस्यैव स्वप्ने ज्ञानात्तस्य वासनामात्रत्वमतो नेन्द्रियापेक्षेत्याह—उच्यत इति। यदिति। यन्मित्रं पुत्रं वा पूर्वं दृष्टवांस्तदेव दृष्टं पुत्रमित्रादिविषयवासनासमुद्भूतं मित्रं पुत्रं वाऽविद्यया पश्यतीति दृष्टवानित्यादिपदाध्याहारेण वाक्यं योज्यम्। अन्यथा पुत्रमिति द्वितीयाया यच्छब्दस्य चानन्वयः स्यादिति। चक्षुरभावेन[3] दर्शनायोगान्मन्यत इत्युक्तम्। तथेति। अत्रापि योऽर्थः श्रुतस्तमेव श्रुतमर्थमित्यध्याहारेणैव श्रुतिर्योज्या। देशो नदीतीरादिः। दिक्प्राच्यादिरिति भावः। प्रत्यनुभूतं प्रतिवारमनुभूतं पुनः पुनरनेकदिनेष्वनेकस्वप्नेष्वनुभवतीत्यर्थः। जन्मान्तरदृष्टमिति व्याख्याने हेतुमाह—अत्यन्तेति। अनुभूतं चेत्यस्यैं प्रत्यनुभूतमित्यनेन पुनरुक्तिमाशङ्क्याऽऽह—केवलेनेति। पूर्वमिन्द्रियद्वारकानुभव उक्त इत्यपौनरुक्त्यमित्यर्थः। सर्वदर्शने हेतुमाह—सर्व इति ॥ ५ ॥

स यदा तेजसाऽभिभूतो भवति। अत्रैष देवः स्वमान्न पश्यत्यथ * तदैतस्मिञ्शरीर एतत्सुखं भवति ॥ ६ ॥

स यदा मनोरूपो देवो यस्मिन्काले सौरेण पित्ताख्येन तेजसा नाडीशयेन सर्वतोऽभिभूतो भवति तिरस्कृतवासनाद्वारो भवति तदा सह करणैर्मनसो रश्मयो हृद्युपसंहृता भवन्ति। यदा मनो दार्वग्निवद्विशेषविज्ञानरूपेण कृत्स्नं शरीरं व्याप्यावतिष्ठते तदा सुषुप्तो भवति।

---

* दीपिकायां यदेतस्मिन्निति पाठः स्वकृतोऽस्ति। स च मूलेऽपि क्वचिद्दृश्यते। अत्रापि स एव ग्राह्यश्चेदुक्ततरो मन्येत।

---

१ क. च. °त्रैव म°। २ ख. ग. घ. सर्वं म°। ङ. सर्वो म°। ३ क. च. °वे तद्दर्श°। ४ क. घ. भेदः। ५ क. च. °ख्य प्रत्ययस्य प्र°।

अत्रैतस्मिन्काल एष मनआख्यो देवः स्वप्नान्न पश्यति दर्शनद्वारस्य निरुद्धत्वात्तेजसा । अथ तदैतस्मिञ्शरीर एतत्सुखं भवति यद्विज्ञानं निराबाधमविशेषेण शरीरव्यापकं प्रसन्नं भवतीत्यर्थः ॥ ६ ॥

कस्यैतत्सुखं भवतीत्यस्योत्तरं तदपेक्षितं वदन्नाह—स यदेति । पित्तारव्येनेति । इदमुपलक्षणं चिद्रूपेण ब्रह्मणा चेत्यपि द्रष्टव्यम् । तन्मनः प्राणमेवोपश्रयत इति श्रुत्यन्तरेण प्राणशब्दिते ब्रह्मणि तस्य लयाभिधानात् । तिरस्कृतेति । वासनाभिव्यक्तौ द्वारं स्वप्नभोगप्रदं कर्म यत्तत्तिरस्कृतं तत्रोपरतं भवति । तेजःशब्दितब्रह्मचैतन्यसंबन्धादित्यर्थः । रश्मय इति । वासना इत्यर्थः । अविशेषविज्ञानेति । समान्यचैतन्यरूपेणेत्यर्थः । चेतनाशब्दितसामान्यवृत्तिरूपेण वा । अनेन सुषुप्तं उक्त इत्याह—तदेति । नन्वथैतत्सुखं भवतीत्ययुक्तं जन्यसुखस्य तदानीमसंभवात्स्वरूपसुखस्य पूर्वमपि समत्वेन तदा भवतीत्यनुपपत्तेरित्याशङ्क्य स्वरूपसुखमेव विशेषविज्ञानरूपविक्षेपाभावे निर्वातस्थदीपप्रभावत्सम्यक्प्रकाशते तदपेक्षमेतद्वचनमित्याह—यद्विज्ञानमिति । विज्ञानरूपं स्वरूपसुखमित्यर्थः ॥ ६ ॥

एतस्मिन्काले ऽविद्याकामकर्मनिबन्धनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेष्वात्मस्वरूपमुपाधिभिरन्यथा विभाव्यमानमद्वयमेकं शिवं शान्तं भवतीत्येतामेवावस्थां पृथिव्याद्यविद्याकृतमात्रानुप्रवेशेन दर्शयितुं दृष्टान्तमाह—

स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्ते ।
एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते ॥ ७ ॥

स दृष्टान्तो यथा येन प्रकारेण सोम्य प्रियदर्शन वयांसि पक्षिणो वासार्थं वृक्षं वासोवृक्षं प्रति संप्रतिष्ठन्ते गच्छन्ति । एवं यथा दृष्टान्तो ह वै तद्दृश्यमाणं सर्वं पर आत्मन्यक्षरे संप्रतिष्ठते ॥ ७ ॥

अनेनाऽऽनन्दमयकोशशब्दितमनभिव्यक्तमनआदिवासनावैदुष्यं सुषुप्तधर्मीत्युक्तं पञ्चमप्रश्नस्योत्तरं तुरीयस्वरूपं विवेकसौकर्यायद्विविच्यात्रैवोच्यत इत्याह—एतस्मिन्निति । अन्यथेति । पूर्वमन्यथा विभाव्यमानमित्यर्थः । मात्रानुप्रवेशेनेति । मात्राणां विवेकतोऽक्षरेऽनुप्रवेशेनेत्यर्थः ॥ ७ ॥

किं तत्सर्वम्—

पृथिवी च पृथिवीमात्रा चाऽऽपश्चाऽऽपोमात्रा

---

१ ख. ग. घ. ङ. °न्तरे प्रा° । २ क. °ब्दितं ब्रह्म चै° । ३ क. च. °सुप्तमित्या° । ४ क. ख. °मेव त° । ५ क. च. °वज्ज्ञानं सुषुप्तिध° ।

च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाऽऽकाशश्चाऽऽकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहंकारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥८॥

पृथिवी च स्थूला पञ्चगुणा तत्कारणा च पृथिवीमात्रा च गन्धतन्मात्रा । तथाऽऽपश्चाऽऽपोमात्रा च । तेजश्च तेजोमात्रा च। वायुश्च वायुमात्रा च । आकाशश्चाऽऽकाशमात्रा च । स्थूलानि च सूक्ष्माणि च भूतानीत्यर्थः । तथा चक्षुश्चेन्द्रियं रूपं च द्रष्टव्यं च । श्रोत्रं च श्रोतव्यं च । घ्राणं च घ्रातव्यं च । रसश्च रसयितव्यं च । त्वक्च स्पर्शयितव्यं च। वाक्च वक्तव्यं च। हस्तौ चाऽऽदातव्यं च। उपस्थश्चाऽऽनन्दयितव्यं च । पायुश्च विसर्जयितव्यं च । पादौ च गन्तव्यं च । बुद्धीन्द्रियाणि कर्मेन्द्रियाणि तथा *चोक्तानि। मनश्च पूर्वोक्तम् । मन्तव्यं च तद्विषयः। बुद्धिश्च निश्चयात्मिका। बोद्धव्यं च तद्विषयः । अहंकारश्चाभिमानलक्षणमन्तःकरणम् । अहंकर्तव्यं च तद्विषयः । चित्तं च चेतनावदन्तःकरणम्। चेतयितव्यं च तद्विषयः । तेजश्च त्वगिन्द्रियव्यतिरेकेण प्रकाशविशिष्टा या त्वक्तया निर्भास्यो विषयो विद्योतयितव्यम् । प्राणश्च सूत्रं यदाचक्षते तेन विधारयितव्यं संग्रथनीयं सर्वं हि कार्यकारणजातं पारार्थ्येन संहतं नामरूपात्मकमेतावदेव ॥ ८ ॥

× आपोमात्रा इत्यत्र विभक्त्यलोपश्छान्दसः । स्थूलानि चेति । पञ्चीकृतानि

---

* अत्रानुक्तसमुच्चयार्थेन तथा चेतिशब्दद्वयेन बुद्धीन्द्रियकर्मेन्द्रियार्था ग्राह्याः । क. पुस्तकपाठस्वीकारे तु न काचिदनुपपत्तिः । × सान्तापश्शब्दस्वीकरणमेव साधीयः ।

---

१ क. तदर्थाश्चोक्ताः । म° । २ ख. ग. घ. °तव्यः । प्रा° । ३ क. ग. च. °यैकर° ।

चेत्यर्थः । ततश्च पञ्चीकरणमेतच्छ्रुतिसिद्धमित्युक्तमन्यथाऽऽकाशाकाशमात्रयोः पृथगुक्त्यनुपपत्तेरिति । यद्यपि मन्तव्यादयो मनआदिचतुष्टयविषया अपि द्रष्टव्यादिविषया एव न पृथक्कथाऽपि मन्तव्यत्वादिरूपेण पृथगिति पृथङ्निर्दिष्टा इति द्रष्टव्यम् । प्रकाशविशिष्टा या त्वगिति । त्वगाश्रयं चर्म तत्प्रकाशनिर्भास्यं च तदेवेत्यर्थः । पृथिवी चेत्यादिना विधारयितव्यं चेत्यन्तेनाऽऽत्मव्यतिरिक्तं तदुपाधिभूतं सर्वं चोक्तमित्याह—सर्वं हीति ॥ ८ ॥

अतः परं यदात्मरूपं जलसूर्यकादिवद्भोक्तृत्वकर्तृत्वेनेहानुप्रविष्टम्—

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षर आत्मनि संप्रतिष्ठते ॥ ९ ॥

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा विज्ञानं विज्ञायतेऽनेनेति करणभूतं बुद्ध्यादीदं तु विजानातीति विज्ञानं कर्तृकारकरूपं तदात्मा तत्स्वभावो विज्ञातृस्वभाव इत्यर्थः । पुरुषः कार्यकरणसंघातोक्तोपाधिपूर्णत्वात्पुरुषः । स च जलसूर्यकादिप्रतिबिम्बस्य सूर्यादिप्रवेशवज्जगदाधारशेषे परेऽक्षर आत्मनि संप्रतिष्ठते ॥ ९ ॥

एष हि द्रष्टेत्यादिनोपहितस्वरूपमुच्यत इत्याह—अतः परमिति । द्रष्टेति । उपाधिकृतमपि द्रष्टृत्वादिकमुपाधिव्यतिरिक्तेऽनुपहित आत्मन्यारोपितं स्फटिके लौहित्यवदस्तीत्युपाधिभिन्नोऽप्यात्मा द्रष्टेत्यादिनोक्तः । विज्ञानात्मेत्यत्र द्रष्टेत्यादाविव कर्तृवाचकतृचोऽभावाद्विज्ञानं यज्ञं तनुत इत्यादाविव बुद्धेरभिधाने पौनरुक्त्यमाशङ्क्याऽऽह—विज्ञानमिति । करणभूतमिति । विज्ञानमय इत्यादावित्यर्थः । एष हीति हिशब्दश्चशब्दार्थकः । स च संप्रतिष्ठ(ष्ठ)त इति क्रियानुकर्षणार्थ इति वदन्द्रष्टुरात्मनः पृथिव्यादिवत्स्वरूपेणाक्षरे लयो न संभवतीत्याशङ्क्योपाधिलय उपहितरूपाभावमे(व ए)वास्य लय इत्याह—स चेति ॥ ९ ॥

तदेकत्वविदः फलमाह—

परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति । तदेष श्लोकः ॥ १० ॥

---

१. क. च. °न्तव्यादि° । २ क. जगत्कर्तृसू° । ३ क. °जलाद्याधारशेषे । ४ ग. °धारशे° ।

परमेवाक्षरं वक्ष्यमाणविशेषणं प्रतिपद्यत इत्येतदुच्यते स यो ह वै तत्सर्वैषणाविनिर्मुक्तोऽच्छायं तमोवर्जितम् । अशरीरं नामरूपसर्वोपाधिशरीरवर्जितम् । अलोहितं लोहितादिसर्वगुणवर्जितम् । यत एवमतः शुभ्रं शुद्धम् । सर्वविशेषणरहितत्वादक्षरम् । सत्यं पुरुषाख्यम् । अप्राणममनोगोचरम् । शिवं शान्तं सबाह्याभ्यन्तरमजं वेदयते विजानाति । यस्तु सर्वत्यागी सोम्य स सर्वज्ञो न तेनाविदित किंचित्संभवति । पूर्वमविद्ययाऽसर्वज्ञ आसीत्पुनर्विद्ययाऽविद्यापनये सर्वो भवति तदात-(तत्त)स्मिन्नर्थे एष श्लोको मन्त्रो भवत्युक्तार्थसंग्राहकः ॥ १० ॥

एवं जाग्रदादीनामन्यधर्मत्वोक्त्या शोधिततुर्यात्मानुवादेन तस्याक्षरैक्याभिधानपुरःसरं तज्ज्ञानस्य फलमुच्यत उत्तरवाक्येणेत्याह—तदेकत्वेति । वक्ष्यमाणलक्षणमक्षरं प्रतिपद्यत इत्येवंरूपं फलमाहेत्यन्वयः । उत्तरवाक्यमिति शेषः । उक्तमर्थं श्रुत्यक्षरारूढमाह—एतदुच्यत इति । स इत्यस्यार्थमाह—सर्वेति । अत्राधिकारिणो दुर्लभत्वं स यो ह वा इत्यनेनोक्तम् । स यः कश्चिदेवापूर्ववत्तदच्छायादिविशेषणमक्षरं वेदयत इत्येकं वाक्यं समापनीयम् । यस्तु वेदयते स सर्वज्ञ इति वाक्यान्तरं कार्यम् । अन्यथा यच्छब्दद्वयानन्वयात् । आद्यवाक्येऽच्छायादिविशेषणत्रयेण कारणसूक्ष्मस्थूलशरीरत्रयनिराकरणेनावस्थात्रयनिराकरणेनावस्थात्रयराहित्यमनूद्यते । लोहितादि-[सर्व]गुणवर्जितमित्यनेन तद्गुणकस्थूलशरीरवर्जितमिति प्रतीतेः । शुभ्रमित्यनेन तमेव तुरीयमनूद्य तस्याक्षरसामानाधिकरण्येनैक्यमुक्तमिति विवेकः । अत्राक्षरमित्यनेनाक्षरं पुरुषं वेद सत्यं सबाह्याभ्यन्तरो ह्यजोऽप्राणो ह्यमनाः शुभ्र इति मन्त्रोक्तानि सर्वाणि विशेषणान्यात्मोपलक्षणान्यात्मोपलक्षणार्थं संगृहीतानीत्याह—सत्यमित्यादिना । यस्तु सर्वत्यागीत्यत्रापि वाक्ये वेदयत इत्यस्यानुषङ्गः । अत्र सर्वज्ञ इत्यनेन कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रतिज्ञातं सर्वविज्ञानमुक्तम् । सर्वात्मत्वस्य ज्ञानजन्यत्वेऽनित्यत्वं स्यादत आह—पूर्वमिति । एवं चाऽऽरोपनिवृत्तिद्वाराऽभूततद्भावो विवक्षित इत्याह—सर्वो भवतीति ॥ १० ॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि
संप्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु
सोम्य स सर्वज्ञः सर्वमेवाऽऽविवेशेति ॥ ११ ॥

इत्यथर्ववेदीयप्रश्नोपनिषदि चतुर्थः प्रश्नः ॥ ४ ॥

विज्ञानात्मा सह देवैश्चाग्न्यादिभिः प्राणाश्चक्षुरादयो भूतानि पृथिव्यादीनि संप्रतिष्ठन्ति प्रविशन्ति यत्र यस्मिन्नक्षरे तदक्षरं वेदयते यस्तु सोम्य प्रियमदर्शनेन स सर्वज्ञः सर्वमेवाऽऽविवेशाऽऽविशतीत्यर्थः ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपाद-
शिष्यश्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये
चतुर्थः प्रश्नः ॥ ४ ॥

अग्न्यादिभिरिति । ततश्च चक्षुश्च द्रष्टव्यं चेत्यत्रापि चक्षुरादिभिर्देवा अप्युपलक्षिता इति व्याख्यातम् ॥ ११ ॥

इत्यानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां चतुर्थः प्रश्नः ॥ ४ ॥

अथ पञ्चमः प्रश्नः ।

—०—:⊙:—०—

अथ हैनं शैब्यः सत्यकामः पप्रच्छ ।

अथ हैनं शैब्यः सत्यकामः पप्रच्छ ।

एवं चतुर्थप्रश्नेनोत्तमाधिकारिणः पदार्थशोधनपूर्वकवाक्यार्थज्ञानेनाक्षरप्राप्तिमुक्त्वाऽन्यानधिकारिणो मन्दवैराग्यवत ओमित्येवं ध्यायत आत्मानं प्रणवो धनुरित्यादिमन्त्रसूचितं ब्रह्मलोकप्राप्तिद्वारा क्रमेणाक्षरप्राप्त्यर्थमोंकारोपासनं वक्तुं पञ्चमप्रश्नमवतारयति—अथ हैनमिति ।

अथेदानीं परापरब्रह्मप्राप्तिसाधनत्वेनोंकारस्योपासनविधित्सया प्रश्न आरभ्यते—

स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत । कतमं वाव स तेन लोकं जयतीति तस्मै स होवाच ॥ १ ॥

स यः कश्चिद्ध वै भगवन्मनुष्येषु मनुष्याणां मध्ये तदद्भुतमिव प्रायणान्तं मरणान्तं यावज्जीवमित्येतदोंकारमभिध्यायीताऽऽभिमुख्येन चिन्तयेत् । बाह्यविषयेभ्य उपसंहृतकरणः समाहितचित्तो भक्त्यावेशितब्रह्मभाव ओंकारे । आत्मप्रत्ययसंतानाविच्छेदो भिन्नजातीयप्रत्ययान्तराखिलीकृतो निर्वातस्थदीपशिखासमोऽभिध्यानशब्दार्थः । सत्यब्रह्मचर्याहिंसापरिग्रहत्यागसंन्यासशौचसंतोषामायावित्वाद्यनेकयमनिय-

---

१ क. °प्रश्नोक्तौ° ।

मानुगृहीतः स एवं यावज्जीवव्रतधारणः। कतमं वावानेके हि ज्ञानकर्मभिर्जेतव्या लोकास्तिष्ठन्ति तेषु तेनोंकाराभिध्यानेन कतमं स लोकं जयतीति पृष्टवते तस्मै स होवाच पिप्पलादः ॥ १ ॥

इदानीमिति । गार्ग्यप्रश्ननिर्णयानन्तरमित्यर्थः । परेति । अपरब्रह्मलोकप्राप्तिक्रमेण परब्रह्मलोकप्राप्तिसाधनत्वेनेत्यर्थः । तदद्भुतमिवेति । तादिति क्रियाशेषणं तादृशमभिध्यानमिति, तेन विशेषणेनाद्भुतत्वं दुष्करत्वं मातीत्यर्थः। अभिध्यानेन तत्पूर्वकालीने प्रत्यहारधारणे सूचिते इत्याह—बाह्येति । भक्त्याऽऽदरेणोपचारेण वाऽऽवेशित आरोपितो ब्रह्मभावो यस्मिन्नोंकारे तस्मिन्समाहितचित्त इत्यन्वयः । अनेन धारणोक्ता । ध्यानशब्दार्थमाह—आत्मेति । संतानाविच्छेद इत्यविच्छिन्नसंतान इत्यर्थः । प्रत्ययान्तरेण विजातीयप्रत्ययेनाखिलीकृतोऽनन्तरितः । चित्तस्याऽऽत्मविषयस्यैव सत एकदेशेन विक्षेपं वारयति—निर्वातेति । ध्यानेनैव यमादिसाधनजातमपि सूचितमित्याह—सत्येति । कतममिति ऽतमचोऽर्थं बहुषु निर्धारणं दर्शयति—अनेके हीति । ओंकाराभिध्यानं ध्यानत्वाद्हराद्युपासनवदपरप्राप्तिसाधनमेवोत परप्राप्तिसाधनमपीति प्रष्टुरभिप्रायः ॥ १ ॥

एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः।
तस्माद्विद्वानेतेनैवाऽऽयतनेनैकतरमन्वेति ॥ २ ॥

एतद्वै सत्यकाम। एतद्ब्रह्म वै परं चापरं च ब्रह्म परं सत्यमक्षरं पुरुषाख्यमपरं च प्राणाख्यं प्रथमजं यत्तदोंकार एवोंकारात्मकमोंकारप्रतीकत्वात् । परं हि ब्रह्म शब्दाद्युपलक्षणानर्हं सर्वधर्मविशेषवर्जितमतो न शक्यमतीन्द्रियगोचरत्वात्केवलेन मनसाऽवगाहितुमोंकारे तु विष्ण्वादिप्रतिमास्थानीये भक्त्यावेशितब्रह्मभावे ध्यायिनां तत्प्रसीदतीत्यवगम्यते शास्त्रप्रामाण्यात्तथाऽपरं च ब्रह्म । तस्मात्परं चापरं च ब्रह्म यदोंकार इत्युपचर्यते । तस्मादेवं विद्वानेतेनैवाऽऽत्मप्राप्तिसाधनेनैवोंकाराभिध्यानेनैकतरं परमपरं वाऽऽन्वेति ब्रह्मानुगच्छति नेदिष्ठं ह्यालम्बनमोंकारो ब्रह्मणः ॥ २ ॥

तदभिप्रायज्ञः पिप्पलादोऽपरालम्बनतया ध्यानं चेदपरप्राप्तिमात्रसाधनं परालम्बनत्वेन चेत्क्रमेण परप्राप्तिसाधनमित्युत्तरमाह—एतद्वा इति । एतद्यच्छब्दयोर्नपुंसकयोरोंकारविशेषणत्वाद्योगाद्ब्रह्मविशेषणत्वमाह—एतद्ब्रह्मेति । किं तद्ब्रह्मेत्यत आह—परं चेति ।

---

१ क. च. °देशवि° । २ ख. ग. घ. ङ. °गाहयितुं° । ३ ख. ग. घ. ङ. इत्युच्यते ।

यदेतत्परं चापरं च ब्रह्मास्ति तदुभयमोंकार इति वाक्यान्वय इत्यर्थः । न चैवं ब्रह्मोद्देशेनोंकारत्वविधाने ब्रह्मण्योंकारदृष्टिः प्रसज्येतेति शङ्क्यम् । ब्रह्मदृष्टिरुत्कर्षादिति न्यायेन लोकेषु सामोपासीतेत्यादाविव निकृष्ट ओंकार एव ब्रह्मदृष्टिः सिध्यतीति भावः । तयोर्भेदात्कथमैक्यमित्याशङ्क्योपचारादित्याह—ओंकारप्रतीकत्वादिति । अनेन सामानाधिकरण्येनोंकारस्य प्रतीकत्वमुपदिश्यत इति भावः । ननु किं प्रतीकोपदेशेन साक्षादेव ब्रह्माभिधीयतामत आह—परं हीति । शब्दादीति । शब्दादिभिः साक्षाद्बोधनानर्हमित्यर्थः । आदिशब्देनानुमानादि गृह्यते । प्रवृत्तिनिमित्तस्य धर्मस्य लिङ्गस्य चाभावादिति तत्र हेतुमाह—सर्वेति । न शक्यमित्य(म)वर्गाहितुमित्यन्वयः । तर्हीन्द्रियैर्मनसा वा तद्ग्रहोऽस्त्वित्यत आह—अतीन्द्रियेति । मनसेतीन्द्रियैर्वेत्यपि द्रष्टव्यम् । तर्हि तथाविधस्योंकारेऽप्यावेशासंभवात्किंचिद्विशेषमारोप्याऽऽवेशो वक्तव्यः । अत एव सूर्यान्तर्गतत्वं विशेषं वक्ष्यत्योंकारतादात्म्यं च । तत्कथं निर्विशेष[त्व]लाभोऽत आह—ओंकारे त्विति । प्रसीदतीति । तदुपासनेन चित्तस्य नैर्मल्ये सति निर्विशेषं स्वयमेव प्रकाशत इत्यर्थः । तत्र मानमाह—शास्त्रेति । अन्यथा परब्रह्मार्थिनस्तदुक्तिवैयर्थ्यादित्यर्थः । तथाऽपरं चेति । प्रसीदतीत्यन्वयः । तस्मादिति । प्रतीकत्वादित्यर्थः । तस्मादेवं विद्वानिति । ब्रह्मत्वाद्ब्रह्मत्वार्हमिति विद्वानित्यर्थः । एतेनैवेत्यनन्तरमायतनेनाऽऽलम्बनेनेति पदद्वयं प्रमादतो गलितमिति द्रष्टव्यम् । तस्य पदस्य पिण्डितार्थमाह—ओंकारेति । न त्वेतच्छब्दार्थकथनमेतदिति द्रष्टव्यम् । अभिध्यानस्याऽऽयतनत्वाभावादितीतरोपासनावदस्याप्युपासनत्वात्परप्रापकत्वं न संभवतीत्यत आह—नेदिष्ठमिति । मनआद्यपेक्षयेदं नेदिष्ठं समीपवर्त्यन्तरङ्गं श्रेष्ठमालम्बनमेतदालम्बनं श्रेष्ठमेतदालम्बनं परमित्यादिश्रुतेरित्यर्थः ॥ २ ॥

स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते । तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति ॥ ३ ॥

स यद्यप्योंकारस्य सकलमात्राविभागज्ञो न भवति तथाऽप्योंकाराभिध्यानप्रभावाद्विशिष्टामेव गतिं गच्छति । एतदेकदेशज्ञानवैगुण्यतयोंकारशरणः कर्मज्ञानोभयभ्रष्टो न दुर्गतिं गच्छति किं तर्हि यद्यप्येवमोंकारमेवैकमात्राविभागज्ञ एव केवलोऽभिध्यायीतैकमात्रं सदा ध्यायीत स

---

१ क. °क्तत्वाभा° । २ ख. ग. घ. ङ. °गाहयितुं° । ३ क. च. °त्वार्हत्वाङ्° । ४ घ. °त्वादर्हं° । ५ क. च. °मेक° ।

तेनैवैकमात्राविशिष्टोंकाराभिध्यानेनैव संवेदितः संबोधितस्तूर्णं क्षिप्रमेव जगत्यां पृथिव्यामभिसंपद्यते । किं, मनुष्यलोकम् । अनेकानि हि जन्मानि जगत्यां संभवन्ति तत्र तं साधकं जगत्यां मनुष्यलोकमेवर्चः उपनयन्त उपनिगमयन्ति । ऋच ऋग्वेदरूपा ह्योंकारस्य प्रथमैकमात्राऽभिध्याता । तेन स तत्र मनुष्यजन्मनि द्विजाग्र्यः संस्तपसा ब्रह्मचर्येण श्रद्धया च संपन्नो महिमानं विभूतिमनुभवति न वीतश्रद्धो यथेष्टचेष्टो भवति योगभ्रष्टः कदाचिदपि न दुर्गतिं गच्छति ॥ ३ ॥

नेदिष्टत्वमेव संस्तुवन्नुत्तरवाक्येन साधयति—स यदीति । विकलस्यापि फलजनकत्वान्नेदिष्टत्वमित्यर्थः । सकलेति । अकारादिमात्रात्रयात्मक ओंकारः स चोपासितव्य इति न जानाति किंत्वकारमात्रमुपासितव्यं जानातीत्यर्थः । तथाऽप्येकदेशज्ञानवैगुण्यतया दुर्गतिं न गच्छति किं तह्योंकाराभिध्यानप्रभावात्तदेकदेशध्यानप्रभावाद्विशिष्टामेव गतिं गच्छतीत्यन्वयः । तात्पर्यार्थमुक्त्वेदानीमक्षरार्थमाह—यद्यप्येवमिति । यदिशब्दो यद्यपीत्यर्थे व्याख्यातः । एवं च स तेनैवेत्यतः प्राक्तथाऽपीति पदं द्रष्टव्यम् । एकमात्रमिति । एकमात्रात्मकमोंकारमकारमित्यर्थः । एकमात्राविशिष्टेत्यत्राप्येकमात्रात्वविशिष्टेत्यर्थः । ओंकारेति । तदवयवेत्यर्थः । एकमात्राप्रधानमप्रधानीभूतमात्राद्वयं कृत्स्नमोंकारमिति केचिद्व्याचक्षते । दीपिकायां वाचस्पत्ये चाकारमात्रमित्येव व्याख्यातम् । संबोधित इति । तन्मात्राध्यानेन तन्मात्रासाक्षात्कारवानित्यर्थः । पृथिव्यां किमभिसंपद्यत इति कर्माऽऽकाङ्क्षते—किमिति । मनुष्यलोकमिति पदमिहाऽऽकृष्याऽऽकाङ्क्षां पूरयति—मनुष्यलोकमिति । मनुष्यशरीरमित्यर्थः । पृथिव्यां मनुष्यलोकस्यैव नियमात्तदुक्तिवैयर्थ्यमत आह—अनेकानि हीति । पश्वादीनि हीत्यर्थः । तर्हि तस्य नियमेन कथं मनुष्यत्वप्राप्तिरत आह—तत्र तमिति । ऋग्वेदरूपा हीति । पृथिव्यकारः स ऋग्वेद इति श्रुतेरकारस्य तद्रूपत्वमित्यर्थः । अभिध्याताऽकाररूपा मात्रा ऋग्वेदरूपेत्यन्वयः । तेनेति । येनर्ग्वेदरूपत्वं तस्य तेनर्चो मनुष्यलोकमुपनयन्त इत्यर्थः । वीतश्रद्ध इति । श्रद्धाविरहितः सन्नित्यर्थः । योगभ्रष्ट इति । एकदेशज्ञानविकल इत्यर्थः । अनेन न हि कल्याणकृत्कश्चिदिति गीतावाक्यसंवादः सूचितः ॥ ३ ॥

अथ यदि द्विमात्रेण मनसि संपद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम् । स सोमलोके विभूतिमनुभूय पुनरावर्तते ॥ ४ ॥

अथ पुनर्यदि द्विमात्राविभागज्ञो द्विमात्रेण विशिष्टमोंकारमभिध्यायीत स्वप्नात्मके मनसि मननीये यजुर्मये सोमदेवत्ये संपद्यत एकाग्रतयाऽऽत्मभावं गच्छति । स एवं संपन्नो मृतोऽन्तरिक्षमन्तरिक्षाधारं द्वितीयमात्मारूपं द्वितीयमात्मारूपैरेव यजुर्भिरुन्नीयते सोमलोकं सौम्यं जन्म प्रापयन्ति तं यजूंषीत्यर्थः । स तत्र विभूतिमनुभूय सोमलोके मनुष्यलोकं प्रति पुनरावर्तते ॥ ४ ॥

द्विमात्रेण विशिष्टमिति । द्वितीयमात्रत्वेन विशिष्टमोंकारं तद्गतमुकारमित्यर्थः । न तु मात्राद्वयमकारस्य पूर्वमेवोक्तत्वादत एव द्वितीयमात्मारूपमिति वक्ष्यति । श्रुतौ तृतीया द्वितीयार्थे, ओंकारमभिध्यायीतेत्युपक्रमादिति भावः । अत्राभिध्यानं तादात्म्याभिमानपर्यन्तमिति वक्तुं मनसि संपद्यत इति वाक्यं तत्र साक्षान्मनःसंपत्तेः । साधनत्वेन वा फलत्वेन वाऽनन्वयान्मनःशब्देन तत्परिणामस्वप्नादिलक्षणद्वारा स्वप्नयजुराद्यात्मत्वेन श्रुत्यन्तरे श्रुतोंकार एव लक्ष्यत इत्याह—स्वप्नात्मक इति । उकारे संपत्तिपर्यन्तमभिध्यानं यः करोतीति वाक्यार्थ इत्यर्थः । अत्र केचित्स यदीत्यादिर्यः पुनरित्यन्तं न स्तुतिः किंतूक्तफलायाकारे विश्वाभिन्नविराडुपासनमुकारे तैजसाभिन्नहिरण्यगर्भोपासनं च विवक्षितमित्याहुः । तन्मते मनःशब्देनाण्डपरिणामस्वप्नाभिमानी हिरण्यगर्भ उच्यत इति वक्तुं स्वप्नात्मक इत्यादिविशेषणानीति बोध्यम् । दीपिकायां तु मात्राद्वयस्य मिलितस्योपासनं मनसि संपत्तिश्च मनसैकाग्रतया चिन्तनमिति च व्याख्यातम् ॥ ४ ॥

यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः । यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते तदेतौ श्लोकौ भवतः ॥ ५ ॥

यः पुनरेतमोंकारं त्रिमात्रेण त्रिमात्राविषयविज्ञानविशिष्टेनोमित्येतेनैवाक्षरेण परं सूर्यान्तर्गतं पुरुषं प्रतीकेनाभिध्यायीत तेनाभिध्यानेन प्रतीकत्वेन ह्यालम्बनत्वं प्रकृतमोंकारस्य परं चापरं च ब्रह्मेत्यभेदश्रुतेरोंकारमिति च द्वितीयाऽनेकशः श्रुता बाध्येतान्यथा यद्यपि तृतीयाभि-

१ क. ख. ङ. °यरू° । २ ख. ग. ङ. °रेनं त्रि° । ३ ख. घ. ङ. °रेनमो° । ४ ख. ग. घ, ङ. °श्रुत्योंका° ।

धानत्वेन करणत्वमुपपद्यते तथाऽपि प्रकृतानुरोधाच्चिन्मात्रं परं पुरुषमिति द्वितीयैव परिणेया त्यजेदेकं कुलस्यार्थ इति न्यायेन, स तृतीयमात्रारूपस्तेजसि सूर्ये संपन्नो भवति ध्यायमानो मृतोऽपि सूर्यात्सोमलोकादिवन्न पुनरावर्तते किंतु सूर्ये संपन्नमात्र एव । यथा पादोदरः सर्पस्त्वचा विनिर्मुच्यते जीर्णत्वग्विनिर्मुक्तः स पुनर्नवो भवति । एवं ह वा एष यथा दृष्टान्तः स पाप्मना सर्पत्वक्स्थानीयेनाशुद्धिरूपेण विनिर्मुक्तः सामभिस्तृतीयमात्रारूपैरूर्ध्वमुन्नीयते ब्रह्मलोकं हिरण्यगर्भस्य ब्रह्मणो लोकं सत्याख्यम् । स हिरण्यगर्भः सर्वेषां संसारिणां जीवानामात्मभूतः । स ह्यन्तरात्मा लिङ्गरूपेण सर्वभूतानां तस्मिन्हि लिङ्गात्मनि संहताः सर्वे जीवाः । तस्मात्स जीवघनः । स विद्वांस्त्रिमात्रोंकाराभिज्ञ एतस्माज्जीवघनाद्धिरण्यगर्भात्परात्परं परमात्माख्यं पुरुषमीक्षते पुरिशयं सर्वशरीरानुप्रविष्टं पश्यति ध्यायमानः । तदेतस्मिन्यथोक्तार्थप्रकाशकौ मन्त्रौ भवतः ॥ ५ ॥

एवमोंकारं स्तुत्वा तदुपासनं परब्रह्मविषयं विधत्ते—यः पुनरिति । विज्ञानविशिष्टेनेति । विज्ञानविषयीकृतेनेत्यर्थः । मात्रात्रयात्मैकज्ञानेनेति यावत् । पूर्ववदत्रापि त्रिमात्रेणेत्यत्र तृतीया मात्रा मकार उच्यत इति भ्रमं वारयितुमोमित्येतेनेवाक्षरेणेत्युक्तम् । पूर्वत्र तत्तन्मात्राप्रधानेन ओंकार एवोच्यत इति मत इहैवेदं विशेषणमनुपपन्नं पूर्वत्राप्योंकारस्यैवोक्तत्वादिति तन्मतमनुपपन्नमिव भातीति त्रिमात्रेणेति तृतीयाश्रवणादोंकारो न प्रतीकम् । तथा सति विषयत्वेन कर्मतया द्वितीया स्यादित्यभिध्यायकत्वेन करणत्वमेव तृतीयाबलादिति भ्रमं वारयति—प्रतीकेनेति । तस्य कर्मत्वेऽपि कारकत्वेनाभिध्यानक्रियानिर्वर्तकत्वेन हेतुत्वात्तन्मात्रविवक्षया तृतीयोपपद्यत इत्यर्थः । एवं व्याख्याने हेतुमाह—प्रतीकत्वेनेति । अभेदेति । प्रतीकत्वे ह्यधिष्ठानाध्यस्यमानयोस्तादात्म्यारोपादभेदश्रवणमुपपद्यते करणत्वे तु न तदुपपद्यत इत्यर्थः । अनेकश इति । ओंकारमभिध्यायीत स यद्येकमात्रमभिध्यायीतेति द्विवारं श्रुतेत्यर्थः । अन्यथेत्यस्य बाध्येतेत्यनेनान्वयः । अथ यदि द्विमात्रेण यः पुनरेतं त्रिमात्रेणेति च तृतीयाऽपि द्विवारं श्रुता हेतुत्वापेक्षया करणत्वेन स्वरसाच्च कारकविभक्तित्वात्ततस्तस्या अपि बाधो न युक्त इति शङ्कते—यद्यपीति । द्वितीयाद्वयस्यापि कर्मत्वे स्वारस्यादुपक्रमस्थत्वाच्च तस्यैव प्राबल्यमित्याह—तथाऽपीति । प्रकृतेति । प्रक्रमानुरोधादित्यर्थः । किंच द्वितीयाद्वयमुक्त्वा(क्त्वाऽ?)भेदश्रुतिः ।

---

१ ख. ग. घ. ङ. च. °रूपे तेज°। २ क. ख. ङ. सूर्यसं°। ३ ख. ग. घ. ङ. °त्वविमुक्तः। ४ ख. °त्मज्ञातेने° । ग. °त्मना ज्ञातेने°। घ. ङ. °त्मज्ञा°। ५ क. °धानोंका°। ६ च. °साच्च का°।

एतेनैवाऽऽयतनेनैकतरमन्वेति । आयतनेनैवान्वेतीत्यालम्बनवाच्यायतनश्रुतिद्वयं चेति बहुश्रुत्यनुरोधेन तृतीयाद्वयं त्याज्यमित्याह—त्यजेदेकमिति । तृतीयमात्रारूप इति । यद्यपि मात्रात्रयध्यानान्मात्रात्रयरूपित्वमेव तस्य तथाऽपि तृतीयमात्राया एवेहासाधारण्यात्तत्प्राधान्येन निर्देश इति बोध्यम् । तृतीयमात्रारूप इति सप्तम्यन्तपाठे तत्सूर्यविशेषणं मकारस्याऽऽदित्यात्मकत्वादिति । हिरण्यगर्भस्य जीवघनत्वमनागतावेक्षणन्यायेनोपपादयति—स हिरण्यगर्भ इति । लिङ्गरूपेणेति । समष्टिलिङ्गरूपेणेत्यर्थः । तस्मिन्हीति । समष्टिलिङ्गात्मनि हिरण्यगर्भे व्यष्टिलिङ्गाभिमानिनः सर्वे जीवा गोत्वसामान्ये खण्डमुण्डादय इव संहता इत्यर्थः । इदानीं वाक्यं योजयति—स विद्वानिति । स विद्वानिदानीं ध्यायमानः पश्चाद्ब्रह्मलोकं प्राप्तः । तत्र ब्रह्मलोके स्थावरजङ्गमेभ्यः पराञ्जीवघनात्परं पुरुषं पश्यति ततो मुक्तो भवतीत्यन्वयः ॥ ९ ॥

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ॥ ६ ॥

तिस्रस्तिसंख्याका अकारोकारमकाराख्या ओंकारस्य मात्राः । मृत्युमत्यः, मृत्युर्यासां विद्यते ता मृत्युमत्यो मृत्युगोचरादनतिक्रान्ता मृत्युगोचरा एवेत्यर्थः । ता आत्मनो ध्यानक्रियासु प्रयुक्ताः । किंचान्योन्यसक्ता इतरेतरसंबद्धाः । अनविप्रयुक्ता विशेषेणैकैकविषय एव प्रयुक्ता विप्रयुक्ताः । न तथा विप्रयुक्ता अविप्रयुक्ता नाविप्रयुक्ता अनविप्रयुक्ताः किं तार्हि विशेषेणैकस्मिन्ध्यानकाले तिसृषु क्रियासु बाह्याभ्यन्तरमध्यमासु जाग्रत्स्वप्नसुषुप्तस्थानपुरुषाभिध्यानलक्षणासु योगाक्रियासु सम्यक्प्रयुक्तासु सम्यग्ध्यानकाले प्रयोजितासु न कम्पते न चलति ज्ञो योगी यथोक्तविभागज्ञ ओंकारस्येत्यर्थः । न तस्यैवंविदश्चलनमुपपद्यते । यस्माज्जाग्रत्स्वप्नसुषुप्तपुरुषाः सह स्थानैर्मात्रात्रयरूपेणोंकारात्मरूपेण दृष्टाः स ह्येवं विद्वान्सर्वात्मभूत ओंकारमयः कुतो वा चलेत्कस्मिन्वा ॥ ६ ॥

तत्र यः पुनरेतमित्यादिनोक्तेऽर्थे आद्यं मन्त्रं योजयति—तिस्र इति । मृत्युगोचरा इति । प्रत्येकं ब्रह्मदृष्टिं च विना तदुपासकानां मृत्व्वनतिक्रमादित्यर्थः । ब्रह्मदृष्ट्या संश्लिष्टत्वेन च संभूय च प्रयुक्ताश्चेन्नायं दोष इत्याह—किंचेति । जाग्रदिति । जाग्रत्पुरुषो वैश्वानराभिन्नो विश्वस्तत्स्थानं स्थूलशरीरं जागरितं च । स्वप्नपुरुषस्तु हिरण्यगर्भाभिन्नस्तैजसस्तत्स्थानं लिङ्गशरीरं स्वप्नश्च । सुषुप्तावीश्वरात्मा प्राज्ञस्तत्स्थानमव्या-

५ ख. ग. घ. ङ. च. °सुप्तोऽपीश्व° ।

कृतं सुषुप्तिश्च । तेषामकारादितादात्म्येन यदभिध्यानं तल्लक्षणासु योगक्रियासु प्रयुक्तास्वन्योन्यसक्ता अनविप्रयुक्तास्तिस्रो मात्राः प्रयुक्ताश्चेन्न कम्पत इत्यन्वयः । अनेन सर्वात्मके परब्रह्मणीश्वर ओंकाराभेदेन ध्यानमुक्तम् । यथोक्तेति । तिस्रो मात्रा इति श्लोकोक्तविभाग इत्यर्थः । कुतो वेति । चलनं विक्षेपः स्वस्य सर्वात्मत्वेन स्वव्यतिरिक्ताभावाच्चलनं न संभवतीति कुतो हेतोः कस्मिन्वा विषये चलेदित्यर्थः ॥ ६ ॥

सर्वार्थसंग्रहार्थो द्वितीयो मन्त्रः—

ऋग्भिरेतं यजुर्भिरन्तरिक्षं * सामभिर्यत्तत्कवयो
वेदयन्ते । तमोंकारेणैवाऽऽयतनेनान्वेति विद्वा-
न्यत्तच्छान्तमजरममृतमभयं परं चेति ॥ ७ ॥
इत्यथर्ववेदीयप्रश्नोपनिषदि पञ्चमः प्रश्नः ॥ ५ ॥

ऋग्भिरेतं लोकं मनुष्योपलक्षितम् । यजुर्भिरन्तरिक्षं सोमाधिष्ठितम् । सामभिर्यत्तद्ब्रह्मलोकमिति तृतीयं कवयो मेधाविनो विद्यावन्त एव नाविद्वांसो वेदयन्ते । तं त्रिविधं लोकमोंकारेण साधनेनापरब्रह्मलक्षणमन्वेत्यनुगच्छति विद्वान् । तेनैवोंकारेण यत्तत्परं ब्रह्माक्षरं सत्यं पुरुषाख्यं शान्तं विमुक्तं जाग्रत्स्वप्नसुषुप्त्यादिविशेषसर्वमपञ्चविवर्जितमत एवाजरं जरावर्जितममृतं मृत्युवर्जितमत एव यस्माज्जराविक्रियारहितमतोऽभयम् । यस्मादेवाभयं तस्मात्परं निरतिशयम् । तदप्योंकारेणाऽऽयतनेन गमनसाधनेनान्वेतीत्यर्थः । इतिशब्दो वाक्यपरिसमाप्त्यर्थः ॥७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-
श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये
पञ्चमः प्रश्नः ॥ ५ ॥

अपरब्रह्मप्राप्त्यर्थं य ओंकारः प्रयुक्तस्तेनैव न पृथक्प्रयुक्तः परमपि प्राप्नोति ब्रह्मलोक उत्पन्ननिर्विशेषब्रह्मसाक्षात्कारेणोत्कर्षोंकारस्य क्रममुक्तिफलत्वादित्याह—तेनैवेति । येनापरमन्वेति तेनैव परमप्यन्वेतीत्येवकारार्थ इत्यर्थः । तदप्योंकारेणेत्यायतनविशेषणार्थं पुनरोंकारग्रहणमिति न पुनरुक्तिरिति बोध्यम् ॥ ७ ॥

इति श्रीमदानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां पञ्चमः प्रश्नः ॥ ५ ॥

× एतदग्रे स इति पदं क्वचिन्मूलेऽधिकं तच्च भाष्ये दीपिकायां च नोपलभ्यते ।

---

१ क. तत्तत्सूक्ष्मलक्ष° । २ क. च. यादिर° ।

अथ षष्ठः प्रश्नः ।

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ ।

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ, समस्तं जगत्कार्यकारणलक्षणं सह विज्ञानात्मना परस्मिन्नक्षरे सुषुप्तिकाले संप्रतिष्ठि(ष्ठ)त इत्युक्तम् । सामर्थ्यात्प्रलयेऽपि तस्मिन्नेवाक्षरे संप्रतिष्ठते जगत्तत एवोत्पद्यत इति सिद्धं भवति । न ह्यकारणे कार्यस्य संप्रतिष्ठानमुपपद्यते । उक्तं च- " आत्मन एष प्राणो जायते " इति । जगतश्च यन्मूलं तत्परिज्ञानात्परं श्रेय इति सर्वोपनिषदां निश्चितोऽर्थः । अनन्तरं चोक्तं स सर्वज्ञः सर्वो भवतीति । वक्तव्यं च क्व तर्हि तदक्षरं सत्यं पुरुषाख्यं विज्ञेयमिति । तदर्थोऽयं प्रश्न आरभ्यते । वृत्तान्वाख्यानं च विज्ञानस्य दुर्लभत्वख्यापनेन तल्लब्ध्यर्थं मुमुक्षूणां यत्नविशेषोपादानार्थम् ।

गताः कलाः पञ्चदश प्रतिष्ठाः कर्माणि विज्ञानमयश्चेति मन्त्रे कर्मभिः सह षोडशकलानां परस्मिन्लँयमुक्त्वा यथा नद्यः स्यन्दमाना इति मन्त्रेण दृष्टान्तोक्तिद्वारा परप्राप्तिरुक्ता तन्मन्त्रयोर्विस्तराभिधानार्थं षष्ठं प्रश्नमारभते—अथ हैनमिति । तस्य पूर्वेण संगतिमुक्तार्थानुवादपूर्वकमाह—समस्तमित्यादिना । अक्षरस्य कारणत्वसिद्ध्यर्थं प्रलयेऽपि तस्मिन्नेव लयमाह—सामर्थ्यादिति । लयाधारत्वेन कारणत्वं[2]माह—तत इति । तदुक्तेः प्रयोजनमाह—जगत इति । यद्यप्यद्वितीयात्मज्ञानान्मुक्तिर्न कारणज्ञानात्तथाऽपि तस्य कारणत्वे तद्व्यतिरेकेण कार्याभावात्तदद्वितीयत्वज्ञानं सिध्यतीति तादृशात्मज्ञानात्परं श्रेय इति । आत्मा वा इदमेक एव । स एतमेव पुरुषं ब्रह्म ततममपश्यत् । प्रज्ञानं ब्रह्म । स एतेन प्रज्ञेनाऽऽत्मनाऽमृतः समभवत् । सदेवैकमेवाद्वितीयमित्युपक्रम्याऽऽचार्यवान्पुरुषो वेद, अथ संपत्स्ये, तमेवैकं जानथ । अमृतस्यैष सेतुः, अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवदित्यादिषु निश्चितमित्यर्थः । इहापि तादृगात्मज्ञानादेव सर्वात्मभावः श्रेय उक्त इत्याह—अनन्तरमिति । वृत्तमनूद्य वर्तिष्यमाणमाह—वक्तव्यमिति । तदर्थोऽयमिति । तस्य शरीरान्तःस्थत्वोक्तिद्वारा तस्य प्रत्यगात्मत्वज्ञानार्थमित्यर्थः ।

भगवन्हिरण्यनाभः कौसल्यो राजपुत्रो मामुपे-

---

१ ख. ग. घ. ङ. °त्तान्तव्याख्या° । च. °त्तान्तान्वाख्या° । २ क. ग. च. °षोत्पादना° । ३ ख. ग. घ. ङ. °णत्वार्थम् । त° ।

त्यैतं *प्रश्नमपृच्छत । षोडशकलं भारद्वाज पुरुषं वेत्थ । तमहं कुमारमब्रुवं नाहमिमं वेद । यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति । ×समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुम् । स तूष्णीं रथमारुह्य प्रवव्राज । तं त्वा पृच्छामि क्वासौ पुरुष इति ॥ १ ॥

हे भगवन्हिरण्यनाभो नामतः कोसलायां भवः कौसल्यो राजपुत्रो जातितः क्षत्रियो मामुपेत्योपगम्यैतमुच्यमानं प्रश्नमपृच्छत । षोडशकलं षोडशसंख्याकाः कला अवयवा इवाऽऽत्मन्यविद्याध्यारोपितरूपा यस्मिन्पुरुषे सोऽयं षोडशकलस्तं षोडशकलं हे भारद्वाज पुरुषं वेत्थ विजानासि । तमहं राजपुत्रं कुमारं पृष्टवन्तमब्रुवमुक्तवानस्मि नाहमिमं वेद यं त्वं पृच्छसीति । एवमुक्तवत्यपि मय्यज्ञानमसंभावयन्तं तमज्ञाने कारणमवादिषम् । यदि कथंचिदहमिमं त्वया पृष्टं पुरुषमवेदिषं विदितवानस्मि कथमत्यन्तशिष्यगुणवतेऽर्थिने ते तुभ्यं नावक्ष्यं नोक्तवानस्मि । न ब्रूयामित्यर्थः । भूयोऽप्यप्रत्ययमिवाऽऽलक्ष्य प्रत्याययितुमब्रुवम् । समूलः सह मूलेन वा एषोऽन्यथा सन्तमात्मानमन्यथा कुर्वन्नृतमयथाभूतार्थमभिवदति यः स परिशुष्यति शोषमुपैतीहलोकपरलोकाभ्यां विच्छिद्यते विनश्यति । यत एवं जाने तस्मान्नार्हाम्यहमनृतं वक्तुं मूढवत् । स राजपुत्र एवं प्रत्यायितस्तूष्णीं व्रीडितो रथमारुह्य प्रवव्राज प्रगतवान्यथागतमेव । अतो न्यायत उपसन्नाय योग्याय जानता विद्या वक्तव्यैवानृतं च न वक्तव्यं सर्वास्वप्यवस्थास्वित्येतत्सिद्धं भवति । तं पुरुषं त्वा त्वां पृच्छामि मम हृदि विज्ञेयत्वेन शल्यमिव मे हृदि स्थितं क्वासौ वर्तते विज्ञेयः पुरुष इति ॥ १ ॥

प्रश्नमिति । प्रष्टव्यमित्यर्थः । अज्ञाने कारणमिति । अज्ञानसंभावनायां कारणमित्यर्थः । अप्रत्ययमिति । अविश्वासमित्यर्थः । अन्यथा सन्तमिति । ज्ञानिनं सन्तमन्यथा कुर्वन्नज्ञानिनं कुर्वन्नारोपयन्नित्यर्थः । कथं ते नावक्ष्यमित्यनेन सूचितमर्थमाह—अत इति । समूलो वा इत्यनेन सूचितमाह—अनृतं चेति । स्वरूपेण शल्य-

---

* क्वचिन्मूल एनमिति पाठः । × क्वचिन्मूले ह वा इति पाठः ।

त्वाभावादाह—विज्ञेयत्वेनेति । यावज्जिज्ञासितं न ज्ञायते तावत्तद्बुद्धि शल्यवद्बाधत इति शल्यमिवेत्युक्तम् ॥ १ ॥

तस्मै स होवाच । इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति ॥ २ ॥

तस्मै स होवाच। इहैवान्तःशरीरे हृदयपुण्डरीकाकाशमध्ये हे सोम्य स पुरुषो न देशान्तरे विज्ञेयो यस्मिन्नेता उच्यमानाः षोडश कलाः प्राणाद्याः प्रभवन्त्युत्पद्यन्त इति। षोडशकलाभिरुपाधिभूताभिः सकल इव निष्कलः पुरुषो लक्ष्यतेऽविद्ययेति तदुपाधिकलाध्यारोपापनयेन विद्यया स पुरुषः केवलो दर्शयितव्य इति कलानां तत्प्रभवत्वमुच्यते । प्राणादीनामत्यन्तनिर्विशेषे ह्यद्वये शुद्धे तत्त्वे न शक्योऽध्यारोपमन्तरेण प्रतिपाद्यप्रतिपादनादिव्यवहारः कर्तुमिति कलानां प्रभवस्थित्यप्ययाआरोप्यन्तेऽविद्याविषयाश्चैतन्याव्यतिरेकेणैव हि कला जायमानास्तिष्ठन्त्यः प्रलीयमानाश्च सर्वदा लक्ष्यन्ते । अत एव भ्रान्ताः केचिदग्निसंयोगाद्घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायते नश्यतीति । तन्निरोधे शून्यमिव सर्वमित्यपरे । घटादिविषयं चैतन्यं चेतयितुर्नित्यस्याऽऽत्मनोऽनित्यं जायते विनश्यतीत्यपरे। चैतन्यं भूतधर्म इति लोकायतिकाः ।

पुरुषस्य षोडशकलत्वं न साक्षात्सावयवत्वेन किंतु कलाजनकत्वेन तदुपाधिमत्त्वादिति वक्तुं यस्मिन्नेता इति वाक्यमिति तत्तात्पर्यमाह—षोडशकलाभिरिति । ननु केवल आत्मा प्रदर्श्यतां किं वक्ष्यमाणकलोक्त्येत्यत आह—तदुपाधीति । तथैव स प्रदर्शनीय इत्यत्र हेतुमाह—अत्यन्तेति । अविद्याविषया इति । अविद्याधीना इत्यर्थः । कालत्रयेऽपि तासां चैतन्यरूपाधिष्ठानाव्यतिरेकाद्रज्जुसर्पवन्मृषात्वमित्यविद्याविषयत्वं साधयति—चैतन्येति । चैतन्याव्यतिरेकेण लक्ष्यमाणत्वं हेतुं विज्ञानवादिभ्रान्त्या दृढी करोति—अत एवेति । घृतं यथाऽग्निसंयोगाद्द्रवावस्थां प्रतिपद्यत एवमहमाकारमालयविज्ञानमेव वासनावशाद्विषयाकारेण जायत इति वदतां तेषां भ्रमो विषयस्य चैतन्याव्यतिरेके प्रत्ययं गमयति । अन्यथा तथाभ्रमानुपपत्तेरित्यर्थः । विषयाणां चैतन्याव्यतिरेकेण प्रतीतिनियमादेव विषयविज्ञानरूपेण चैतन्याभावे सुषुप्त्यादौ शून्यभ्रमो जातः केषांचिदिति तदीयभ्रान्त्याऽपि चैतन्याव्यतिरिक्तप्रतीतिं दृढी करोति—तन्निरोध इति । चैतन्यस्यानित्यस्य कलारोपाधिष्ठानत्वं न संभवति कला-

---

१ क. च. °धिरूपाभिः । २ क. च. °नयनेव ।

कार्यत्वादिति नैयायिकपक्षोक्तिव्याजेन शङ्कते—घटादीति । भूतधर्म इति । देहाकारेण संहतभूतधर्म इत्यर्थः ।

अनपायोपजनधर्मकचैतन्यमात्मैव नामरूपाद्युपाधिधर्मैः प्रत्यवभासते । सत्यं ज्ञानमनन्तं ब्रह्म । प्रज्ञानं ब्रह्म विज्ञानमानन्दं ब्रह्म । विज्ञानघन एवेत्यादिश्रुतिभ्यः । स्वरूपव्यभिचारिषु पदार्थेषु चैतन्यस्याव्यभिचाराद्यथा यथा यो यः पदार्थो विज्ञायते तथा तथा ज्ञायमानत्वादेव तस्य तस्य चैतन्यस्याव्यभिचारित्वं वस्तुतत्त्वं भवति, किंचिन्न ज्ञायत इति चानुपपन्नम् ।

चैतन्यस्याऽऽरोपाधिष्ठानत्वसिद्ध्यर्थं नित्यत्वमेकत्वं च वदंस्तान्निराकरोति—अनपायेति । प्रत्यवभासत इति । नानात्वेन कार्यत्वेन चेति शेषः । सत्यं ज्ञानमिति । तथा च श्रुतिविरोधात्ते पक्षा हेया इत्यर्थः । किंच ज्ञानकाले विषयाणां सद्भावनियमाभावाद्विषयकाले च ज्ञानस्य सद्भावनियमात्तयोर्भेद इति विज्ञानवादिपक्षं निराकुर्वन्नव्यभिचारादेव ज्ञानस्य नित्यत्वं साधयन्नैयायिकादिपक्षमपि निराकरोति—स्वरूपेति । घटज्ञानकाले घटाभावसंभवाद्विषयाणां ज्ञानव्यभिचारित्वं ज्ञानस्य तु विषयकालेऽवश्यंभावनियमाद्व्यभिचारित्वमित्यर्थः । पटकाले घटज्ञानमपि नास्तीति घटज्ञानस्यापि पटविषयव्यभिचारित्वं तुल्यमित्याशङ्क्य स्वरूपेत्युक्तम् । ज्ञानस्य विषयविशिष्टत्वरूपेणैव व्यभिचारः । विषयस्य तु स्वरूपेणैवेति विशेष इत्यर्थः । ज्ञानस्याव्यभिचारित्वमुपपादयति—यथा यथेति । ननूत्पन्नविनष्टादेर्मेरुगुहान्तर्वर्तिनश्चाज्ञायमानत्वाज्ज्ञानस्यापि ज्ञेयाव्यभिचारोऽसिद्ध इत्याशङ्क्य तस्याज्ञाने तत्सद्भावासिद्धेस्तथाभूतपदार्थोऽसिद्ध इत्याह—वस्तुतत्त्वेति ।

रूपं च दृश्यते न चास्ति चक्षुरिति यथा । व्यभिचरति तु ज्ञेयं ज्ञानं न व्यभिचरति कदाचिदपि ज्ञेयम् । ज्ञेयाभावेऽपि ज्ञेयान्तरे भावाज्ज्ञानस्य । न हि ज्ञानेऽसति ज्ञेयं नाम भवति कस्यचित् । सुषुप्तेऽदर्शनाज्ज्ञानस्यापि सुषुप्तेऽभावाज्ज्ञेयवज्ज्ञानस्वरूपस्य व्यभिचार इति चेन्न । ज्ञेयावभासकस्य ज्ञानस्याऽऽलोकवज्ज्ञेयाभिव्यञ्जकत्वात्स्वव्यञ्जन्याभाव आलोकाभावानुपपत्तिवत्सुषुप्ते विज्ञानाभावानुपपत्तेः ।

अनुपपत्तिमेव दृष्टान्तेन स्फुटी करोति—रूपं चेति । ज्ञेयस्य ज्ञानव्यभिचारित्वं ज्ञानकाले सत्त्वनियमाभावरूपं स्पष्टमित्याह—व्यभिचरति त्विति । घटज्ञानकाले कदाचिद्घटाभावादित्यर्थः । पटकाले घटज्ञानस्यापि व्यभिचारस्तुल्य इत्याशङ्क्य

---

१ क. च. °ज्ञानमानन्दं ब्र° । २ ख. ङ. तस्याव्य° । ३ क. च. °स्तु च भ° । ४ क. ख. °दंस्तान्नि° । ५ क. च. °स्तु चेति । ६ क. च. °तिवत् । व्य° ।

विशिष्टरूपेण व्यभिचारेऽपि स्वरूपेणाव्यभिचारं पूर्ववत्सूचितमाह—न व्यभिचरतीति। ज्ञानमित्यस्येहाप्यनुषङ्गः । पूर्ववाक्ये द्वितीयान्तमिह तु प्रथमान्तमिति विशेषः। भावादिति । स्वरूपेणेत्यर्थः । ज्ञानस्य स्वरूपेण सत्तामेव ज्ञेयान्तरस्य ज्ञेयत्वादेव साधयति—न हीति । स्वरूपेणाप्यभावं शङ्कते—सुषुप्त इति । किं तदानीं ज्ञेयाभावेन ज्ञानाभावः साध्यत उत ज्ञानस्यादर्शनाद्वाऽऽद्येऽपि ज्ञेयस्य व्यङ्ग्यत्वात्तदभावाद्व्यञ्जकाभाव इति वोत तयोरैक्यादेकाभाव इतराभाव इति । नाऽऽद्यो व्यभिचारादित्याह—न । ज्ञेयेति ।

न ह्यन्धकारे चक्षुषा रूपानुपलब्धौ चक्षुषोऽभावः शक्यः कल्पयितुं[1] वैनाशिकेन । वैनाशिको ज्ञेयाभावे ज्ञानाभावं कल्पयत्येवेति चेद्येन तदभावं कल्पयेत्तस्याभावः केन कल्प्यत इति वक्तव्यं वैनाशिकेन ।

व्यङ्ग्यज्ञानैककल्पस्य व्यङ्ग्याभावेऽभाव उच्यत आलोकस्य प्रत्यक्षसिद्धत्वान्नैवमिति ज्ञानानुमेयत्ववादिनं प्रति दृष्टान्तान्तरमाह—न हीति । वैनाशिकमते विज्ञानव्यतिरिक्तालोकाद्यभावान्न व्यभिचार इति शङ्कते—वैनाशिक इति। कल्पयत्येवेति। उक्तव्यभिचारस्थलाभावेन व्यभिचाराभावादित्यर्थः । एवमपि ज्ञानाभावकल्पकस्य ज्ञेयाभावस्य ज्ञानमङ्गी क्रियते न वा । आद्ये न ज्ञानाभावसिद्धिस्तस्यैवाभावज्ञानस्य सत्त्वादित्याह—येनेति । येन ज्ञेयाभावज्ञानेन तदभावं कल्पयेत्तस्य ज्ञानस्याभावः केन कल्प्यते न केनापि कल्पयितुं शक्य इत्यर्थः ।

तदभावस्यापि ज्ञेयत्वाज्ज्ञानाभावे तदनुपपत्तेः । ज्ञानस्य ज्ञेयाव्यतिरिक्तत्वाज्ज्ञेयाभावे ज्ञानाभाव इति चेन्न । अभावस्यापि ज्ञेयत्वाभ्युपगमादभावोऽपि ज्ञेयोऽभ्युपगम्यते वैनाशिकैर्नित्यश्च तदव्यतिरिक्तं चेज्ज्ञानं नित्यं कल्पितं स्यात्तदभावस्य च ज्ञानात्मकत्वादभावत्वं वाङ्मात्रमेव न परमार्थतोऽभावत्वमनित्यत्वं च ज्ञानस्य । न च नित्यस्य ज्ञानस्याभावनाममात्राध्यारोपे किंचित्रश्छिद्यापू ।

न द्वितीय इत्याह—तदभावस्यापीति । ज्ञेयाभावस्याप्यज्ञातस्य ज्ञानाभावकल्पकत्वासंभवादवश्यं ज्ञेयत्वात्तज्ज्ञानाभावे तदनुपपत्तेः कल्पनानुपपत्तेर्ज्ञानानङ्गीकारपक्षो न युक्त इत्यर्थः । आद्यकोटौ द्वितीयकल्पं शङ्कते—ज्ञेयेति । वैनाशिकमतेऽप्यभावस्य ज्ञेयत्वाभ्युपगमाद्बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं च तादिति प्रतिसंख्याऽप्रतिसंख्या(?)निरोधाकाशरूपत्रयव्यतिरिक्तस्यैव क्षणिकत्वेन निरोधशब्दितस्याभावस्य

---

१ क. ख. ङ. च. °यितुमवै° । २ ग. च. °कल्प्यस्य । ३ क. च. °ख्यानि° । ४ क. °धादाका° ।

नित्यत्वाङ्गीकारेण तदभिन्नस्य ज्ञानस्यापि सुषुप्ते सत्त्वं नित्यत्वं च प्राप्तमित्याह—न। अभावस्येति। ज्ञानस्याभावाभिन्नत्वेनाभावत्वमेव स्यान्न तु भावत्वेन सत्त्वं नित्यत्वं च स्यादित्याशङ्क्याभावस्यापि ज्ञानाभिन्नत्वेऽभावत्वमेव न स्यादित्याह—तदभावस्येति। अनित्यत्वं च ज्ञानस्येति वाङ्मात्रमेव स्यादित्यनुषङ्गः। वाङ्मात्रेणाप्यभावस्याभावत्वेन ज्ञानानित्यत्वेन चास्मत्सिद्धान्तसिद्धिरित्याशङ्क्य नाममात्रेण तेन वास्तवनित्यत्वादिविरोधाभावान्नास्माकं क्षतिरित्याह—न चेति। अभावनामेति। अनित्यनामेत्यपि द्रष्टव्यम्।

अथाभावो ज्ञेयोऽपि सञ्ज्ञानव्यतिरिक्त इति चेन्न तर्हि ज्ञेयाभावे ज्ञानाभावः। ज्ञेयं ज्ञानव्यतिरिक्तं न तु ज्ञानं ज्ञेयव्यतिरिक्तमिति चेन्न। शब्दमात्रत्वाद्विशेषानुपपत्तेः। ज्ञेयज्ञानयोरेकत्वं चेदभ्युपगम्यते ज्ञेयं ज्ञानव्यतिरिक्तं ज्ञानं ज्ञेयव्यतिरिक्तं नेति तु शब्दमात्रमेतद्वह्निरग्निव्यतिरिक्तोऽग्निर्न वह्निव्यतिरिक्त इति यद्वदभ्युपगम्यते, ज्ञेयव्यतिरेके तु ज्ञानस्य ज्ञेयाभावे ज्ञानाभावानुपपत्तिः सिद्धा।

एतद्दोषपरिहारार्थं ज्ञेयस्यापि सतोऽभावस्य ज्ञानाभेदो नाङ्गी क्रियत इति शङ्कते—अथेति। तर्हि ज्ञेयाभिन्नत्वेन हेतुना सुषुप्ते ज्ञानाभावो न सिध्यति घटाद्यभावेन तज्ज्ञानाभावसिद्धावप्यभावज्ञानाभावासिद्धेस्तस्याभिन्नत्वाभावादित्याह—न तर्हीति। यद्वाऽभावस्य ज्ञेयस्य ज्ञानाद्भेदे भावस्यापि तथात्वं स्याद्विशेषहेत्वभावात्तथा च न ज्ञेयाभावाज्ज्ञानाभावसिद्धिरित्याह—न तर्हीति। ननु ज्ञेयस्य ज्ञानव्यतिरिक्तत्वमङ्गी क्रियते तथा चाभावस्य ज्ञानव्यतिरिक्तत्वादभावत्वादिकं सिध्यति। ज्ञानस्य तु न ज्ञेयव्यतिरिक्तत्वम्। तथा च ज्ञेयाभावे ज्ञानाभावसिद्धिरिति निरुद्धगतिकः शङ्कते—ज्ञेयमिति। ज्ञानस्य ज्ञेयाव्यतिरेके ज्ञेयस्यापि तदव्यतिरेकावश्यंभावादन्यथोभयोरत्यन्तभेद एव स्याद्भेदाभेदयोर्विरोधादनुपपत्तेरिति दूषयति—न। शब्दमात्रत्वादिति। इदमुपलक्षणम्। ज्ञानस्याभावाव्यतिरेकेण नित्यत्वादिकं च स्यादेवेत्यपि द्रष्टव्यम्। यद्येतद्दोषपरिहाराय तस्यापि भेद एवाङ्गी क्रियते तर्हि न सुषुप्तौ ज्ञानाभावसिद्धिरित्युपसंहरति—ज्ञेयव्यतिरेके त्विति।

ज्ञेयाभावेऽदर्शनादभावो ज्ञानस्येति चेन्न। सुषुप्ते ज्ञप्त्यभ्युपगमात्। वैनाशिकैरभ्युपगम्यते हि सुषुप्तेऽपि ज्ञानास्तित्वं, तत्रापि ज्ञेयत्वमभ्युपगम्यते ज्ञानस्य स्वेनैवेति चेन्न। भेदस्य सिद्धत्वात्। सिद्धं ह्यभावविज्ञेयविषयस्य ज्ञानस्याभावज्ञेयव्यतिरेकाज्ज्ञेयज्ञानयोरन्यत्वम्।

सुषुप्ते ज्ञानस्यादर्शनादेवाभाव इत्याद्ये द्वितीयं शङ्कते—ज्ञेयाभाव इति। आलय-

---

१ ख. घ. ङ. °मिर्वह्निरभ्यु°। २ घ. ङ. °ति विरु°।

विज्ञानसंततेर्नित्यत्वाङ्गीकारेण त्वया तदाऽपि तदभावो वक्तुं न शक्यत इत्याह—न। सुषुप्त इति। अस्तित्वमिति। तथा च ज्ञानस्यादर्शनमसिद्धं सुषुप्तेऽपि तदङ्गीकारादित्यर्थः। ननु ज्ञेयाभावेन तन्निरूप्यस्य ज्ञानस्यादर्शनमित्युच्यते मया। सुषुप्ते च स्वस्यैव स्वज्ञेयत्वाज्ज्ञानदर्शनमुपपद्यतेऽस्मन्मते। त्वन्मते तु स्वज्ञेयत्वानङ्गीकारात्सुषुप्ते चान्यस्याभावान्निरूपकाभावाच्च ज्ञानदर्शनास्तित्वमुपपद्यत इति शङ्कते—तत्रापीति। अभावस्थले ज्ञानज्ञेययोर्भेदस्य साधितत्वात्तद्दृष्टान्तेन सर्वत्र ज्ञानज्ञेययोर्भेदसाधनान्न स्वज्ञेयत्वं ज्ञानस्येत्याह—न भेदस्येति। अभावरूपो [वि]ज्ञेयो विषयो यस्य तस्य ज्ञानस्याभावरूपो यो ज्ञेयस्तद्व्यतिरेकादित्यर्थः।

न हि तत्सिद्धं मृतमिवोज्जीवयितुं पुनरन्यथा कर्तुं शक्यते वैनाशिकशतैरपि ज्ञानस्य ज्ञेयत्वमेवेति। तदप्यन्येन तदप्यन्येनेति त्वत्पक्षेऽतिप्रसङ्ग इति चेन्न। तद्विभागोपपत्तेः सर्वस्य। यदा हि सर्वं ज्ञेयं कस्यचित्तदा तद्व्यतिरिक्तं ज्ञानं ज्ञानमेवेति द्वितीयो विभाग एवाभ्युपगम्यतेऽवैनाशिकैर्न तृतीयस्तद्विषय इत्यनवस्थानुपपत्तिः।

अभावस्थले भेदेऽपि न सर्वत्रेत्याशङ्क्य न्यायस्य तुल्यत्वान्न तदन्यथा कर्तुं शक्यमित्याह—न हीति। ज्ञानस्य स्वव्यतिरिक्तज्ञेयत्वनियमपक्षेऽनवस्थां वैनाशिकः शङ्कते—ज्ञानस्येति। ज्ञेयस्य स्वव्यतिरिक्तज्ञेयत्वनियमाङ्गीकारादस्मन्मते च ज्ञानस्य ज्ञेयत्वानङ्गीकारान्न दोष इत्याह—न। तदिति। सर्वस्य वस्तुजातस्य विभागोऽसंकरो ज्ञानं ज्ञानमेव न ज्ञेयं ज्ञेयमपि ज्ञेयमेव न कदाचिदपि ज्ञानमित्येवंरूपस्तस्योपपत्तेरित्यर्थः। अथवा द्विभागोपपत्तेरिति च्छेदः। ज्ञानज्ञेयरूपभागद्वयमेव राशिद्वयमेवाङ्गी क्रियते न तृतीयो ज्ञानविषयकज्ञानरूपो भावराशिरङ्गी क्रियत इत्यर्थः। ता(त)मेवाऽऽह—यदा हीति। यस्मिन्पक्षे ज्ञेयं सर्वं स्वव्यतिरिक्तस्य कस्यचिज्ज्ञानस्य ज्ञेयमित्यङ्गी क्रियत इति ज्ञेयपदावृत्त्या स्वव्यतिरिक्तस्येति पदाध्याहारेण च यदा हीति वाक्यं योज्यम्। अवैनाशिकैरिति च्छेदः। तद्विषय इति। ज्ञानविषयकज्ञानात्मक इत्यर्थः।

ज्ञानस्य स्वेनैवाविज्ञेयत्वे सर्वज्ञत्वहानिरिति चेत्सोऽपि दोषस्तस्यैवास्तु किं तन्निबर्हणेनास्माकमनवस्थादोषश्च ज्ञानस्य ज्ञेयत्वाभ्युपगमादवश्यं च वैनाशिकानां ज्ञानं ज्ञेयम्।

तर्हि त(त्व)त्पक्षे ज्ञानात्मकस्य ब्रह्मणः सर्वज्ञत्वं न स्यात्स्वेन स्वस्याज्ञानादिति शङ्कते—ज्ञानस्येति। ज्ञातुं योग्यस्य सर्वस्याज्ञाने हि सर्वज्ञत्वहानिः, अन्यथा शशविषाणादेरज्ञानात्सर्वज्ञत्वं कस्यापि मते न स्यादतोऽस्मन्मते तस्य दोषस्य प्राप्तिः किंतु

---

१ क. च. °नमप्युप°।

वैनाशिकस्यैव, तेन ज्ञानस्यावश्यज्ञेयत्वाङ्गीकारात्स्वेन स्वस्य ज्ञेयत्वस्य सिद्धं हीति पूर्वग्रन्थे दूषितत्वादन्यज्ञेयत्वस्य चानङ्गीकारात्सर्वज्ञा(ज्ञ)त्वायोगादित्याह—सोऽपीति। तर्ह्यि तव मते कथं सर्वज्ञत्वनिर्वाह इत्याशङ्क्याऽस्मन्मते तस्य मायिकत्वेन तदनिर्वाहेऽपि न दोष इत्याह—किं तदिति। वस्तुतस्तु × सर्वस्य व्यवहारहेतुज्ञानवत्त्वं सर्वज्ञत्वं तत्तु ज्ञानस्यापि स्वप्रकाशत्वेन स्वव्यवहारहेतुत्वादस्ति ज्ञातुं योग्यं सर्वज्ञानाद्वा तदस्तीति भावः। पूर्वोक्तानवस्थादोषोऽपि तस्यैवेत्याह—अनवस्थेति।

स्वात्मना चाविज्ञेयत्वेनानवस्थाऽनिवार्या। समान एवायं दोष इति चेन्न। ज्ञानस्यैकत्वोपपत्तेः। सर्वदेशकालपुरुषाद्यवस्थमेकमेव ज्ञानं नामरूपाद्यनेकोपाधिभेदात्सवित्रादिजलादिप्रतिबिम्बवदनेकधाऽवभासत इति। नासौ दोषः। तथा चेहेदमुच्यते।

ननु तेन स्वेनैव ज्ञेयत्वाङ्गीकारान्नानवस्थेत्यत आह—स्वात्मना चेति। सिद्धं हीत्यत्र स्वज्ञेयत्वासंभवस्योक्तत्वात्परिशेषादन्यज्ञेयत्वे तस्य तस्याप्येवमित्यनवस्थाऽनिवार्येत्यर्थः। ज्ञानस्याज्ञेयत्वे तद्व्यवहारासिद्धिर्ज्ञानान्तरज्ञेयत्वे चानवस्था तवापि स्यादिति शङ्कते—समान एवेति। स्वप्रकाशत्वेन स्वव्यवहारसिद्धेर्ज्ञानभेदस्यैवास्माभिरनङ्गीकारादनवस्थायाः प्रसक्तिरेव नास्तीति परिहरति—न। ज्ञानस्येति। एकत्वपक्षे भेदप्रतीतिमुपपादयति—नामरूपेति। एवं च चैतन्यस्यैकत्वेन नित्यत्वाज्जगद्धिचित्त्वेन तस्य सत्यत्वाच्चाधिष्ठानत्वोपपत्तेस्तस्मिन्कलानामध्यारोप आत्मप्रतिपत्त्यर्थमिहोच्यत इत्याह—तथा चेहेति। चैतन्यस्य नित्यत्वेनाधिष्ठानत्वे सतीह श्रुताविदं कलानामध्यारोपणमुच्यत इत्यर्थः।

ननु श्रुतेरिहैवान्तःशरीरे परिच्छिन्नः कुण्डबदरवत्पुरुष इति, न। प्राणादिकलाकारणत्वात्। न हि शरीरमात्रपरिच्छिन्नस्य प्राणश्रद्धादीनां कलानां कारणत्वं प्रतिपत्तुं शक्नुयात्। कलाकार्यत्वाच्च शरीरस्य। न हि पुरुषकार्याणां कलानां कार्यं सच्छरीरं कारणकारणं स्वस्य पुरुषं कुण्डबदरमिवाभ्यन्तरी कुर्यात्, बीजवृक्षादिवत्स्यादिति चेत्।

ननु चैतन्यस्य न नित्यत्वं परिच्छेदश्रुतेः परिच्छिन्नस्य च घटादिवदनित्यत्वादिति शङ्कते—नन्विति। शरीरान्तःस्थत्वं प्रत्यक्त्वविवक्षयोच्यते न परिच्छेदविवक्षया। तथा सत्युत्तरवाक्यविरोधादित्याह—नेति। अयोग्यत्वादपिसोऽर्थो न विवक्षित इत्याह—कलेति। स्वोत्पत्तेः पूर्वं स्वस्यामावात्तत्कालीनपुरुषं परिच्छेत्तुं न शक्नोतीत्यर्थः। बीजकार्यस्य वृक्षस्य कार्यं फलं स्वकारणवृक्षकारणं बीजमभ्यन्तरी करोतीति दृष्टमिति नायोग्यत्वमिति शङ्कते—बीजवृक्षादिवदिति।

× सर्वज्ञस्य व्यवहारहेतुज्ञानवत्त्वमिति क्वचित्पाठः। सर्वव्यवहारहेतुत्वमित्येव तु पठितुं योग्यम्।

यथा बीजकार्यं वृक्षस्तत्कार्यं च फलं स्वकारणकारणं बीजमभ्यन्तरी करोत्याम्रादि तद्वत्पुरुषमभ्यन्तरी कुर्याच्छरीरं स्वकारणकारणमपीति चेन्न । अन्यत्वात्सावयवत्वाच्च । दृष्टान्ते कारणबीजाद्वृक्षफलसंवृत्तान्यन्यान्येव बीजानि दार्ष्टान्तिके तु स्वकारणकारणभूतः स एव पुरुषः शरीरेऽभ्यन्तरीकृतः श्रूयते ।

तद्विवृणोति—यथेति । दृष्टान्ते बीजव्यक्तिभेदादविरोधेऽपीह पुरुषव्यक्त्यैक्यात्कारणत्वाभ्यन्तरीभावयोर्विरोध इत्याह—नेति । ननु कारणीभूतबीजस्यैव वृक्षफलतदन्तर्गतबीजरूपेण परिणामात्तयोः कारणकार्यबीजयोरैक्यमाशङ्क्यैवमपि तस्य सावयवत्वाद्वृक्षवत्फलाकारेण परिणतावयवेभ्यो भिन्नावयवानामेव तदन्तर्गतबीजरूपेण परिणामात्तयोर्भेदेनाऽऽधाराधेयभावः स्यादिह तु निरवयवत्वान्न तथात्वमित्याह—सावयवत्वाच्चेति । आद्यं हेतुं विवृणोति—दृष्टान्त इति । श्रूयत इति । यस्मिन्नेताः षोडश कला इति यच्छब्दोक्तस्यैव पुरुषस्यान्तःशरीरे सोम्य स पुरुष इति तच्छब्देनाभिधानादित्यर्थः ।

बीजवृक्षादीनां सावयवत्वाच्च स्यादाधाराधेयत्वं निरवयवश्च पुरुषः सावयवाश्च कलाः शरीरं च, एतेनाऽऽकाशस्यापि शरीराधारत्वमनुपपन्नं किमुताऽऽकाशकारणस्य पुरुषस्य तस्मादसमानो दृष्टान्तः । किं दृष्टान्तेन वचनात्स्यादिति चेन्न । वचनस्याकारकत्वात् । न हि वचनं वस्तुतोऽन्यथाकरणे व्याप्रियते[1] । किं तर्हि यथाभूतार्थावद्योतने । तस्मादन्तःशरीर इत्येतद्वचनप्रपञ्चस्यान्तर्व्योमेतिवच्च द्रष्टव्यम् । उपलब्धिनिमित्तत्वाच्च दर्शनश्रवणमननविज्ञानादिलिङ्गैरन्तःशरीरे परिच्छिन्न इव ह्युपलभ्यते[2] पुरुष उपलभ्यते चात उच्यतेऽन्तःशरीरे सोम्य स पुरुष इति । न पुनराकाशकारणः सन्कुण्डबदरवच्छरीरपरिच्छिन्न इति मनसाऽपीच्छति वक्तुं मूढोऽपि किमुत प्रमाणभूता श्रुतिः ॥ २ ॥

द्वितीयं हेतुं विवृणोति—बीजेति । निरवयवश्चेति । तथा चैकदेशेन कलादिरूपेण परिणाम एकदेशेन तत्रावस्थानं बीजवन्न संभवतीत्यर्थः । किंच कलानां सावयवत्वेन परिच्छेदात्पुरुषस्य तद्विपरीतत्वादपरिच्छिन्नस्य न परिच्छिन्नाधारकत्वं संभवतीत्याह—सावयवाश्चेति । यद्वा सावयवत्वेन कार्यतया मृषात्वान्निरवयवतया परमार्थसत्यपुरुषाधारत्वं नोपपद्यत इत्याह—सावयवाश्चेति । नन्वाकाशकार्यशरीर आकाशस्यापरिच्छिन्नस्याभ्यन्तरीभावो दृष्ट इत्याशङ्क्य तस्यापि शरीराकारेणावस्था-

---

१ ख. घ. ङ. व्याक्रिय° । २ क. च. °ते चात ।

नमेव च्छिद्रादिविशिष्टस्यैव शरीरत्वान्न तु तदन्तःस्थत्वमित्याह–एतेनेति । युक्त्यसहमपि वचनप्रामाण्यादङ्गीकार्यमिति शङ्कते–किं दृष्टान्तेनेति । वचनस्यापि वस्तुनोऽन्यथाकरणे सामर्थ्याभावाद्वस्तुस्वरूपाविरोधेनैव बोधकत्वादन्यथा विचारवैयर्थ्याद्विरुद्धार्थो न बोधार्ह इत्याह––वचनस्येति । तर्ह्यन्तःशरीर इति श्रुतेः कथमुपपत्तिरित्याशङ्क्य पुरुषस्य शरीरोपादानत्वेन तदनुस्यूतस्य तदन्तर्गतवत्प्रतीतेस्तदभिप्रायेव श्रुतिरिति दृष्टान्तमाह––तस्मादिति । अण्डेति । अण्डकारणस्य व्योम्नो यथा तदनुस्यूतत्वेन तदन्तर्गतत्वप्रतीतिस्तद्वदित्यर्थः । यद्वा लोकभ्रमसिद्धं परिच्छिन्नत्वमनूद्यते श्रुत्येत्याह––उपलब्धीति । तत्राभिव्यक्तेर्वा तदन्तर्गतत्वव्यपदेश इत्याह––उपलभ्यते चेति ॥ २ ॥

यस्मिन्नेताः षोडश कलाः प्रभवन्तीत्युक्तं पुरुषविशेषणार्थं कलानां प्रभवः स चान्यार्थोऽपि श्रुतः केन क्रमेण स्यादित्यत इदमुच्यते—

स ईक्षांचक्रे । कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति ॥ ३ ॥

चेतनपूर्विका च सृष्टिरित्येवमर्थं च पुरुषः षोडशकलः पृष्टो यो भारद्वाजेन स ईक्षांचक्र ईक्षणं दर्शनं चक्रे कृतवानित्यर्थः । सृष्टिफलक्रमादिविषयम् । कथमित्युच्यते, कस्मिन्कर्तृविशेषे देहादुत्क्रान्त उत्क्रान्तो भविष्याम्यहमेव(वं) कस्मिन्वा शरीरे प्रतिष्ठितेऽहं प्रतिष्ठास्यामि प्रतिष्ठितः स्यामित्यर्थः ।

ननु यस्मिन्नेताः षोडश कलाः प्रभवन्तीत्यनेनाध्यारोपस्योक्तत्वात्स ईक्षामित्यादिना पुनः सृष्टिकथनमधिकमित्यत आह—यस्मिन्निति । अत इति । क्रमप्रतिपत्त्यर्थं स ईक्षामित्याद्युच्यत इत्यर्थः । तत्प्रतिपत्तिश्च कलोत्पत्तिप्रतिपत्तिसौकर्यार्थम् । विपर्ययेण तु क्रमोऽत उपपद्यते चेति न्यायेन कार्यस्य स्वस्वकारणक्रमेणापवादसौकर्यार्थं चेत्यर्थः । ईक्षणोक्तेः प्रयोजनमाह—चेतनेति । सृष्टीति । सृष्टिः प्राणादेः सृष्टिः, तस्या उत्क्रान्त्यादि फलं, क्रमः प्राणाच्छ्रद्धामित्याद्युक्तानन्तर्यम् । आदिशब्देन लोकेषु नाम चेत्याधाराधेयविशेषो गृह्यते ।

नन्वात्माऽकर्ता प्रधानं कर्तृ, अतः पुरुषार्थं प्रयोजनमुररीकृत्य प्रधानं प्रवर्तते महदाद्याकारेण तत्रेदमनुपपन्नं पुरुषस्य स्वान्तर्येणेक्षापूर्वकं कर्तृत्ववचनम्। सत्त्वादिगुणसाम्ये प्रधाने प्रमाणोपपन्ने सृष्टिकर्तरि सतीश्वरेच्छानुवर्तिषु वा परमाणुषु सत्स्वात्मनोऽप्येकत्वेन कर्तृत्वे साधनाभा-

---

१ क. ख. ग. च. °स्मिन्वह° ।

वादात्मन आत्मन्यनर्थकर्तृत्वानुपपत्तेश्च । न हि चेतनावान्बुद्धिपूर्वकार्यात्मनोऽनर्थं कुर्यात् ।

नन्वीक्षणोक्त्या न चेतनपूर्वकत्वसिद्धिर्न्यायेन चेतनस्याकर्तृत्वेनाहेतुत्वेऽचेतनस्य प्रधानादेर्विक्रियावत्त्वेन हेतुत्वे च सतीक्षणस्यान्यथा नेयत्वादिति सांख्याः शङ्कन्ते—नन्वात्मेति । अकर्तेत्यस्य तत्रेदमित्यनेनान्वयः । आत्माऽकर्ता चेत्र तथा सतीदं कर्तृत्ववचनमनुपपन्नमित्यर्थः । किंच तस्य कर्तृत्वाङ्गीकारेऽपि कर्तुः कुलालादेरिव सहकारिसाधनान्तराभावादात्मनो दुःखाद्यनर्थहेतुप्राणादिसंसारकर्तृत्वानुपपत्तेश्चानुपपन्नं स्रष्टृत्ववचनमित्याह—आत्मनोऽपीति । कर्तृत्वेऽपीत्यपिशब्दान्वयः । तर्हि किं कर्त्रेत आह—प्रधानमिति । कर्त्रिति । क्रियाशक्तिमदतः प्रवर्तत इत्यन्वयः । ननु प्रधानस्याचेतनस्य प्रयोजनापेक्षाभावात्प्रवृत्त्यनुपपत्तिरित्यत आह—पुरुषार्थमिति । पुरुषस्य चेतनस्य भोगापवर्गरूपमर्थं प्रयोजनमुद्दिश्य प्रवर्तते वत्सविवृध्यर्थमचेतनस्य धेनुदेहगतक्षीरस्य सस्यादिविवृद्ध्यर्थमम्बुनश्चाचेतनस्य प्रवृत्तिदर्शनादित्यर्थः । ननु प्रधानस्याप्येकत्वेन सहकार्यभावात्कारणत्वानुपपत्तावगत्या चेतनस्यैव कथंचित्कर्तृत्वं वाच्यमित्यत आह—सत्त्वादीति । सत्त्वादिगुणत्रयस्य साम्यावस्था प्रधानमिति सांख्यमतम् । तत्र सत्त्वादिगुणैरनेकात्मके प्रधाने कारणे सति पुरुषस्य कर्तृत्ववचनमगतेरभावादनुपपन्नमित्यन्वयः । यदि चेतनानधिष्ठितस्याचेतनस्य प्रवृत्तिर्न दृष्टेति मन्यसे तर्हि परमाणुकारणवादोऽस्तु । तत्रेश्वरस्याधिष्ठातुः सत्त्वादित्याह—ईश्वरेच्छेति । अत्रापि सत्स्वित्यस्यानुपपन्नमिति पूर्वेणान्वयः ।

तस्मात्पुरुषार्थेन प्रयोजनेनेक्षापूर्वकमिव नियतक्रमेण प्रवर्तमानेऽचेतने प्रधाने चेतनवदुपचारोऽयं स ईक्षांचक्र इत्यादिः । यथा राज्ञः सर्वार्थकारिणि भृत्ये राजेति तद्वत् । न, आत्मनो भोक्तृत्ववत्कर्तृत्वोपपत्तेः । यथा सांख्यस्य चिन्मात्रस्यापरिणामिनोऽप्यात्मनो भोक्तृत्वं तद्वद्वेदवादिनामीक्षादिपूर्वकं जगत्कर्तृत्वमुपपन्नं श्रुतिप्रामाण्यात् ।

तर्हीक्षणश्रवणस्य का गतिरत आह—तस्मादिति । **पुरुषार्थेनेति** । पुरुषस्य भोगापवर्गार्थेनेत्यर्थः । मुख्य ईक्षितरि विद्यमानेन नियतक्रमेण प्रवर्तमानत्वेन गुणेन योगादैक्षतेति गौणः प्रयोगो माणवके पैङ्गल्यगुणयोगेनाग्निशब्दप्रयोगवदित्यर्थः । नन्वेवमपीक्षितरि प्रधाने पुरुषशब्दः कथमत आह—**यथा राज्ञ इति** । **तद्वदिति** । पुरुषस्य भोगापवर्गकारिणि प्रधाने पुरुषशब्द औपचारिक इत्यर्थः । स्वतोऽकर्तुरप्यात्मनो मायोपाधिककर्तृत्वं संभवतीति हृदि निधाय प्रथममापाततः प्रतिबन्द्या परिहरति—**नेति** । बुद्धिः कर्त्री भोक्ता पुरुष इति वदद्भिः सांख्यैरात्मनो भोक्तृत्वमुक्त-

---

१ ख. ग. घ. ङ. च. सांख्यः । २ क. च. °नसंग° । ३ ख. ग. घ. ङ. च. °त्यादि । य° ।

मेत्यर्थः । श्रुतिप्रामाण्यादिति । श्रुत्युक्तजगत्कर्तृत्वमविकारिणोऽपि कथंचिन्नि-र्वाह्यमित्यर्थः ।

तत्त्वान्तरपरिणाम आत्मनाऽनित्यत्वाशुद्धत्वानेकत्वानिमित्तो न चि-न्मात्रस्वरूपविक्रियाऽतः पुरुषस्य स्वात्मन्येव भोक्तृत्वे चिन्मात्रस्वरूप-विक्रिया न दोषाय । भवतां पुनर्वेदवादिनां सृष्टिकर्तृत्वे तत्त्वान्तरपरि-णाम एवेत्यात्मनोऽनित्यत्वादिसर्वदोषप्रसङ्गः इति चेन्न एकस्याप्यात्म-नोऽविद्यायां विषयनामरूपोपाध्यनुपाधिकृतविशेषाभ्युपगमादविद्याकृत-नामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यत आत्मनो बन्धमोक्षादिशास्त्र-कृतसंव्यवहाराय । परमार्थतोऽनुपाधिकृतं च तत्त्वमेकमेवाद्वितीयमुपादेयं सर्वतार्किकबुद्ध्यनवगाह्यमभयं शिवमिष्यते न तत्र कर्तृत्वं भोक्तृत्वं वा क्रियाकारकफलं च स्यादद्वैतत्वात्सर्वभावानाम् । सांख्यास्त्ववि-द्याध्यारोपितमेव पुरुषे कर्तृत्वं क्रियाकारकं फलं चेति कल्पयित्वाऽऽ-गमबाह्यत्वात्पुनस्तत्तत्त्वस्यन्तः परमार्थत एव भोक्तृत्वं पुरुषस्येच्छन्ति तत्त्वान्तरं च प्रधानं पुरुषात्परमार्थवस्तुभूतमेव कल्पयन्तोऽन्यतार्कि-ककृतबुद्धिविषयाः सन्तो विहन्यन्ते ।

सांख्यः प्रतिबन्दिपरिहारं शङ्कते—तत्त्वान्तरेति । भोगो नाम सुखदुःखानु-भवः । स च पुरुषस्य स्वरूपभूत इति न तत्त्वान्तरापत्तिलक्षणपरिणाम इत्यर्थः । परिणामो हि पूर्वरूपपरित्यागेन रूपान्तरापत्तिः । सा च सजातीयरूपान्तरापत्तौ वि-जातीयरूपान्तरापत्तौ वाऽनित्यत्वादिकमावहेदेवेति भोज्याविवेकोपाधिकं भोक्तृत्वम-ङ्गीकर्तव्यम् । तेन तदात्मककर्तृत्वेऽपि तुल्यमित्यभिप्रेत्य मुख्यपरिहारमाह—नेति । एकस्य वस्तुतोऽसहायस्याकर्तुराप्तकामस्यापीत्यपेरर्थः । उपाधिकृतकर्तृत्वसंभवादवि-द्यारूपसहायस्य संभवाद्भ्रान्त्या स्वस्माद्भिन्नजीवानामनाप्तकामानां संभवात्तत्पुरुषार्थाय सृष्टृत्वं तथाविधस्याप्युपपद्यत इति नाचेतनस्य चेतनाधिष्ठितस्य तद्युक्तमिति भावः । नामरूपेति । अनभिव्यक्तनामरूपेत्यर्थः । बन्धमोक्षादीत्यादिशब्देन तत्साधनमुच्यते । मोक्षस्यापि बन्धप्रतियोगित्वेन सोपाधिकत्वमुक्तम् । परमार्थस्य श्रुत्येकगम्य-त्वमाह—सर्वेति । एवंभूतस्याऽऽत्मनो न स्रष्टृत्वमित्याह—न तत्रेति । कल्प-यित्वेति । कल्पयितुं प्रवृत्ता इत्यर्थः । पुरुषस्य निर्विशेषत्वेन तस्मिन्वस्तुतः कर्तृ-त्वाद्ययोगात्तदारोपितमेवेति कल्पयितुं प्रवृत्ता अपि सर्वविरोधनिरासकागमप्रमाणैकश-

---

१ ख. ग. घ. ङ. छ. ज. झ. °णामादात्म° । २ क. °मित्तवि° । ख. घ. ङ. छ. ज. झ. °मित्तं वि° । च. °मित्ताधि° । ३ क. च. °द्याविं । ग. °द्याकृतना° । ४ ख. ग. घ. ङ. सुखा° । ५ ग. घ. ङ. °नाज्ञवि° ।

रणत्वाभावात्प्रत्यक्षादिविरोधापत्त्याऽऽरोपितत्वाङ्गीकाराच्च अस्यन्तः सर्वे परमार्थत एवेच्छन्ति । तत्राप्यचेतनस्य भोक्तृत्वायोगात्तन्मात्रमात्मनोऽङ्गी कुर्वन्ति । कर्तृत्वादिकं तु प्रधानस्याङ्गी कुर्वन्तीत्यर्थः । तर्हि तस्य को दोष इत्याशङ्क्य भोक्तृत्वाङ्गीकारे तथैव तस्यैव कर्तृत्वमपि स्यादित्यन्यैः शिक्षिताः सन्तः स्वमतात्प्रच्यवन्त इत्याह—अन्येति । कृतायाः शिक्षिताया बुद्धेर्विषयाः अधीनाः शिक्षितबुद्धय इत्यर्थः ।

तथेतरे तार्किकाः सांख्यैरित्येवं परस्परविरुद्धार्थकल्पनात आमिषार्थिन इव प्राणिनोऽन्योन्यविरुद्धमानार्थदर्शित्वात्परमार्थतत्त्वाद्दूरमेवापकृष्यन्तेऽतस्तन्मतमनादृत्य वेदान्तार्थतत्त्वमेकत्वदर्शनं प्रत्यादरवन्तो मुमुक्षवः स्युरिति तार्किकमतदोषप्रदर्शनं किंचिदुच्यतेऽस्माभिर्न तु तार्किकवत्तात्पर्येण । तथैतदत्रोक्तम्—

विवदत्स्वेव निक्षिप्य विरोधोद्भवकारणम् ।
तैः संरक्षितसद्बुद्धिः सुखं निर्वाति वेदवित् ॥

किंच भोक्तृत्वकर्तृत्वयोर्धिक्रिययोर्विशेषानुपपत्तिः । का नामासौ कर्तृत्वाज्जात्यन्तरभूता भोक्तृत्वविशिष्टा विक्रिया, यतो भोक्तैव पुरुषः कल्प्यते न कर्ता प्रधानं तु कर्त्रैव न भोक्त्रीति ।

तर्हि सांख्यशिक्षकस्य तार्किकस्य मतं ग्राह्यमत आह—तथेति । तस्यापि सांख्येन शिक्षितत्वान्न तदपि ग्राह्यमित्यर्थः । तर्हि कस्य तार्किकस्य मतं ग्राह्यमित्याशङ्क्य न कस्यापीत्याह—इत्येवमिति । तर्हि त्वया तार्किकमतं किमर्थं दूष्यते । परस्परमेव तैर्दूषितत्वात्तव तद्वदेव द्वेषादिमत्त्वप्रसङ्गाच्चेत्यत आह—अत इति । विरोधोद्भवकारणमिति । पारमार्थिकतया भेददर्शनमित्यर्थः । संरक्षितेति । भेददर्शनस्य परस्परोक्तदोषग्रस्तत्वाद्द्वैतमेव निर्दुष्टमिति निश्चितबुद्धिः सन्निर्वाति सर्वविकल्पेभ्य उपशान्तो भवतीत्यर्थः । दोषप्रदर्शनं किंचित्क्रियत इति यदुक्तं तदेव प्रपञ्चयन्कर्तृत्वादेरारोपितत्वमेव परेणापि वक्तव्यमित्याह—किंचेत्यादिना । तत्राऽऽदौ भोक्तृत्वकर्तृत्वयोर्विशेषस्य वक्तुमशक्यत्वात्तयोराश्रयव्यवस्था न संभवतीत्याह—भोक्तृत्वेति ।

ननूक्तं पुरुषश्चिन्मात्र एव स च स्वात्मस्थो विक्रियते भुञ्जानो न तत्त्वान्तरपरिणामेन । प्रधानं तु तत्त्वान्तरपरिणामेन विक्रियतेऽतोऽनेकमबुद्धमचेतनं चेत्यादिधर्मवत्त्वाद्विपरीतः पुरुषः । नासौ विशेषो वाङ्मात्र-

१ क. च. °न्योन्यं वि° । २ ख. घ. ङ. °मानद° । ३ क. च. °मते दोषद° ।

स्वात्, प्राग्भोगोत्पत्तेः केवलचिन्मात्रस्य पुरुषस्य भोक्तृत्वं नाम विशेषो भोगोत्पत्तिकाले चेज्जायते निवृत्ते च भोगे पुनस्तद्विशेषादपेतश्चिन्मात्र एव भवतीति चेन्महदाद्याकारेण च परिणम्य प्रधानं ततोऽपेत्य पुनः प्रधानं स्वरूपेणावतिष्ठत इत्यस्यां कल्पनायां न कश्चिद्विशेष इति वाङ्मात्रेण प्रधानपुरुषयोर्विशिष्टविक्रिया कल्प्यते ।

आशयमविद्वाञ्शङ्कावसरोक्तं विशेषं शङ्कते—नन्विति । स्वात्मस्थो विक्रियत इति । चिद्रूपेण विक्रियत इत्यर्थः । तत्त्वान्तरेति । अनेकत्वाशुद्ध्यादियुक्तस्वविलक्षणमहदादिरूपेणेत्यर्थः । पुरुषस्य चिद्रूपेणैव परिणामान्न रूपान्तरापत्तिरशुद्ध्यादिकं वा । प्रधानस्य त्वाकारान्तरेण परिणामात्पूर्वरूपत्यागादशुद्ध्यादिकं स्यादित्यर्थः । किंचिद्रूपेण परिणाम आगन्तुको वा न वा । आद्य आगन्तुकविशेषवत्त्वेनानित्यत्वाद्यापत्त्या प्रधानादविशेषः । भोगानन्तरं पुनः स्वरूपावस्थानान्नानित्यत्वादिदोषश्चेत्प्रधानस्यापि प्रलये तथात्वाङ्गीकारान्न तयोर्विशेषः स्यादिति दूषयति—नासाविति । संग्रहवाक्यं विवृणोति—प्रागिति । अस्यां कल्पनायामिति । चिद्रूपेण तत्त्वान्तररूपेण विक्रियाकल्पनायामपि विचार्यमाणेऽर्थतो न कश्चिदपि विशेषो लभ्यत इति तयोर्विशिष्टविक्रियेति वाङ्मात्रेणैव कल्प्यत उच्यत इत्यर्थः ।

अथ भोगकालेऽपि चिन्मात्र एव प्राग्वत्पुरुष इति चेन्न तर्हि परमार्थतो भोगः पुरुषस्य, भोगकाले चिन्मात्रस्य विक्रिया परमार्थैव तेन भोगः पुरुषस्येति चेन्न । प्रधानस्यापि भोगकाले विक्रियावत्त्वाद्भोक्तृत्वप्रसङ्गः । चिन्मात्रस्यैव विक्रिया भोक्तृत्वमिति चेदौष्ण्याद्यसाधारणधर्मवतामग्न्यादीनामभोक्तृत्वे हेत्वनुपपत्तिः ।

द्वितीयं शङ्कते—अथेति । चिन्मात्र एवेति । नत्वागन्तुकं रूपान्तरमित्यर्थः । तर्हि कर्मजन्यः कादाचित्को भागो न सिध्येदित्याह—न तर्हीति । एतद्दोषपरिहारायाऽऽगन्तुकं परिणाममङ्गीकृत्य भोगकालीनविक्रियामात्रं भोगः । स च पुरुषस्यैव न प्रधानस्येति भोगसदसत्त्वविशेषमात्रेण शङ्कते—भोगकाल इति । तत्रापि किं भोगकालीनविक्रियामात्रं भोग उत तत्कालीनचिन्मात्रगतविक्रियां भोग इति विकल्याऽऽद्ये भोगकाले प्रधानस्यापि सुखाद्याकारेण विक्रियावत्त्वाद्भोगः स्यादित्याह—नेति । द्वितीयं शङ्कते—चिन्मात्रस्यैवेति । चिन्मात्रस्यैव विक्रियेत्येवकारेण धर्म्यन्तरगतविक्रियानपेक्षा चैतन्यविक्रिया भोग इत्युच्यते वा चैतन्यमात्रगता तदसाधारणा विक्रिया भोग इति वा । नाऽऽद्यः । सुखादिरूपप्रधानविक्रियां विना भोगासिद्धेः । न द्वितीयः । चैतन्यासाधारणविक्रियैव भोग इत्यत्र हेत्वभावात्स्वासाधारणविक्रिया भोग इति वक्तव्यम् । तथा चातिप्रसङ्गः । सर्वस्यापि स्वासाधारणविक्रि-

---

१ क. घ. °यावत्त्वं भो° ।

यावत्त्वात् । भोगकालीनासाधारणविक्रियावत्त्वं तु प्रधानस्याप्यस्ति । तत्कालीनसुखादिविक्रियावत्त्वादिति दूषयति—औष्ण्येति ।

प्रधानपुरुषयोर्द्वयोर्युगपद्भोक्तृत्वमिति चेन्न । प्रधानस्य पारार्थ्यानुपपत्तेः । न हि भोक्तृद्वयोरितरेतरगुणप्रधानभाव उपपद्यते । प्रकाशयोरिवेतरेतरप्रकाशने । भोगधर्मवति सत्त्वाङ्गिनि चेतसि पुरुषस्य चैतन्यप्रतिबिम्बोदयोऽविक्रियस्य पुरुषस्य भोक्तृत्वमिति चेन्न । पुरुषस्य विशेषाभावे भोक्तृत्वकल्पनानर्थक्यात् ।

ननु भोगकालीना साधारणविक्रियैव भोगः। न चाग्न्यादेस्तत्काले नियमेन विक्रियाऽस्ति । न च प्रधानस्यापि प्रसङ्ग इष्टापत्तिरिति शङ्कते—प्रधानेति । भोक्ता हि शेषी, उभयोरपि भोक्तृत्वे शेषशेषिभावो न स्यादित्याह—नेति । ननु भोगः सत्त्वगुणप्रधानचेतोरूपेण परिणतप्रकृतेरेव धर्मस्तस्या विक्रियोपपत्तेर्न पुरुषस्य तस्याविक्रियत्वात् । न च तस्य भोगाभावप्रसङ्गस्तस्य तथाविधचित्तप्रतिबिम्बितत्वमात्रेण भोक्तृत्वव्यपदेश इति शङ्कते—भोगधर्मवतीति । सत्त्वाङ्गिनीति । सत्त्वगुणोऽङ्गी प्रधानं यस्य तस्मिंश्चेतसीत्यर्थः । तर्हि चित्तगतभोगेन चैतन्ये विशेषो जायते वा न वेति विकल्प्य न द्वितीय इत्याह—नेति ।

भोगरूपश्चेदनर्थः पुरुषस्य नास्ति सदा निर्विशेषत्वात्पुरुषस्य कस्यापनयनार्थं मोक्षसाधनं शास्त्रं प्रणीयतेऽविद्याध्यारोपितानर्थापनयनाय शास्त्रप्रणयनमिति चेत्परमार्थतः पुरुषो भोक्तैव न कर्ता प्रधानं कर्त्रैव न भोक्तृ परमार्थसद्वस्त्वन्तरं पुरुषाच्चेतीयं कल्पनाऽऽगमबाह्या व्यर्था निर्हेतुका चेति नाऽऽदर्तव्या मुमुक्षुभिः ।

किंचास्मिन्पक्षे स्वकीयशास्त्रप्रणयनं च व्यर्थं स्यादित्याह—भोगरूपश्चेदिति । आद्ये स विशेषः सत्यो वाऽसत्यो वेति विकल्प्य सत्यविशेषवत्त्वे पुरुषस्य विकारित्वं स्यादिति मनसि संनिधायास्याऽऽरोपितविशेषवत्त्वमस्तीत्याद्यं शङ्कते—अविद्येति । अनर्थेति । भोगरूपेत्यर्थः । तर्हि भोक्तृत्वविशेषवत्कर्तृत्वादिविशेषस्य प्रधानादेश्चाऽऽरोपितत्वमेवाङ्गी कर्तुं युक्तं नार्थवैशसमस्मदुक्तरीत्या बन्धमोक्षव्यवहारसिद्ध्युपपत्तेः । तथा कल्पनायां प्रयोजनाभावात्प्रमाणाभावात्प्रत्युत सर्वश्रुतिविरोधापत्तेश्चेत्याह—परमार्थत इति । पुरुषाद्वस्त्वन्तरं च प्रधानमित्यन्वयः । उक्तदोषजातं सांख्यस्य मतं मोक्षकामिना नाऽऽदर्तव्यमिति ज्ञापनार्थमुक्तं न तु द्वेषपक्षपातादित्याशयेनाऽऽह—इति नाऽऽदर्तव्येति ।

१ क. च. °धी भोगश्च शेष उ° । २ ख. घ. ङ. °सि संधा° । ग. °सि निधा° । ३ ग. °पवत्त्वमे ।

एकत्वेऽपि शास्त्रप्रणयनाद्यानर्थक्यमिति चेन्नाभावात् । सत्सु हि शास्त्रप्रणेत्रादिषु तत्फलार्थिषु च शास्त्रस्य प्रणयनमनर्थकं सार्थकं वेति विकल्पना स्यात् । न ह्यात्मैकत्वे शास्त्रप्रणेत्रादयस्ततो भिन्नाः सन्ति तदभाव एवं विकल्पनैवानुपपन्ना । अभ्युपगत आत्मैकत्वे प्रमाणार्थश्चाभ्युपगतो भवता यदात्मैकत्वमभ्युपगच्छता तदभ्युपगमे च विकल्पानुपपत्तिमाह शास्त्रं ' यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ' इत्यादि । शास्त्रप्रणयनाद्युपपत्तिं चाऽऽहान्यत्र परमार्थवस्तुस्वरूपादविद्याविषये, ' यत्र हि द्वैतमिव भवति ' इत्यादि विस्तरतो वाजसनेयके ।

आत्मैकत्वपक्षेऽपि निरसनीयबन्धाभावाच्छास्त्रप्रणयनानर्थक्यमिति शङ्कते—एकत्वेऽपीति । किमात्मैकत्वनिश्चयवन्तं प्रति तस्याऽऽनर्थक्यमुच्यते तद्विपरीतं प्रति वेति विकल्प्याऽऽद्यं प्रति प्रणयनाभावादानर्थक्यदोषाभावमाह—नाभावादिति । दोषापादनाभावादित्यर्थः । संग्रहवाक्यं विवृणोति—न ह्यात्मैकत्व इति । निश्चित इति शेषः । तदभावे शास्त्रप्रणेत्राद्यभाव इयं(एवं) [वि]कल्पनैवार्थवदनर्थकं चे(वे)ति विकल्पनैवानुपपन्नेत्यर्थः । नैवानुपपन्नेति पाठे तु तदभाव इत्यनेनैकत्वनिश्चयाभावोऽभिधीयते * । तदानीं निरसनीयबन्धादिसत्त्वादियं कल्पना बन्धनिवृत्त्यर्थं शास्त्रप्रणयनकल्पना नानुपपन्नेति योज्यम् । किंचाऽऽत्मैकत्वनिश्चये जाते तन्निश्चयजनकत्वेन शास्त्रार्थवत्त्वस्य स्वानुभवसिद्धत्वात्तेनेयं शङ्का कर्तुमपि न शक्येत्याह—अभ्युपगत इति । प्रमाणार्थ इति । प्रमाणस्य शास्त्रस्यार्थः प्रयोजनमित्यर्थः । एकत्वनिश्चयवन्तं प्रति शास्त्रानर्थक्यकल्पनाभावः श्रुत्याऽप्युक्त इत्याह—तदभ्युपगमे चेति । अत्राभ्युपगमो निश्चयः । एकत्वनिश्चयाभावदशायां तु निरसनीयारोपितबन्धसत्त्वान्नाऽऽनर्थक्यं तदपि श्रुत्योक्तमित्याह—शास्त्रप्रणयनेति । अनेन द्वितीयकल्पो निरस्तः । श्रुतिगतं यत्पदं व्याचष्टे—अन्यत्रेति ।

अत्र च विभक्ते विद्याविद्ये परापरे इत्यादावेव शास्त्रस्यातो न + तार्किकवादभटप्रवेशो वेदान्तराजप्रमाणबाहुगुप्त इहात्मैकत्वविषय इति । एतेनाविद्याकृतनामरूपाद्युपाधिकृतानेकशक्तिसाधनकृतभेदव-

---

* क. पुस्तक एकत्वनिश्चयाभावो विधीयत इति पाठष्टिप्पण्याम् । + अत्र यद्यपि तार्किकभटैः प्रवेश्य इति तथा गुप्त इहाऽऽत्मैकत्वविषय इत्यत्र गुप्त आत्मैकत्वविषय इतीहपदरहितः प्रथमान्तपाठ एवेत्येतट्टीकापर्यालोचनाज्ज्ञायते तथाऽपि सर्वेष्वप्यादर्शपुस्तकेषु तार्किकवादभटप्रवेश इत्येव तथेहपदसहितः सप्तम्यन्तपाठ एव विद्यतेऽतः सोऽपि तार्किकवादभटानां प्रवेश इत्यर्थकषष्ठीसमासस्वीकारेण लापयितुं शक्य इत्यतश्च स एव स्थापितः । एतत्पाठलापनटीका तु भ्रष्टेदानीमिति ज्ञातव्यम् । अथवा टीकानुसारी पाठ एवाऽऽदरणीयः ।

ब्रह्मलक्षणः सृष्ट्यादिकर्तृत्वे साधनाद्यभावो दोषः प्रत्युक्तो वेदितव्यः पौरुक्त आत्मानर्थकर्तृत्वादिदोषश्च ।

अथर्वणीयमन्त्रोपनिषदि द्वे विद्ये वेदितव्ये इत्युपक्रम्यापरविद्या, ऋग्वेदादिरूपा परा त्वदृश्यत्वादिगुणकप्रत्यस्तमितसर्वद्वैतवस्तुविषयेत्युक्त्या विद्याविद्ययोर्विषयभेदः शास्त्रस्याऽऽदावेव सूचित इत्याह—अत्र चेति । अद्वैतवादे सर्वशङ्कानां श्रुतिप्रामाण्येनैव निरासात्तार्किकोत्प्रेक्षितशङ्काशुकस्यापि नात्र प्रवेश इत्युपसंहरति—अत इति । राजप्रमाणेति । प्रमाणराजेत्यर्थः । राजदन्तादित्वात्परनिपातः । वेदान्तप्रमाणमेव राजेव राजा तद्व्याहतवस्तुदुष्कन्यायास्तैर्गुप्त आत्मैकत्वमेव विषय इव देश इव देशो रक्षणीयत्वात्स तार्किकभटैर्योधैर्न प्रवेश्य इत्यन्वयः । पूर्ववाद्युक्तं दोषं निराकरोति—एतेनेति । उपाधिकृता अनेकाः शक्तयः साधनानि च तत्कृतस्य भेदस्यानेकत्वस्य सत्त्वादित्यर्थः । आत्मेति । आत्मनो योऽनर्थः संसारस्तत्कर्तृत्वमित्यर्थः । आदिशब्देनाऽऽप्तकामत्वेन प्रयोजनापेक्षानुपपत्तिः संगृहीता । कल्पनया स्वव्यतिरिक्तस्य जीवस्य सत्त्वात्तस्य संसारो नाऽऽत्मनः । तदीयकर्मफलदानार्थं चाऽऽप्तकामस्यापि सृष्ट्यादिप्रवृत्तिः संभवति । सर्वव्यवहारस्यापि स्वप्नतुल्यत्वाद्वा स्वप्न इव सर्वमप्युपपद्यत इति सूत्रभाष्यादावेव परिहृत इत्यर्थः ।

यस्तु दृष्टान्तो राज्ञः सर्वार्थकारिणि कर्तर्युपचाराद्राजा कर्तेति सोऽत्रानुपपन्नः । स ईक्षांचक्र इति श्रुतेर्मुख्यार्थबाधनात्प्रमाणभूतायाः । तत्र हि गौणी कल्पना शब्दस्य यत्र मुख्यार्थो न संभवति । इह त्वचेतनस्य मुक्तबद्धपुरुषविशेषापेक्षया कर्तृकर्मदेशकालनिमित्तापेक्षया च बन्धमोक्षादिफलार्था नियता पुरुषं प्रति प्रवृत्तिर्नोपपद्यते । यथोक्तसर्वज्ञेश्वरकर्तृत्वपक्षे तूपपन्ना ॥ २ ॥

सांख्येन स्वपक्षे पुरुषशब्दस्येक्षणस्य चोपपत्तिरुक्ता तामनूद्य निराकरोति—यस्त्विति । यजमानः प्रस्तर इत्यादावुपचारो दृष्ट इत्याशङ्क्याऽऽह—तत्र हि गौणीति । प्रधानपक्षे न केवलमीक्षणश्रुत्यनुपपत्तिर्वस्तुतस्तस्य स्रष्टृत्वमपि न संभवतीत्याह—इह त्विति । मुक्तान्वर्जयित्वा बुद्धान्प्रत्येव प्रवृत्तिः कर्तृकर्माद्यपेक्षया बन्धमोक्षादिशब्दितभोगापवर्गार्था व्यवस्थिता प्रवृत्तिर्नोपपद्यत इत्यर्थः । अनेन पुरुषार्थं प्रयोजनमुरीकृत्य प्रधानं प्रवर्तत इति यदुक्तं शङ्कावसरे तन्निरस्तम् । ईश्वरकारणवादे तु नायमपि दोष इत्याह—यथोक्तेति ॥ २ ॥

---

१ ख. ग. घ. ङ. °रा तु द°। २ क. च. °वेद्य इ°। ३ ख. ग. घ. ङ. छ. °यते सू°। ४ ख. घ. ङ. °बन्धपु°। ५ ख. ग. घ. ङ. °मैका°। ६ ख. ग. घ. ङ. °त्तिमुक्ता। ७ क. °तस्तु तस्य°

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः
पृथिवीन्द्रियं मनः । अन्नमन्नाद्वीर्यं तपो मन्त्राः
कर्म लोका लोकेषु च नाम च ॥ ४ ॥

ईश्वरेणैव[1] सर्वाधिकारी प्राणः पुरुषेण सृज्यते । कथं, स पुरुष उक्तप्रकारेणेक्षित्वा[2] प्राणं हिरण्यगर्भाख्यं सर्वप्राणिकरणाधारमन्तरात्मानमसृजत सृष्टवान् । अतः प्राणाच्छ्रद्धां सर्वप्राणिनां[3] शुभकर्मप्रवृत्तिहेतुभूताम् । ततः कर्मफलोपभोगसाधनाधिष्ठानानि कारणभूतानि महाभूतान्यसृजत । खं शब्दगुणम् । वायुं स्वेन स्पर्शेन कारणगुणेन च विशिष्टं द्विगुणम् । तथा ज्योतिः स्वेन रूपेण पूर्वाभ्यां च विशिष्टं त्रिगुणं शब्दस्पर्शाभ्याम् । तथाऽपो रसेन गुणेनासाधारणेन पूर्वगुणानुप्रवेशेन च चतुर्गुणाः । तथा गन्धगुणेन पूर्वगुणानुप्रवेशेन च पञ्चगुणा पृथिवी । तथा तैरेव भूतैरारब्धमिन्द्रियं द्विप्रकारं बुद्ध्यर्थं कर्मार्थं च दशसंख्यम् । तस्य चेश्वरमन्तःस्थं संशयसंकल्पलक्षणं मनः । एवं प्राणिनां कार्यं कारणं च सृष्ट्वा तत्स्थित्यर्थं व्रीहियवादिलक्षणमन्नम् । ततश्चान्नादध्यमानाद्वीर्यं सामर्थ्यं बलं सर्वकर्मप्रवृत्तिसाधनम् । तद्वीर्यवतां च प्राणिनां तपो विशुद्धिसाधनं संकीर्त्यमानानां, मन्त्रास्तपोविशुद्धान्तर्बहिःकरणेभ्यः कर्मसाधनभूता ऋग्यजुःसामाथर्वाङ्गिरसः । ततः कर्माग्निहोत्रादिलक्षणम् । ततो लोकाः कर्मणां फलम् । तेषु च सृष्टानां प्राणिनां नाम च देवदत्तो यज्ञदत्त इत्यादि । एवमेताः कलाः प्राणिनामविद्यादिदोषबीजापेक्षया सृष्टास्तैमिरिकदृष्टिसृष्टा इव द्विचन्द्रमशकमक्षिकाद्याः स्वप्नदृक्सृष्टा इव च सर्वपदार्थाः पुनस्तस्मिन्नेव पुरुषे प्रलीयन्ते हित्वा नामरूपादिविभागम् ॥ ४ ॥

एवं परपक्षं निराकृत्य प्रकृतश्रुतिव्याख्यानं कुर्वन्स प्राणमसृजतेत्यस्य तात्पर्यार्थमाह—ईश्वरेणेवेति[5] । राज्ञेवेत्यर्थः । अक्षरार्थं प्रश्नपूर्वकमाह—कथमिति । हिरण्यगर्भाख्यमिति । हिरण्यगर्भ इत्याख्या येनोपाधिनाऽऽत्मनो भवति तं बुद्ध्यभिन्नं सर्वप्राणं समष्टिप्राणमित्यर्थः । यथाश्रुते कस्मिन्नहमुत्क्रान्त इत्यादिनाऽऽत्मन उत्क्रान्त्याद्युपाधिसृष्टेः प्रस्तुतत्वाद्धिरण्यगर्भस्य जीवस्यातथात्वादुपक्रमविरोधापत्तेः । हिरण्यगर्भाख्यामित्युक्ति-

---

१ क. ख. घ. ङ. च. छ. ज. °रेणैव । २ क. °त्वा सर्वप्रा° । ख. ग. घ. ङ. °त्वा स प्रा° । ३ ख. ग. घ. ङ. °णिक° । ४ ख. ग. घ. ङ. च. °णावे° । ५ क. च. °कलादिल° । ६ क. °रेणैवे° । ७ ख. घ. ङ. °राज्ञैवे° । ८ ख. ग. घ. ङ. च. °स्मिन्नह° ।

स्त्वात्मनो हिरण्यगर्भादिसंसारिभावोऽप्येतदुपाधिक इति सूचयितुमिति बोध्यम्। तस्य समष्टित्वमाह—सर्वेति। अन्तरात्मानमिति। सर्वस्थूलशरीरान्तरत्वादात्मबुद्धिगोचरत्वाच्चान्तरात्मा स इत्यर्थः। तत इत्यानन्तर्यार्थेयं पञ्चमी। एवमुत्तरत्रापि। न च भूतकार्यत्वात्प्राणस्य कथं ततः पूर्वकालीनत्वमिति वाच्यम्। सत्यम्। सूक्ष्मभूतसृष्ट्यनन्तरं प्राणमसृजतेति कल्पनीयत्वात्। न चैतदनन्तरं भूतसृष्ट्युक्तिविरोधशङ्का। तस्याः पञ्चीकृतस्थूलभूतविषयत्वोपपत्तेः। अत एव भोगसाधनाधिष्ठानानीत्युक्तम्। सूक्ष्माणां तथात्वायोगात्। न चैवमपि स्थूलभूतसृष्ट्यनन्तरमिन्द्रियमनःसृष्ट्युक्तिविरोधः। भूतारब्धदेहाधिष्ठितानामेव तेषां कार्यक्षमत्वेन तेषां तदनन्तरत्वोक्तिरिति भावः। भोगसाधनाधिष्ठानत्वं भूतानां तत्कारणत्वादित्याह—कारणभूतानीति। तेषां भूतानां लक्षणतया खं शब्दगुणमित्यादिनाऽसाधारणगुणा उक्ताः। पूर्वपूर्वगुणानुवृत्तिस्तु पूर्वपूर्वस्योत्तरोत्तरोपादानत्वसूचनार्थं स्थौल्यतारम्यसिद्ध्यर्थं चोक्तेति बोध्यम्। वायुमिति। श्रुतौ वायुरित्यादिप्रथमा द्वितीयार्थाः। प्राणमसृजतेति द्वितीययोपक्रमात्। तैरेवेति। अपञ्चीकृतावस्थाथामित्यर्थः। तस्य चेश्वरमिति। नियामकमित्यर्थः। संकीर्यमाणानामिति। अविशुद्धसत्त्वतया पापाचरणेन तैः पापैः संकीर्यमाणानां संकरपरिहाराय चित्तशुद्धिसाधनं तपोऽसृजतेत्यर्थः। फलमिति। लोक्यते भुज्यत इति लोकः फलमित्यर्थः। नाम चेति। ब्राह्मणादिनाम्नोक्तव्यवहारासंकरार्थमित्यर्थः। नन्वीश्वरंसृष्टत्वोक्त्या कलानां सत्यत्वमङ्गीकर्तव्यम्। आरोपे शुक्तिरजतादौ सृष्टत्वव्यवहारभावादित्याशङ्क्याङ्गुल्यवष्टम्भनेत्रमर्दनादिना प्रयत्नेन सृष्टस्य द्विचन्द्रमशकमक्षिकादेरारोपत्वदर्शनात्। अथ रथान्ययोगान्पथः सृजत इति सृष्टत्वेनोक्तस्वप्नपदार्थस्य च भ्रमत्वदर्शनान्नैवमित्याह—एवमेता इति। अविद्याकामकर्मादिदोषरूपं यद्बीजं तदपेक्षया तत्साधनीकृत्येत्यर्थः। तैमिरिकशब्दो नेत्रेऽङ्गुल्यवष्टम्भाद्युपलक्षणार्थः। एवमात्मप्रतिपत्त्यर्थमप्यारोपमुक्त्वा तदपवादमवतारयति—पुनस्तस्मिन्नेवेति ॥ ४ ॥

कथम्—

स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं

१ क. ख. घ. °नवस्त्वमिति भावः। भू°। २ क. ख. घ. ङ. च. °स्सृष्टृत्वो°। ३ क. ख. घ. ङ. च. °दौ सष्टृत्व°। ४ क. ख. घ. ङ. च. °ति सष्टृत्वे°।

प्राप्यास्तं गच्छन्ति भिद्येते चाऽऽसां नाम-
रूपे पुरुष इत्येवं प्रोच्यते स एषोऽ-
कलोऽमृतो भवति तदेष श्लोकः ॥ ५ ॥

स दृष्टान्तः । यथा लोक इमा नद्यः स्यन्दमानाः स्रवन्त्यः समुद्रा-
यणाः समुद्रोऽयनं गतिरात्मभावो यासां ताः समुद्रायणाः समुद्रं प्राप्यो-
पगम्यास्तं नामरूपतिरस्कारं गच्छन्ति । तासां चास्तं गतानां भिद्येते
विनश्येते (श्यतोः) नामरूपे गङ्गायमुनेत्यादिलक्षणे । तदभेदे समुद्र
इत्येवं प्रोच्यते तद्वस्तूदकलक्षणमेवं यथाऽयं दृष्टान्तः । उक्तलक्षणस्य प्रकृत-
स्यास्य पुरुषस्य परिद्रष्टुः परि समन्ताद्द्रष्टुर्दर्शनस्य कर्तुः स्वरूपभूतस्य
यथाऽर्कः स्वात्मप्रकाशस्य कर्ता सर्वतस्तद्वदिमाः षोडश कलाः प्राणा-
द्या उक्ताः कलाः पुरुषायणा नदीनामिव समुद्रः पुरुषोऽयनमात्मभाव-
गमनं यासां कलानां ताः पुरुषायणाः पुरुषं प्राप्य पुरुषात्मभावमुपगम्य
तथैवास्तं गच्छन्ति । भिद्येते चाऽऽसां नामरूपे कलानां प्राणाद्याख्या
रूपं च यथास्वम् । भेदे च नामरूपयोर्यदनष्टं तत्त्वं पुरुष इत्येवं प्रो-
च्यते ब्रह्मविद्भिः । य एवं विद्वान्गुरुणा प्रदर्शितकलाप्रलयमार्गः स
एष विद्यया प्रविलापितास्वविद्याकामकर्मजनितासु प्राणादिकलास्वक-
लोऽविद्याकृतकलानिमित्तो हि मृत्युस्तदपगमेऽकलत्वादेवामृतो भवति,
तदेतस्मिन्नर्थ एष श्लोकः ॥ ५ ॥

ग्रामादिवद्भेदेन गन्तव्यत्वभ्रमं वारयति—आत्मभाव इति । अस्तशब्देन नाशो
नाभिधीयते भेदकोपाधिनामरूपयोर्नाशेऽपि स्वरूपस्य समुद्रात्मना विद्यमानत्वादित्याह-
नामरूपतिरस्कारमिति । पूर्वरूपतिरस्कारमित्यर्थः । तद्वस्त्विति । नामरूपनाशा-
नन्तरं परिशिष्टमुदकलक्षणं वस्तु समुद्र इत्येवोच्यत इत्यन्वयः । पुरुषस्येति कर्मणि
षष्ठी । पुरुषं स्वात्मरूपम् । परितः सर्वं स्वरूपत्वेन पश्यत इत्यर्थः । द्रष्टुरित्युक्त
आगन्तुकस्य दर्शनस्य कर्ता प्रतीयत इत्यत आह—दर्शनस्य कर्तुः स्वरूपभूतस्ये-
ति । स्वरूपत्वे दर्शनस्य तत्र कर्तृत्वानुपपत्तेस्तदर्थकतृच्प्रत्ययविरोध इत्याशङ्क्यार्कः
सर्वतः स्वप्रकाशक इत्यत्र यथा कर्त्रर्थकस्य प्रत्ययस्योपचरितत्वं तद्वदिहापीत्याह—
यथाऽर्क इति । नदीनामिवेति । इवशब्दस्तथाशब्दार्थे । यथा नदीनां समुद्रोऽयन
तथा पुरुषोऽयनमित्यन्वयः । अस्तगमनस्वरूपमाह—भिद्येते इति । नामरूपभेद
एवास्तगमनमिहेत्यर्थः । यथास्वमिति । यस्य यत्स्वरूपं प्राणाद्यात्मकं तदपि भि-

---

१ क. च. छ. °ते तासां । २ क. च. छ. °ते तासां । ३ क. च. °रूपेण प° ।

यत इत्यन्वयः । पुरुष इत्येवं प्रोच्यत इत्यस्यार्थमाह–भेदे चेति । यदनष्टमिति । कलानां हि रूपमारोप्याधिष्ठानोभयात्मकं सत्यानृतामिथुनरूपं, तत्राऽऽरोप्यस्य नामरूपात्मकस्य भेदेऽधिष्ठानात्मकं रूपं पुरुषात्मनोच्यत इत्यर्थः । यथा समुद्रस्वरूपभूतं जलं मेघैराकृष्याभिवृष्टं गङ्गादिनामरूपोपाधिना समुद्राद्भिन्नमिव व्यवह्रियमाणं तदुपाधिविगमे समुद्रस्वरूपमेव प्रतिपद्यत एवमविद्याकृतनामरूपोपाधिवशादात्मनो भिन्नमिव स्थितं सर्वं जगाद्विद्ययाऽविद्याकृतनामरूपविगमे ब्रह्ममात्रतयाऽवशिष्यत इत्यर्थः । एवं प्राणादिकलोपाधिक आत्मन उत्क्रमणादिशब्दितमरणादिव्यवहार इत्युक्तेः प्रयोजनं प्राणादिनिवृत्तावुत्क्रमणादिसर्वसंसारधर्मरहितात्मस्वरूपावस्थानरूपं दर्शयितुं स एष इति वाक्यं व्याचष्टे—य एवं विद्वानित्यादिना ॥ ५ ॥

अरा ए(इ)व रथनाभौ कला यस्मिन्प्रतिष्ठिताः । तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ ६ ॥

अरा रथचक्रपरिवारा[1] इव रथनाभौ रथचक्रस्य नाभौ यथाप्रवेशितास्तदाश्रया भवन्ति यथा तथेत्यर्थः । कलाः प्राणाद्या यस्मिन्पुरुषे प्रतिष्ठिता उत्पत्तिस्थितिलयकालेषु तं पुरुषं कलानामात्मभूतं वेद्यं वेदनीयं पूर्णत्वात्पुरुषं पुरि शयनाद्वा वेद जानीयात् । यथा हे शिष्या मा वो युष्मान्मृत्युः परिव्यथा मा परिव्यथयतु । न चेद्विज्ञायेत पुरुषो मृत्युनिमित्ता व्यथामापन्ना दुःखिन एव यूयं स्थ । अतस्तन्मा भूद्युष्माकमित्यभिप्रायः ॥ ६ ॥

---

[2]परिवारा इति । नाभेः परितो नाभौ नेम्यां च प्रोतास्तिर्यक्काष्ठविशेषा इत्यर्थः । यथा प्रवेशिता इति । यथावत्सम्यक्प्रवेशिता इत्यर्थः । माङोऽर्थं व्यतिरेकप्रदर्शनेन स्पष्टयति—न चेदिति ॥ ६ ॥

तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद । नातः परमस्तीति ॥ ७ ॥

तानेवमनुशिष्य शिष्यांस्तान्होवाच पिप्पलादः किलैतावदेव वेद्यं परं ब्रह्म वेद विजानाम्यहमेतत् । नातोऽस्मात्परमस्ति प्रकृष्टतरं वेदितव्यमित्येवमुक्त्वाऽशिष्याणामविदितशेषास्तित्वाशङ्कानिवृत्तये कृतार्थबुद्धिजननार्थं च ॥ ७ ॥

---

१ ग. °रिचारा । २ ग. °रिचारा ।

शिष्याणां कृतार्थताबुद्धिजननार्थं तानित्यादि वाक्यं व्याचष्टे—तानेवमिति ॥७॥

ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकम-
विद्यायाः परं पारं तारयसीति । नमः पर-
मऋषिभ्यो नमः परमऋषिभ्यः ॥ ८ ॥
ॐ भद्रं कर्णेभिरिति शान्तिः ॥
इत्यथर्ववेदीयप्रश्नोपनिषदि षष्ठः प्रश्नः ॥ ६ ॥

इत्यथर्ववेदीया प्रश्नोपनिषत्समाप्ता ॥

ततस्ते शिष्या गुरुणाऽनुशिष्टास्तं मुनिं कृतार्थाः सन्तो विद्यानिष्क्रयमपश्यन्तः किं कृतवन्त इत्युच्यते—अर्चयन्तः पूजयन्तः पादयोः पुष्पाञ्जलिप्रकिरणेन प्रणिपातेन च शिरसा, किम्, ऊचुरित्याह—त्वं हि नोऽस्माकं पिता ब्रह्मशरीरस्य विद्यया जनयितृत्वान्नित्यस्याजरामरस्याभयस्य । यस्त्वमेवास्माकमविद्याया विपरीतज्ञानाज्जन्मजरामरणरोगदुःखादिग्रहादविद्यामहोदधेर्विद्याप्लवेन परमपुनरावृत्तिलक्षणं मोक्षाख्यं महोदधेरिव पारं तारयस्यस्मानित्यतः पितृत्वं तवास्मान्प्रत्युपपन्नमितरस्मात् । इतरोऽपि हि पिता शरीरमात्रं जनयति तथाऽपि स प्रपूज्यतमो लोके किमु वक्तव्यमात्यन्तिकाभयदातुरित्यभिप्रायः । नमः परमऋषिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमः परमऋषिभ्य इति द्विर्वचनमादरार्थम् ॥ ८ ॥

इति प्रश्नोपनिषदि षष्ठः प्रश्नः ॥ ६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपाद-
शिष्यश्रीमच्छंकरभगवत्कृतं प्रश्नोपनिषद्भाष्यं
समाप्तिमगमत् ॥

प्रकिरणेनेति । प्रक्षेपेणेत्यर्थः । अतः पितृत्वं तवेति ।

जनकश्चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥

---

१ क. °पि संत्र° ।

इति स्मृतेरित्यर्थः । योऽस्माकमिति हेतूक्तेस्तात्पर्यं वदन्पितृत्वोक्तिमात्रेण विद्यानिष्क्रयार्थं किं दत्तमित्यपेक्षायां स्वशरीरमेव परिचारकतया दासभावेन गुरवे दत्तमित्याह—इतरस्मादिति । पितृत्वादेव किं पूज्यतरत्वं (१) परिचार्यत्वं स्वामित्वं (१) किमु वक्तव्यमित्यर्थः । अत एव वाजसनेयके मां चापि सह दास्यायेतीत्युक्तमिति भावः ॥ ८ ॥

इत्यानन्दज्ञानविरचितप्रश्नोपनिषद्भाष्यटीकायां षष्ठः प्रश्नः ॥ ६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दज्ञानविरचिताऽऽथर्वण-
प्रश्नोपनिषद्भाष्यटीका समाप्ता ॥

इति सटीकभाष्योपेता प्रश्नोपनिषत्समाप्ता ॥

---

१ क. ख. ग. घ. ङ. च. दास्यभा° । २ ख. ग. घ. ङ. च. °मत्कैवल्येन्द्रशिष्यब्रह्मेन्द्रगुरुचरणसेविनारायणेन्द्रसरस्वतीविरचितं प्रश्नोपनिषद्भाष्यविवरणं समाप्तम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

अथ शंकरानन्दविरचितप्रश्नोपनिषद्दीपिकारम्भः ।

प्रश्नमुण्डकमन्त्राणां ब्राह्मणं कोऽहमीदृशम् ।
इत्यादिप्रश्ननामार्थं व्याख्यास्ये ब्रह्मबोधकम् ॥

प्रथमतो ब्रह्मविद्यास्तुत्यर्थमाख्यायिकामवतारयति—सुकेशा [च] नामतो भारद्वाजो भरद्वाजस्यापत्यं शैब्यश्च शिबेरपत्यं सत्यकामः सत्ये ब्रह्मणि कामो यस्य स सत्यकामो यथार्थकामः । सौर्यायणी च सूर्यस्यापत्यं सौर्यायणिः, ईकारश्छान्दसः । गार्ग्यो गर्गगोत्रः । कौशल्यश्च कौशल्यो नामतः । आश्वलायन आश्वलस्यापत्यमाश्वलायनः । चकारचतुष्टयमुक्तानां सुकेशादीनां वक्ष्यमाणद्वयोः पिप्पलादं प्रति प्रश्नसमुच्चयार्थम् । भार्गवो भृगुगोत्रो भृगोरपत्यं वा । वैदर्भि-र्विदर्भदेशोद्भवः । कबन्धी कबन्धी नाम कात्यायनः कत्य(त ?)स्यापत्यं कात्यस्तस्य युवापत्यं कात्यायनस्ते प्रसिद्धा महाशाला महाश्रोत्रियाः षट् । ह किलैत उक्ताः सुकेशसत्यकामसौर्यायणी(णि)कोशल्यभार्गवकबन्धिनः । ब्रह्म-परा वेदपरा वेदैकशरणा इत्यर्थः । ब्रह्मनिष्ठा वेदार्थतात्पर्यवन्तः । परमुत्कृष्टं निरुपचारितमित्यर्थः । ब्रह्म देशकालवस्तुपरिच्छेदशून्यमन्वेषमाणाः कीदृशं तदिति बुभुत्सां कुर्वाणा एवं प्रतिपन्नाः । तत्प्रतिपत्तिप्रकारमाह—एषोऽस्मद्बुद्धौ वाचि च वर्तमानः पिप्पलादो ह किल वै स्मर्यमाणस्तदस्मद्बुद्धिस्थं सर्वमस्माभि-र्बुभुत्सितं निखिलं पृष्टं वक्ष्यति कथयिष्यति । इत्यनेन प्रकारेण पर्यालोच्य त उक्ताः सुकेशादयो ह किल समित्पाणयो गुरूपासनार्थं समिधः पाणौ येषां ते समित्पाणयो भगवन्तं पूजावन्तं पिप्पलादं पिप्पलादनामानमुपसन्नाः शास्त्रदृष्टेन विधिना समीपं प्राप्ताः ॥ १ ॥

तान्संप्रति समागतान्प्रश्नकर्तॄन्ह किल स पिप्पलाद ऋषिरतीन्द्रियार्थस्य द्रष्टो-वाचोक्तवान् । भूय एव यद्यपि पूर्वं भवन्तस्तपआदिभिः संपन्नास्तथाऽपि ब्रह्मवि-द्याग्रहणार्थं पुनरेव । तपसा शरीरशोषणादिना । ब्रह्मचर्येण योषित्स्मरणकीर्तन-केलिप्रेक्षणगुह्यभाषणसंकल्पाध्यवसायक्रियानिर्वृत्तिवर्जनरूपेण । श्रद्धया वेदार्था-स्तिक्यबुद्ध्या । संवत्सरं द्वादश सौरसंक्रान्तिकालमुक्तैः साधनैः संपन्नाः सन्तः । संवत्स्यथ सम्यग्वासं करिष्यथ सम्यग्वासं कुर्वन्त्वित्यर्थः । ततो यथाकामं काम-

---

१ ख. °नार्थं ।

मनतिक्रम्य स्वेच्छानुसारेणेत्यर्थः । प्रश्नान्प्रष्टव्यार्थान्पृच्छत ×प्रश्नानुद्दिश्य वाचं विसृजत । इदानीं स्वस्य गर्वपरिहारार्थमाह—एवं पृष्टे भवद्भिर्यदि पक्षान्तरे भवदुक्ते ज्ञानाभावे मौनं करिष्याम इत्येकः पक्षः । द्वितीयं पक्षमाह—विज्ञास्यामोऽथ चोक्तविज्ञानवन्तो भविष्यामः । सर्वं निखिलं ह प्रसिद्धं वो युष्मभ्यं वक्ष्यामः कथयिष्यामः । इत्यनेन प्रकारेण ॥ २ ॥

अथ तपोब्रह्मचर्यश्रद्धासंपत्त्या संवत्सरनिवासानन्तरं प्रश्नं कर्तुं भृशमुत्सुकः स्वैरनुज्ञातः कबन्धी कात्यायनः, व्याख्यातम् । उपेत्य पिप्पलादस्य समीपं शास्त्रोक्तमार्गेण समागत्य । पप्रच्छ प्रश्नं कृतवान् । भगवन्हे पूजावन्पिप्पलाद । कुतः । कस्मादुपादानान्निमित्ताच्च कारणाद्ध प्रसिद्धाद्वै स्मर्यमाणादिमा विविधशब्दप्रत्ययगम्याः । प्रजाः स्थावरजङ्गमाः प्राणिनः । प्रजायन्त उत्पद्यन्ते । इत्यनेन प्रकारेण ॥ ३ ॥

तस्मा एवं पृष्टवते कात्यायनाय । स पिप्पलादो ह किलोवाचोक्तवान् । तदुक्तिमाह—प्रजाकामः प्रजासु कामो यस्य स प्रजाकामो वै प्रसिद्धः स्मर्यमाणो वा । प्रजापतिः प्रजानां पालयिता हिरण्यगर्भो जन्मान्तरानुष्ठितापरविद्याकर्मसमुच्चयः । स परमात्मनो भेदरहितः प्रजापतिस्तपः स्रष्टव्यविषयं पर्यालोचनमतप्यत * कृतवान् । स तपसा विज्ञाततन्निमित्तोपादान आत्मोपादानमात्मानिमित्तं च मिथुनं युग्ममुत्पादयते सर्गे सर्गे जनयति । मिथुनमाह—रयिं च चन्द्रमसं सर्वान्नभूतमप्रधानं प्राणं चाऽऽदित्यमन्नारमग्निप्रधानम् । चकारौ परिणामयोर्मिथुनत्वसमुच्चयार्थौ । इत्यनेन वक्ष्यमाणेनाभिप्रायेणोत्पादयत इत्यन्वयः । तदभिप्रायमाह—एतौ रयिप्राणौ । मे मम प्रजापतेर्बहुधाऽनेकप्रकाराः प्रजाः स्थावरजङ्गमाः प्राणिनः करिष्यत उत्पादयिष्यत इति यस्मात्तस्मात्स्रक्ष्यामीति शेषः । अथवाऽऽद्य इतिकार एवकारार्थः । अयं त्वभिप्रायार्थः ॥ ४ ॥

इदानीं प्राणरयिशब्दयोरर्थमाह—आदित्यश्चन्द्रकिरणमण्डलात्मा ह प्रसिद्धो वै स्मर्यमाणः । प्राणः प्राणशब्दाभिधेयः । रयिरेव चन्द्रमाः (स्पष्टम्) । रयिशब्दाभिधेयस्य चन्द्रमसोऽन्नरूपस्य सार्वात्म्यमाह—रयिश्चन्द्रमा वै प्रसिद्ध एतत्परिदृश्यमानं सर्वं निखिलम् । सर्वशब्दार्थमाह—यत्प्रसिद्धं मूर्तं च तेजोबन्नरूपमप्यमूर्तं च वाय्वाकाशरूपमपि । चकारौ मूर्तामूर्तयोर्मिलितयोः प्रत्येकं च रयिस्वरूपत्वसमुच्चयार्थौ । यस्मान्मूर्तामूर्तात्मके जगति मूर्तेराधिक्यं तस्माच्चतो मूर्तिरेव

× पृच्छथेति क्वचिन्मूले पाठः । * एतदग्रे मले स तपस्तप्त्वेति पदत्रयमधिकमुपलभ्यते ।

रयिश्चन्द्रमास्तेजोबन्नरूप एव न त्वन्यः । अथवा मूर्तिः स्थूलमद्यमानं रयिरेव न तु प्राणः । अमूर्तिः सूक्ष्मं प्राणस्यापि स्वरूपमिति व्याख्येयम् ॥ ५ ॥

ननु तर्हि किं रयेर्न्यूनवृत्तिः प्राण इत्याशङ्क्य तस्यापि सार्वात्म्यमाह—अथ हेतौ, आदित्य उक्त उदयन्नूर्ध्वमागच्छन्दिवसे दिवसे प्रातः प्रातर्यद्यस्मात्प्राचीं दिशं प्रविशति, स्पष्टम् । तेन प्राचीदिक्प्रवेशेन स्वैः किरणैः प्राच्यान्प्राचीदिग्गतान्प्राणान्प्राणचक्षुरादीन्रश्मिषु किरणेषु । संनिधत्ते संबद्धान्कुरुते किरणैर्व्याप्नोतीत्यर्थः । यद्यस्मात्स्वैः किरणैर्दक्षिणां स्पष्टं दिशं प्रविशति तेन दाक्षिणात्यान्प्राणान्रश्मिषु संनिधत्त इति शेषः । यद्यस्मात्प्रतीचीं स्पष्टं दिशं प्रविशति तेन पाश्चात्यान्प्राणान्रश्मिषु संनिधत्त इति शेषः । यद्यस्मादुदीचीं स्पष्टं दिशं प्रविशति तेनोत्तरान्प्राणान्रश्मिषु संनिधत्त इति शेषः । यद्यस्मादधोऽधोवर्तिनीं दिशं प्रविशति तेनोर्ध्वदिग्भवान्प्राणान्रश्मिषु संनिधत्त इति शेषः । यद्यस्मादन्तरा मध्ये दिशो दिशामन्तरादिश इत्यवान्तरादिशो वा प्रविशति तेनान्तरादिग्भवान्प्राणान्रश्मिषु संनिधत्त इति शेषः । यद्यस्मात्सर्वं निखिलं दिग्जातं स्वैः किरणैः प्रकाशयति स्वतेजसोऽनुग्रहेण नयनगोचरत्वयोग्यं कारयति । तेन सर्वप्रकाशनेन सर्वान्निखिलदिग्भवानविशेषेण प्राणांश्चक्षुरादीन्रश्मिषु संनिधत्ते व्याख्यातम् । आद्यन्तयोः समप्रवाक्यस्य पाठो मध्येऽपठितस्यापि पाठार्थमवगन्तव्यः ॥ ६ ॥

स परोक्ष एव प्रत्यक्षः किरणैः सर्वदिग्व्यापी वैश्वानरो विश्वे नरा यस्य स विश्वनरः विश्वश्चासौ नर इति वा । विश्वनर एव वैश्वानरः । वैश्वानरत्वे हेतुमाह—विश्वरूपः सर्वरूपः सर्वात्मेत्यर्थः । प्राण आदित्योऽग्निर्दाहपावकप्रकाशहेतुरुच्चोदयत ऊर्ध्वमागच्छति । तदादित्यस्य सार्वात्म्यमेतद्ब्राह्मणोक्तमृचा पादबद्धेन मन्त्रेणाभ्युक्तं सर्वतः कथितम् ॥ ७ ॥

विश्वरूपं सर्वरूपं हरिणं हरणशीलं सर्वोपसंहारकारणं जातवेदसं जातानि वेदांसि विज्ञानानि सर्वविषयाणि यस्मात्स जातवेदास्तं जातवेदसं सर्वस्थितिसंहारोत्पत्तिकारणमिति वाक्यार्थः । परायणमुत्कृष्टाश्रयभूतं विश्वरूपत्वं तु स्थितौ संहारे उत्पत्तौ च समानं परायणत्वं तु स्थितावेव विशेष इति न पुनरुक्तम् । ज्योतिस्तेजोमण्डलरूपमेकं विश्वस्य सृष्टिस्थितिसंहारान्कुर्वद्विश्वात्मकमपि भेदशून्यं तपन्तमन्तर्बहिस्तापं कुर्वन्तं जानाम्यहमिति शेषः । स्वज्ञानमेवर्षिर्दर्शयति—सहस्ररश्मिरनन्तकिरणः शतधा वर्तमानोऽनन्तप्रकारेण वर्तमानः प्राणः प्रजानां स्थावरजङ्गमानां सर्वव्यवहारनिर्वाहकारणमन्तर्जन्मनि जन्मनि बहिर्दिवसे दिवसे प्रातरुदयति,

ऊर्ध्वं गच्छति । एष प्रत्यक्षः सूर्यः शोभनाया गतेः कर्ता सविता । एवं रयिप्राणौ सर्वात्मानौ मिथुनमित्युक्तम् ॥ ८ ॥

अग्नीषोमात्मकस्य मिथुनस्य रूपान्तरं कालरूपं दर्शयति प्रजोत्पादं विवक्षुः—संवत्सरो व्याख्यातः । अत्र प्रथमान्तत्वं विशेषः । वै प्रसिद्धः । प्रजापतौ रयिप्राणावस्थो हिरण्यगर्भस्तस्य संवत्सरात्मन आदित्यचन्द्रनिष्पाद्यस्यायने भवत इति शेषः । ते आह—दक्षिणं च मासषट्कं दक्षिणायनमपि, उत्तरं च तावन्तं कालमुत्तरायणमपि । चकारौ द्वाभ्यां समुच्चिताभ्यां संवत्सरस्वरूपनिष्पत्तिसमुच्चयार्थौ । दक्षिणोत्तरप्रसङ्गेन दक्षिणोत्तरगती संवत्सरसाध्ये आह—तत्तत्राधिकारिषु त्रैवर्णिकेषु ये स्वर्गाभिलाषिणो ह प्रसिद्धा वै स्मर्यमाणास्तत्प्रसिद्धं कर्म । प्रसिद्ध[त्व]मेवोपपादयति—इष्टापूर्ते कृतमिति । यस्मात्कृतं प्रयत्ननिष्पादितं ततस्तदिष्टापूर्ते इष्टं यागादि श्रौतं कर्मेत्यर्थः । पूर्तं कूपारामादिकरणं स्मार्तं कर्मेत्यर्थः । इष्टं च पूर्तं चेष्टापूर्ते । उपासत उपासनं कुर्वते फलकामास्तात्पर्येण तदेवानुतिष्ठन्तीत्यर्थः । त इष्टापूर्तोपासकाश्चान्द्रमसमेव चन्द्रमसि भवं न त्वन्यं लोकमिष्टापूर्तफलमाभिजयन्तेऽभिजयन्ति सर्वतः प्राप्नुवन्ति । त एव चान्द्रमसं प्राप्ता एव न त्वन्ये पुनरावर्तन्ते स्वकृतकर्मानुसारेण ब्राह्मणादियोनिं भूय आगच्छन्ति । यस्मात्त एव पुनरावर्तन्ते तस्मात्तत एते कर्मिण ऋषयः स्वर्गद्रष्टारः प्रजाकामाः प्रजासु कामो येषां ते प्रजाकामा दक्षिणं धूमादिमार्गं चन्द्रलोकप्राप्तिफलं प्रतिपद्यन्ते प्राप्नुवन्ति । अस्तु तेषां तत्प्राप्तिः किं प्रस्तुत इत्यत आह—एष दक्षिणमार्गप्राप्यश्चन्द्रलोको [ह] वै प्रसिद्धः सर्वान्नभूतो बुद्धिमज्ज्ञेयो रयी रयिशब्दाभिधेयः प्रकृतिभागो यः प्रसिद्धः पितृयाणो धूमादिमार्गः ॥ ९ ॥

अथ प्रजाकामव्यतिरिक्तः प्राप्यः प्रकृतादन्य उत्तरेणार्चिरादिमार्गेण तपसा ब्रह्मचर्येण श्रद्धया व्याख्यातम् । विद्यया प्रजापत्याद्युपासनरूपयाऽऽत्मानमादित्यं स्थावरजङ्गमप्राणमन्विष्याऽऽचार्योपदेशानन्तरं प्रत्ययसंतानेनाहमस्मीति संप्राप्य । विद्ययेत्यस्य व्याख्यानमिदमवगन्तव्यम् । आदित्यं बाह्यं प्राणमाभिजयन्ति(न्ते) सर्वतः प्राप्नुवन्ति । एतदादित्यस्वरूपं वै स्मर्यमाणं प्रसिद्धं वा, शास्त्रतः । प्राणानां प्राणशब्दाभिधेयानां प्राणचक्षुरादीनामायतनमाश्रयभूतमेतत्प्राणानामायतनममृतमविद्यादिकारणवर्जितमभयमावृत्तिदुःखभवरहितमेतदमृतमयं परायणं परेषामश्वमेधादिफलानां ससाधनानामाश्रयभूतमेतस्मात्प्राणायतनादमृतादभयात्पराश्रयान्न पुनरावर्तन्ते । यथा चन्द्रमसस्तद्वद्भूयो नाऽऽवर्तन्ते । इत्यनेन प्रकारेणोक्त इति शेषः । एष संवत्सरात्मप्राणप्राप्तिरूपो निरोधो विनाशो मोक्ष इत्यर्थः । तत्तस्मिन्संव-

त्सरात्मन्युत्तरायणदक्षिणायनसाम्येनोत्तरदक्षिणमार्गव्यापिन्येष वक्ष्यमाणः श्लोको मन्त्रः ॥ १० ॥

पञ्चपादं संवत्सरपरिवत्सरेदावत्सरानुवत्सरवत्स(त्सरेद्वत्स)राः कालाभ्यादित्यचन्द्रमोवायुरूपाः पञ्च पादा यस्य स पञ्चपादस्तं पितरं सर्वस्य जनकं द्वादशाकृतिं द्वादशमासाकारं दिव आहुः परे अर्धे पुरीषिणं दिवः स्वर्गात्परे परस्मिन्नर्धे स्थाने पुरीषिणं पुरीषशब्दं सुवर्णभूमिसंनिहितं ब्रह्माण्डगोलकावरणं यस्य स पुरीषी तं पुरीषिणमाहुः कथयन्ति। अथवा पञ्च शरदृतुवर्जिताः पादा यस्येति व्याख्येयम् । अथ पक्षान्तर इमे कालचक्रविदोऽन्ये पूर्वेभ्यो व्यतिरिक्ता उ परे, उ अपि परेऽन्य इत्यस्य व्याख्या । त उक्तव्यतिरिक्ता उत्कृष्टा वा विचक्षणं कुशलं सर्वोपद्रवशून्यमित्यर्थः । सप्तचक्रे सप्त गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्तिर्बृहती ककुबिति च्छन्दांसि परस्मिंश्चक्रे नेतृत्वेन संबद्धानि तत्सप्तचक्रं तस्मिन् । अथवा वर्णव्यत्यासात्सर्पचक्रे गमनवति चक्र इत्यर्थः । षडरे षड्ऋतुरूपा आरा यस्य तं षडरं तस्मिन्नाहुः कथयन्ति पर इत्यन्वयः । अर्पितं सचराचरं जगदर्पितं नानाविचाराः (?) । इति मन्त्रसमासौ ॥ ११ ॥

यथा संवत्सरो रयिप्राणात्मकस्तथा मासोऽपीत्यहोपासनार्थम् । मासः पक्षद्वयात्मकः । वै प्रसिद्धः । प्रजापतौ रयिप्राणाभिन्नो हिरण्यगर्भस्तस्य मासस्य । कृष्णपक्ष एव चन्द्रक्षयपक्ष एव न त्वन्यो रयिश्चन्द्रमाः । शुक्लश्चन्द्रवृद्धिपक्षः । प्राण आदित्यो यस्माच्छुक्लः प्राणस्तस्मात्तत एत ऋषयः प्रसिद्धाः प्राणव्यतिरिक्तानवलोकिनः कृष्णपक्षेऽपि कुर्वन्तः शुक्ल इष्टं कुर्वन्तीष्टमिष्टापूर्तादिकं शुक्ले पक्षे कुर्वन्ति । कृष्णपक्षस्येतरदर्शनादित्यर्थः । इतरे प्राणव्यतिरिक्तदर्शिनः शुक्ले पक्षेऽपि कुर्वन्त इष्टापूर्तादिकमितरस्मिन्कृष्णपक्षे कुर्वन्तीत्यनुषङ्गः ॥ १२ ॥

अहोरात्रस्त्रिंशन्मुहूर्तात्मको मनुष्यपितृदेवब्रह्मभेदाभिन्नः । वै प्रजापतिर्व्याख्यातम् । तस्याहोरात्रस्याहरेवाऽऽदित्यस्योदयादास्तमयं काल एव प्राण आदित्यो रात्रिरेवाऽऽदित्यास्तमयादोदयं काल एव रयिश्चन्द्रः । प्रसङ्गाद्दिवसे मैथुनं निषेधति—प्राणमादित्यं सर्वजीवनकारणं वै प्रसिद्धमेते दिवामैथुनरताः स्वोपकारिणं प्रस्कन्दन्ति प्रकर्षेण शोषयन्ति घ्नन्तीत्यर्थः । ये प्रसिद्धाः कामुका दिवा दिवसे रत्या युवतिजनसंभोगरूपिण्या । संयुज्यन्ते सम्यक्संबध्यन्ते । ग्राम्यधर्मेण योषिता सह संबध्यन्त इत्यर्थः । ननु तर्हि किं स्वयोषित्सु गमनं गृहस्थेन कर-

---

१ ख. "रेडाव" ।

णीयमित्याशङ्क्य रात्रौ तत्करणीयमित्येतद्वक्तुं रात्रिगमनं स्तौति—ब्रह्मचर्यमेव मैथुनाभावरूपमेव न तु मैथुनं तत्परोक्षं वक्ष्यमाणं यत्प्रसिद्धं गृहस्थानां मैथुनं रात्रौ क्रियमाणम् । तदेतदाह—रात्रौ रत्या संयुज्यन्ते स्पष्टम् ॥ १३ ॥

इदानीं प्रजोत्पत्तिप्रकारं वक्तुं रेतो मैथुनं च स्तौति—अन्नमदनीयं वै प्रसिद्धं सर्वप्राणिनां प्रजापतिः कालात्मा रयिप्राणात्मकः । ततस्तस्मादन्नाद्यमानाद्ध प्रसिद्धं वै स्मर्यमाणं सर्वजगदुत्पादकत्वेन तत्प्राणरूपं सर्वजगद्बीजमन्नकार्यं रेतः स्त्रीपुंसयोर्वीर्यम् । तस्माद्रेतस इमाः प्रजाः प्रजायन्ते व्याख्यातम् । इत्यनेन रेतोवस्थावच्छिन्नेनाऽऽत्मोपादानेन चन्द्रादित्यसंवत्सरमासाहोरात्रमैथुनावस्थात्मनिमित्तेन प्रकारेणेमाः प्रजाः प्रजायन्त इत्यन्वयः ॥ १४ ॥

एवं प्रश्ननिर्णयं कृत्वा प्रसङ्गान्मैथुनब्रह्मचर्ययोर्विभागेन फलमाह—तत्तत्र संसारमण्डले । ये प्रसिद्धाः कामज्वरापहृतचित्तसर्वस्वा ह प्रसिद्धा वै स्मर्यमाणं तत्परोक्षं प्रजापतिव्रतं प्रजापतिना मनुना स्वार्थभूतायाः शतरूपाया योषितोऽधोपहासवत्स्वयोषिदधोपहासं प्रजापतिव्रतं चरन्त्याचरन्तीत्यनुतिष्ठन्तीत्यर्थः । ते प्रजापतिव्रतचारिणो मिथुनं नारीपुरुषं नपुंसकं नोभयं वा त्रयं वोत्पादयन्ते जनयन्ति ।दृष्टफलमिदम् । इदानीमदृष्टफलमाह—तेषामेव प्रजापतिव्रतचारिणां न त्वन्येषामेष दक्षिणमार्गप्राप्यो ब्रह्मलोको ब्रह्मणः प्रजापते रयिरूपस्य चन्द्रमसो लोकः । इदानीं ब्रह्मचर्ये फलमाह—येषामर्चिरादिमार्गयायिनां तपो मनस इन्द्रियाणां चैकाग्र्यादि । ब्रह्मचर्यमुक्तम् । येषु निवृत्तिमार्गनिरतेषु सत्यं प्रियहितयथार्थभाषणं प्रतिष्ठितं प्रतिष्ठां प्राप्तं ये प्रमादेनाप्यसत्यं न वह(द)न्तीत्यर्थः ॥ १५ ॥

तेषां तपोब्रह्मचर्यसत्यनिरतानामसौ परोक्ष आदित्यमार्गप्राप्यो विरजो विरजाश्चन्द्रलोकवत्क्षयिष्णुत्वादिदोषदूषितो न । ब्रह्मलोकः कार्यब्रह्मलोकः । इदानीं तपोब्रह्मचर्यसत्यवचनादीनां सद्भावेऽपि जैह्म्यादिसद्भावे न ब्रह्मलोक इत्यनुमतमर्थमाह — न येषु तपोब्रह्मचर्यसत्यसंपन्नेषु । जिह्मं कौटिल्यं स्वेन नोच्यमानमपि परैर्ज्ञायमानं न येष्वित्यन्वयः । अनृतं पण्डितमान्यत्वेन न विपरीतं वाक्यं सत्यवादिन एव न येष्वित्यनुषङ्गः । न माया च कार्यमन्तरेण परैरज्ञायमानं कौटिल्यं माया न येष्वनुवर्तते । चकाराद्धिंसास्तेयादिकमपि नेत्यवगन्तव्यम् । [इत्यनेन प्रकारेण] ॥ १६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरानन्दयतीन्द्रविरचितायामाथर्वणप्रश्नोपनिषदीपिकायां प्रथमः प्रश्नः ॥ १ ॥

अथ द्वितीयः प्रश्नः।

—:०:—

अथ कात्यायनप्रश्नानन्तरं पूर्ववदुत्सुको ह किलैनं पिप्पलादम्। **भार्गवो वैदर्भिः पप्रच्छ भगवन्**, व्याख्यातम्। **कत्येव** कियत्संख्यादिका एव निर्धारिता **देवा** देवशब्दाभिधेयाः। **प्रजां** स्थावरजङ्गमभूतरूपां **विधारयन्ते** विधारणं कुर्वन्ति। **कतर** एतेषु देवेष्वदेवेषु वा कतर **एतच्छरीरं** संसारयात्रानिर्वाहकं **प्रकाशयन्ते** प्रकाशं कुर्वन्ति। **कः पुनरेषां वरिष्ठ** एषां देवानां को नाम श्रेष्ठः। **इत्यनेन** प्रकारेण पप्रच्छेत्यन्वयः॥ १॥

तस्मै भार्गवाय। **स होवाच** व्याख्यातम्। प्रथमप्रश्नस्योत्तरं प्राण एव शरीरस्य विधारकः। द्वितीयतृतीययोश्चार्थादग्न्यादिरूपेण स एव प्रकाशको **वरिष्ठश्चेति** वक्तुं भूतेन्द्रियप्राणसंवादरूपामाख्यायिकामवतारयति—**आकाशो** भूताकाशो **ह किल वै** प्रसिद्ध **एष** प्रसारितनयनप्रत्यक्षः साक्षिप्रत्यक्षो वा **देवो** देवशब्दाभिधेयोऽन्यविजिगिषुत्वेन, **वायुरग्निरापः पृथिवी** स्पष्टम्। **वाग्वागिन्द्रियम्**। उपलक्षणमेतत्पाणिपादपायूपस्थानाम्। **मनोऽन्तःकरणं** ज्ञानशक्ति चतुर्विधं मनःशब्दोपलक्षितम्। **चक्षुः श्रोत्रं च** स्पष्टम्। चकारात्त्वग्घ्राणरसनानि। ते पञ्चमहाभूतज्ञानेन्द्रियकर्मेन्द्रियचतुर्विधान्तःकरणरूपा मुख्यप्राणसंनिधिप्राप्तसामर्थ्यान्मुख्यप्राणप्रसादमजानतः(न्तः) **प्रकाश्येदं** शरीरमवकाशादिव्यहारक्षमत्वेन सर्वस्य लोकस्य दर्शयित्वाऽभिवदन्ति स्वव्यतिरिक्तान्सर्वान्सर्वतस्तिरस्कृत्य प्रत्येकं स्वात्मनि बहुवचनप्रयोगेणावकाशाद्येकैककार्यक्षमा अपि सजीवनमवकाशादिसर्वकार्यक्षमत्वं स्वात्मन्यारोप्य वदन्ति वल्गन्ति। तद्वदनमाह—**वयमाकाशादय** एतत्सर्वप्राणिप्रत्यक्षं **बाणं** बाणवत्कर्मणा प्रापितं बाणमथवा बवयोरैक्याद्बाति कुत्सितं गन्धं वहन्ब(ह्व)णति शब्दं करोति गच्छति वा कर्मक्षये सति सत्यपि कर्मणि देशाद्देशान्तरं चेति वा बणम्। बणमेव बाणं शरीरमित्यर्थः। **अवष्टभ्यावष्टम्भनं** कृत्वा दृढतमं कृत्वेत्यर्थः। **विधारयामो** विविधावकाशादिकार्यक्षमत्वेन धारणं कुर्मः॥ २॥

तानाकाशादीन्प्रत्येकं शरीरविधारणाभिमानेन वदतो **वरिष्ठः** सर्वेऽप्याकाशदयोऽवकाशादिकार्यकारित्वेन वरास्तत्कार्याणामपि मुख्यप्राणनिमित्तत्वान्मुख्यप्राणोऽतिशयेन [वरो वरिष्ठः] समीचीनः प्राणो मुख्यप्राणः प्राणादिपञ्चवृत्तिरुवाच हस्तसंज्ञया च निवारयन्नुक्तवान्। मुख्यप्राणोक्तिमाह—**मा** निषेधार्थः। **मोहं** विपरीतज्ञानमापद्यथ समन्तान्मा गच्छत। तत्र हेतुमाह—**अहमेव** मुख्यप्राण एव न त्वन्य **एतदेवं स्वप्रत्यक्षं** वक्ष्यमाणमात्मानं **पञ्चधा** प्राणापानव्यानोदानसमानैः पञ्च-

प्रकारैरात्मानं मुख्यप्राणस्वरूपं प्रविभज्य प्रकर्षेण स्थानक्रियानामादिभिर्विविधभेदवन्तं कृत्वैतद्ज्ञाणमवष्टभ्य व्याख्यातम् । विधारयामि विविधकार्यक्षमत्वेन जीववन्तं देहं करोमि । अयमर्थः—मवन्तोऽवकाशादिप्रातिस्विककार्यक्षमा न तु सर्वकार्यक्षमा अहं तु मवतामपि कार्ये निमित्तत्वाद्भवत्कार्यक्षमो मया क्रियमाणे जीवनादौ तु न कोऽपीति । इत्यनेन प्रकारेण । एवमुक्ते सति त आकाशादयः परस्परमुखावलोकनहास्यकरताडनादिचेष्टावन्तः प्राणोक्तेऽर्थेऽश्रद्दधाना इदमित्थमेवेत्यास्तिक्यबुद्धिशून्या बभूवुः स्पष्टम् ॥ ३ ॥

अनन्तरं तेषां सदर्पपापमवलोक्य तच्छान्त्यर्थं स मुख्यप्राणोऽभिमानादात्मनः सर्वकारित्वलक्षणाद्यथावस्तुविषयादहंकारात् । ऊर्ध्वमष्टोत्तरशतमर्मस्थानानामुपरि स्थानचलनं कृतवानित्यर्थः । उत्क्रमत इवोत्क्रामतीव स्वात्मनः साक्षी, उत्क्रमणे प्रतिसमाधेयः शरीरविनाशः स्यादिति मन्वान उत्क्रमणमिव कृतवान्भूतानां सकारणानां स्वस्थानचलनेन व्याकुलत्वं कृतवानित्यर्थः । अथवाऽयमिवकारः प्रतिपत्तुः प्रतिपत्त्यैव प्राणसंवादमाह । न ह्याकाशादिदेवानां वागादयः सन्ति तेषां तदङ्गीकारे च न्यायादिविरोधात् । तस्मिन्मुख्ये प्राणेऽभिमानिन्युत्क्रामत्यूर्ध्वं गच्छति सत्यथानन्तरमितरे मुख्यप्राणादन्य आकाशादयः सर्वे एव निखिला अपि पाशबद्धा विहङ्गा इव पाशस्योर्ध्वं नयनादुत्क्रामन्त उत्क्रामन्ति पराधीनाः सन्तः स्वस्थानेभ्यश्चलिता बभूवुः । नैकोऽप्यात्मानमवष्टब्धवानित्यर्थः । नैतत्तदा जातं किंतु सर्वकालीनमित्याह—तस्मिंश्च तस्मिन्मुख्यप्राण एव यथोत्क्रामति सत्युत्क्रामति(न्ति) तथा सर्वदा प्रतिष्ठमाने प्रकर्षेण स्वस्वकार्यक्षमत्वेनावस्थानं कुर्वन्ति(ति) । सर्व एव प्र(प्रा)तिष्ठन्ते स्पष्टम् । तत्तत्र प्राण उत्क्रामत्युत्क्रामन्ति प्रतिष्ठमाने च प्रतितिष्ठन्त इत्यस्मिन्नर्थे दृष्टान्तः । यथा दृष्टान्ते, मक्षिकाः क्षुद्रा मधुकरा जीवा भ्रमरा वा मधुकरत्वसामान्यान्मधुकरराजानं मधुकरराजं मधु मध्वपूपान्तस्थं मधुररसं तत्कुर्वन्तीति मधुकरास्तेषु प्रधानभूतस्तैर्दृष्टातिशयः कश्चन जीव इत्यर्थः । तमुत्क्रामन्तं मध्वपूपं परित्यज्योर्ध्वं गच्छन्तं सर्वा एव निखिला अपि मक्षिका उत्क्रामन्त उत्क्रामन्ति तमनुगच्छन्तीत्यर्थः । तस्मिंश्च मधुकरराज एव मध्वपूपे प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्ते स्पष्टम् । दार्ष्टान्तिकमाह—एवं तथा वाङ्मनश्चक्षुः श्रोत्रं च । चकारोऽनुक्तानामाकादीनां संग्रहार्थः । व्याख्यातमन्यत् । त उक्ता आकाशादयः परित्यक्तशरीरविधारकत्वाभिमानाः । प्रीताः प्राणस्यैव शरीरविधारकत्वनिश्चयेन परममोदमुपगताः । प्राणं मधुकरराजसमं मुख्यप्राणं कालत्रयेऽपि परोक्षं प्रत्यक्षं च स्तुव(न्व)न्ति स्तुतिं कुर्वन्ति ॥ ४ ॥

तत्स्तुतिमाह—एष मुखनासिकाभ्यां संचरन्स्पर्शनस्य साक्षिणो वा प्रत्यक्षोऽग्निरध्यात्मादौ जाठरसौमादिभेदभिन्नो वैश्वानरस्तपति संतापं करोति । एष व्याख्यातम् । सूर्यः शोभनाया मतेः कर्ता चन्द्रमण्डलात्सैष व्याख्यातम् । पर्जन्यो वृष्टचभिमानिनी देवतैष इत्यनुवर्तते । मघवान्मघवा त्रिलोकीपतिः । अथवा पर्जन्यस्यैव विशेषणं मघवान् । तथा च पर्जन्येन्द्रयोरैक्यं स्यात् । एष व्याख्यातम् । वायुः प्रभञ्जनः । एष व्याख्यातम् । पृथिवी वसुंधरा । एष इत्यनुवर्तते वक्ष्यमाणेषु सर्वेषु । रयिश्चन्द्रमाः । देवो विजिगीषापरो द्योतनात्मको वा तपन्नग्निसूर्याद्यात्मकत्वेन । किं बहुना सदसच्चास्ति नास्तीति व्यपदेशभूषितम् । चकारात्सदसद्विलक्षणमज्ञानमपि । अमृतं चामरणधर्मात्मकं ब्रह्माप्यनुपचरितसदेकस्वभावम् । चकारादनुपचरितासत्स्वभावं नरविषाणादिकमपि यत्प्रसिद्धम् ॥ ९ ॥

न केवलमयं सर्वात्मा किंतु सर्वाधारोऽपीति दृष्टान्तेनाऽऽहुः—अराश्चक्रस्य नाभिनेम्योऽरन्तरालवर्तीनि चतुष्कोणानि वर्तुलानि वा तीक्ष्णाग्रपुच्छानि काष्ठानि । इव दृष्टान्ते । रथनाभौ रथचक्रस्य मध्यप्रदेशे प्रतितिष्ठत(न्त) इति शेषः । दार्ष्टान्तिकमाह—प्राणे संसारचक्रनाभिभूते मुख्ये प्राणे । सर्वं निखिलमग्निसूर्यादिकं प्राणात्मकम् । प्रतिष्ठितं स्पष्टम् । अग्निसूर्यादिकमेव सर्वं प्राणे प्रतिष्ठितं न त्वन्यदिति शङ्कां वारयितुं सर्वशब्दार्थमाह—ऋचः पादबद्धा मन्त्राः । यजूंष्यविवक्षितच्छन्दस्का मन्त्राः । सामानि गीतिसहिता ऋचः । यज्ञो ज्योतिष्टोमादिरूपः । क्षत्रं क्षत्रियत्वजातिर्ब्रह्म च ब्राह्मणत्वजातिः । चकारादुक्तमनुक्तं च सर्वम् ॥ ६ ॥

यथा प्रजा महाराजमेवैष इत्यङ्गुलिनिर्देशेन परस्परं दर्शयित्वा तद्गुणांश्च संकीर्त्य पश्चात्त्वं नः पिता मातेत्यादिना स्तुन्वन्ति तथैषोऽग्निः सूर्यश्च तपतीत्यादिना प्राणं दर्शयित्वा देवास्तद्गुणांश्च सर्वप्रतिष्ठादिलक्षणान्संकीर्त्यैवं स्तुवन्त इत्याहुः—प्रजापतिर्विराट् त्रिलोकीशरीरः प्रजानां पालयिता । चरसि गच्छसि वर्तस इत्यर्थः । गर्भे ब्रह्माण्डगोलकजठरे । ननु गर्भस्थोत्तानशायिनोर्विभेदाद्गर्भाद्विनिर्गतो नाहमित्यत आहुः—त्वमेव प्राणः प्रजापतिरूपो गर्भस्थ एव न त्वन्यः । प्रतिजायसे स्वस्माज्जाताद्ब्रह्माण्डगोलकात्पुत्रभूतात्प्रति प्रातिलोम्येन पिता सन्पुत्रत्वमङ्गीकृत्योत्पद्यते(से) । तुभ्यं प्रजापतिरूपायोपकाराद्यर्थम् । प्राण हे प्राण प्रजास्त्विमाः प्रत्यक्षाः स्थावरजङ्गमास्त्वद्रूपभूताः । तोरेवकारार्थः । ता इमाः प्रजास्तुभ्यमेवेत्यन्वयः । [बलिं हरन्ति स्पष्टम्] । ननु ब्रह्मलोकावस्थिताय मह्यं कथमिमाः प्रजा [बलिं हरन्ति] इत्यत आहुः—यः प्रसिद्धः प्रजापतिर्हस्तिपुत्तिकादिशरीरेषु समः । प्राणैः प्राणापाना-

दिभिः पञ्चभिर्वायुभेदैः सर्वेषु भूतेष्वेक एव । प्रतितिष्ठसि प्रातिकूल्येन भेदेन वर्तसे ॥ ७ ॥

इदानीमस्यैव प्रधानभूता विभूतीराहुः—देवानामिन्द्रादीनामसि भवसि । वह्नितमोऽतिशयेन हविषां वाहको देवतृप्तिकारणमित्यर्थः । पितृणामग्निष्वात्तादीनां पितृलोकनिवासिनां प्रथमा पूर्वभाविनी नान्दीमुखश्राद्धादावन्यकर्मापेक्षया । स्वधा स्वान्यजमानस्य पितॄन्हविष्यदानेन धावति गच्छतीति स्वधा । ऋषीणां गौतममरद्वाजप्रभृतीनां चरितं चेष्टितम् । किं परस्त्रीदर्शनादिकमपि प्राण इत्याशङ्क्य नेत्याह—सत्यमवितथं गुरुपादावलोकनादिकमित्यर्थः । अथवा मुख्यप्राणसाहचर्यात्सत्यं शरीरविधारणम् । ऋषिविशेषणमाहुः—अथर्वाङ्गिरसामथर्वाङ्गिरसप्राणसाहचर्यादथर्वाङ्गिरस्त्वं गौतमादीनाम् । असि भवसि ॥ ८ ॥

इन्द्रः परमैश्वर्यसंपन्नस्त्वं प्राणः प्रजापतिः । प्राण हे प्राण । तेजसा सर्वसंहारकारिणा वीर्येण त्रिजगद्भेदकेन । रुद्रो रोदनहेतुभूतोऽसि भवसि । स्थितिकाले जगतः परिरक्षिता सर्वतो रक्षकः । त्वं प्राणः प्रजापतिः । अन्तरिक्ष आकाशे वाय्वादिरूपेण चरसि गच्छसि । सूर्यः शोभनाया गतेः कर्ता दिवाकरस्त्वं प्राणः प्रजापतिः । सूर्यविशेषणं ज्योतिषां पतिः, चन्द्रादीनां पालयिता । न केवलं ज्योतिषां पतिः किंतु प्रजानामप्यानन्दकारीत्येवमाहुः ॥ ९ ॥

यदा यस्मिन्काले त्वं प्राण सूर्यगोभिरभिवर्षसि सर्वतो नीरधारा मुञ्चसि । अथ तदेमाः प्रत्यक्षाः । प्राणते प्राणन्ति प्राणनादिचेष्टां कुर्वन्तीत्यर्थः । अथवा हे प्राण ते तवेमाः प्रजा इति वक्ष्यमाणेनान्वयः । प्रजाः स्थावरजङ्गमाः । आनन्दरूपा आनन्दः परमात्मा स एव रूपं यासां ता आनन्दरूपाः । निरतिशयसुखपूर्णा इत्यर्थः । तिष्ठन्ति स्पष्टम् । आनन्दरूपावस्थाने हेतुमाह—कामायाभिलाषाय यथाकाममित्यर्थः । अन्नमदनीयं व्रीह्यादिकम् । भविष्यति स्पष्टम् । इत्यनेनाभिप्रायेण ॥ १० ॥

इदानीमस्य सर्वात्मनोऽपि पापलेशशून्यत्वमाहुः—व्रात्यः सर्वस्मात्प्रथमजत्वाद्यथाकालमुपनयनादिसंस्कारशून्यः पितृपितामहादेरभावाद्वा तत्सोमपानशून्यः । संस्कारशून्योऽपि सर्वदा शुद्ध इत्यर्थः । त्वं प्रथमजः प्रजापतिः । प्राण हे प्राणैकऋषिरार्षवर्णानामेव प्रसिद्धोऽग्निरत्ता भोक्ता संहर्ता वा । विश्वस्य चराचरस्य जगतः । सत्पतिः सतां ब्रह्मादीनां पालयिता संश्चासौ पतिश्चेति वा । वयमाकाशाद्या देवाः । आद्यस्यादनीयस्य विषयजातस्य दातारः समर्पकाः । पिता जनकस्त्वं प्राणो

मातरिश्व मातर्याकाशे श्वसितीति मातरिश्वा वायुस्वरूप इत्यर्थः। नोऽस्माकमाकाशादिनाम्। अथवा सर्वजगत्कारणस्य मातरिश्वनो वायोस्त्वं पिता ॥ ११ ॥

एवं स्तुतिं कृत्वा कार्यमाहुः—या प्रसिद्धा। ते तव प्राणस्य तनूस्तनुरूपान-रूपा। वाचि वागिन्द्रियेऽग्नौ पृथ्व्यां च वागिन्द्रियसहचरितायां प्रति-ष्ठिताऽवस्थिता। या प्रसिद्धा व्यानरूपा श्रोत्रे श्रोत्रेन्द्रिये तत्सहचरितचन्द्रम-स्याकाशे च। या च प्रसिद्धा प्राणरूपा। चकारः पूर्वत्र वक्ष्यमाणे च पर्याये, तनूः प्रतिष्ठितेत्येतदनुवृत्त्यर्थः। चक्षुषि चक्षुरिन्द्रिये तत्सहचरितेषु तेजोबन्नात्मकेषु रूपे-ष्वादित्ये च, या [च] प्रसिद्धा समानरूपा मनसि मनइन्द्रिये तत्सहचरितेषु भूतभौतिकेषु। संतता सम्यग्विस्तृता प्राणादिपञ्चवृत्तिगर्भिणीत्यर्थः। शिवां शिवानां मङ्गलानां स्वस्थानादचलितामित्यर्थः। तां वागादिस्थितां तनुं कुरु स्पष्टम्। त्वं च मोत्क्रमीरुत्क्रमं मा कार्षीः ॥ १२ ॥

नास्माकमिदानीं पूर्ववत्स्वातन्त्र्यबुद्धिरित्याहुः—प्राणस्य पञ्चवृत्तेर्भवत इदं विवि-धप्रत्ययगम्यमस्मदादिकं जगद्वशेऽधीनत्वेन सर्वं निखिलम्। सर्वशब्दार्थमाहुः—त्रिदिवे त्रिदिवोपलक्षितत्रिलोक्यां ब्रह्माण्डजठर इत्यर्थः। यत्प्रसिद्धमाकाशादिकं प्रतिष्ठितमवस्थितम्। यस्मादेवं तस्माद्धे प्राण त्वमस्मान्मातेव पुत्रान्स्पष्टं रक्षस्व रक्ष सर्वतोऽनर्थेभ्यः पाहि। तद्रक्षणं स्वयमेवाऽऽहुः—श्रीश्च श्रियश्च विविधा लक्ष्मीः। प्रज्ञां च लोकवेदविषयिणीं लोकद्वयेष्टकारिणीं बुद्धिम्। चकारौ तयोः स्थिर-त्वोपयोज्यत्वे आहतुः। विधेहि विविधास्ववस्थासु धेहि प्रयच्छ। नोऽस्मभ्यमाका-शादिभ्यो विगताभिमानेभ्यः। [इत्यनेन प्रकारेण] ॥ १३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरानन्दयतीन्द्रविरचिता-यामाथर्वणप्रश्नोपनिषद्दीपिकायां द्वितीयः प्रश्नः ॥ २ ॥

अथ तृतीयः प्रश्नः।

प्राणस्य प्रजापतेस्तु सर्वजगदात्मत्वं निर्धारितं यद्यपि तथाऽप्यस्य संहतत्ववादना-त्मत्वमित्येतदुपपादनार्थं तृतीयः प्रश्न आरभ्यते—अथ वैदर्भिप्रश्नानन्तरं हैनं कौश-(स)ल्यश्चाऽऽश्वलायनः पप्रच्छ भगवन्क्याख्यातम्। कुतः कस्मादुपादाना-न्निमित्तादेष प्रत्यक्षः क्रियावान्प्राणः पञ्चवृत्तिर्जायत उत्पद्यते। कथं केन प्रकारे-णाऽऽत्मात्यागच्छत्यस्मिन्स्थूले प्रत्यक्षे शरीरे विनाशिनि कलेवरे। केन निमित्तेन शरीरं गृह्णातीत्यभिप्रायः। आत्मानं वा मुख्यप्राणस्वरूपं वाशब्दः प्राण एव धर्मी

न्तरप्रश्नार्थः । प्रविभज्य प्रकर्षेण विभागं कृत्वा कथं केन प्रकारेण । प्रातिष्ठते वर्तत इत्यर्थः । केन वृत्तिविशेषेणोत्क्रमत उत्क्रामत्यस्माच्छरीरादपसर्पति । कथं केन प्रकारेण बाह्यमधिभूतमधिदैवं चाभिधत्ते सर्वतो धारयति । कथं केन प्रकारेणाध्यात्ममात्मानमधिकृत्य वर्तमानमिदं शरीरेन्द्रियादिकम् । इत्यनेन प्रकारेण ॥ १ ॥

तस्मै कौश(स)ल्याय । स होवाच व्याख्यातम् । अतिप्रश्नान्यधिकार्था(कार्था)पिहितार्थान्वाऽन्यप्रश्नविषयान्वा प्रष्टव्यानर्थान्पृच्छसि प्रश्नं करोषि यतस्ततो ब्रह्मिष्ठोऽतिशयेन वेदार्थज्ञोऽन्तर्मुखो वाऽसि भवसि । इति यस्मात्तस्मात्ततस्ते तुभ्यमाश्वलायनायाहं पिप्पलादाभिधो ब्रवीमि स्पष्टम् ॥ २ ॥

आत्मन आत्मनोऽभिन्ननिमित्तोपादानात् । एष प्राणो जायते व्याख्यातम् । आत्मनः प्राणो जायमानो न वास्तव इत्येतद्दृष्टान्तेनाऽऽह—यथा दृष्टान्त एषा प्रत्यक्षा पुरुषे शिरःपाण्यादिमति च्छाया प्रसिद्धा पुरुषाकारैवमेतस्मिन्प्राणकारण आत्मन्येतत्प्राणसूत्रमाततं समन्ताद्विस्तृतं न वास्तवमित्यर्थः । कथमायात्यस्मिञ्शरीर इत्यस्योत्तरमाह—मनोकृतेन मनःकृतेन करणं(ण)कृतशुभाशुभकर्माविद्यावासनानिमित्तेनाऽऽयात्यस्मिञ्शरीरे व्याख्यातम् ॥ ३ ॥

आत्मानं वा प्रविभज्य कथं प्रातिष्ठत इत्यस्योत्तरं दृष्टान्तपुरःसरमाह—यथा सम्राडेव सम्यग्राजत इति सम्राट् सर्वलक्षणसंपन्नः सार्वभौमो राजैव न त्वन्योऽधिकृतान्मन्त्रिबलरक्षकाधिकारिप्रभृतीन्विनियुङ्क्ते विनियोगं कुरुते । विनियोगप्रकारमाह—एतान्ग्रामानेतान्ग्रामान्कुरुपाञ्चालादिदेशगतान्सर्वसंपत्समृद्धान्पञ्चदशशतं सहस्रं वा ग्रामान्विनियुज्यमानानां बहुत्वाभिप्राया वाक्यवृत्तिः । मन्त्रिबलरक्षकाधिकारिन्निति प्रत्येकमधितिष्ठस्वाधितिष्ठाधिष्ठानं कुर्वित्यनेन प्रकारेण । दार्ष्टान्तिकमाह—एवमेवाननेनैव प्रकारेणैष मुख्यः प्राण इतरान्स्वात्मव्यतिरिक्तान्प्राणान्प्राणशब्दान्वागादीन्पृथक्पृथगेव जिह्वादिगोलकेष्वन्यत्रान्यत्रैव न त्वेकत्र संनिधत्ते संनिधानं कुरुते । स्थापयतीत्यर्थः ॥ ४ ॥

तेषां संनिधानस्यातिस्पष्टत्वात्परित्यज्य वागादीन्मुख्यस्यैव प्राणस्य पञ्चवृत्तिसंनिधानमाह—पायूपस्थे पायुश्चोपस्थश्च पायूपस्थं तस्मिन्मलमूत्रादिकारित्वेनापानमधश्चारिणं स्वात्मनो वृत्तिमेदं संस्थाप्येति शेषः । चक्षुःश्रोत्रे चक्षुश्च श्रोत्रं च चक्षुःश्रोत्रं तस्मिन्संनिधानं कृत्वेति शेषः । मुखनासिकाभ्यां स्पष्टम् । प्राणो मुख्यप्राणः स्वयं वृत्तिमान्वृत्तिमन्तरेण स्वेनैव रूपेण प्रातिष्ठते प्रतिष्ठते शरीरदेशाद्बहिर्गच्छति । मध्ये तु शरीरस्य मध्यभाग एव नाभौ न त्वन्यत्र समानोऽशितपीतसमनयनवृत्तिः । तिष्ठतीति शेषः । समानशब्दार्थमाह—एष नाभिस्थः प्राणवृत्तिभेदो हि यस्मादे-

तद्भक्तारूयं प्रत्यक्षं हुतं विधिनाऽविधिना वाऽऽस्याहवनीये प्रक्षिप्तमन्नमदनीयं सम्यावता नीयमानेन तत्तत्स्थानेन्द्रियादीनां बाधो न भवति तावत्तत्तत्स्थानेन्द्रियादौ नयति प्रापयति। तस्मात्समानेन समत्वेन नीतादन्नादेताः साक्षिणः प्रत्यक्षाः श्रोत्रचक्षुर्नासिकामुखद्वाररूपेणास्मदादीनां वा सप्त सप्तसंख्याका मूर्धन्यद्वारस्था अर्चिषोऽर्चिरिव विषयप्रकाशरूपत्वाच्छब्दादिबुद्धयः। भवन्ति स्पष्टम् ॥ ५ ॥

इदानीं व्यानवृत्तेः स्थलं वक्तुमाह—हृदि मांसपिण्डे कमठाकारे हि यस्मादेष साक्षिप्रत्यक्ष आत्माऽऽत्मसहचरितः पञ्चवृत्तिः प्राणो लिङ्गात्माऽत्रास्मिन्हृदय आत्माधिष्ठान एतत्सर्वशरीरपर्णस्य शङ्कुभूतमेकशतमेकाधिकं शतं नाडीनां प्रधानभूतानां सच्छिद्राणां शिराणाम्। तासां प्रधाननाडीनां शतं शतमेकैकस्या एकोत्तरशतसंख्याकानां प्रत्येकं शतं शतं तथा चैकोत्तरशतनाडीनां शाखाभूता नाड्यो दशसहस्रं शताधिकं भवन्ति। पुनश्च शताधिकानां दशसहस्राणामेकोत्तरशतनाडीशाखानाडीनामेकैकस्या * द्वासप्ततिं द्वासप्ततिं प्रतिशाखानाडीसहस्राणि शाखानाडीनां शाखाभूता नाड्यस्तासां प्रत्येकं द्विसहस्राधिकसप्ततिसहस्राणि। द्वासप्ततिं द्वासप्ततिमिति वीप्सा प्रत्येकं शाखानाडीसंबन्धार्था। प्रतिशाखानाडीनां सहस्राणि प्रतिशाखानाडीसहस्राणि। तथा च मूलशाखा [प्रतिशाखा]नाड्यो द्वासप्ततिकोटयो द्वासप्ततिलक्षाणि दशसहस्रं च शतद्वयमेका चेति भवन्ति। आसूक्तसंख्यासु मूलशाखाप्रतिशाखा+प्रतिशाखानाडीषु। व्यानो वीर्यवत्कर्महेतुः प्राणवृत्तिभेदश्चरति गच्छति ॥ ६ ॥

केनोत्क्रमत इत्यस्योत्तरं वक्तुं पञ्चम्याः प्राणवृत्तेः संचरणमार्गमाह—अथ सर्वनाडीषु व्यानसंचारेणैव हेतुनैकया सुषुम्नारूपयोर्ध्वं ऊर्ध्वचारी उदान ऊर्ध्वचारित्वादेवोदाननामधेयः प्राणवृत्तिभेदेन पुण्येन शास्त्रीयेण कर्मणा। पुण्यं शुभकर्मफलं सुखप्रायं लोकं भोगभूमिभूतम्। नयति प्रापयति। पापेन शास्त्रनिषिद्धेन कर्मणा। पापमशुभकर्मफलं लोकं नयतीति देहलीप्रदीपन्यायेन संबध्यते। उभाभ्यामेव पुण्यपापाभ्यामेव न तु केवलेन पुण्येन पापेन वा मनुष्यलोकं मानवं शरीरं सुखदुःखफलं नयतीत्यनुषङ्गः ॥ ७ ॥

कथं बाह्यमभिधत्ते कथमध्यात्ममित्येतयोरुत्तरमवशिष्यते। तत्र प्राणादिपञ्चवृत्तिभिरध्यात्ममभिधत्त इत्येतदात्मानं वा प्रविभज्य कथं प्रातिष्ठत इत्येतस्योत्तरेणैवार्थात्प्राणादिभिरभिधत्त इत्युत्तरमुक्तमिदानीं कथं बाह्यमभिधत्त इत्यस्योत्तरं प्राणापा-

* द्वासप्ततिर्द्वासप्ततिरिति क्वचिन्मूले पाठः। + एकः प्रतिशाखाशब्दोऽधिकः।

नसमानव्यानोदानाभिन्नैरादित्यपृथिव्याकाशवाय्वग्निभिरभिमिश्रं सत् इत्याह—आदित्यो मण्डलाभिमानी पुरुषो ह प्रसिद्धो वै स्मर्यमाणो बाह्योऽध्यात्मव्यतिरिक्तः । प्राणो मुख्यप्राण उदयति, उदयं गच्छति । एष बाह्यः प्राणो मण्डलात्मा पुरतः स्थित इति हि यस्मादेनं साक्षिप्रत्यक्षं चाक्षुषं चक्षुषि भवं प्राणं प्राणवृत्त्यारूयमनुगृह्णानोऽनुग्रहं कुर्वन्नुद्य(दय)तीत्यन्वयः। पृथिव्यां पञ्चगुणायां वित्तीर्णायां भुवि या प्रसिद्धा बाह्यापानरूपा देवताऽधिष्ठात्री । सा पृथिवी देवतैषा प्रत्यक्षेव पुरुषेणानुभूयमाना । पुरुषस्य शिरःपाण्यादिमतः शरीरस्यापानमाध्यात्मिकमपानवृत्तेर्भेदमवष्टभ्य स्वशक्त्या सर्वात्मना गच्छन्तं विधायाभिमिश्रं इति शेषः । अन्तराऽऽदित्यपृथिव्योर्मध्ये यद्यः प्रसिद्धः समानसम आकाशः सर्वसमावकाशकर्मा सोऽन्तराकाशः समानो बाह्यसमानवृत्तिभेदो वायुः प्रसिद्धः प्रमञ्जनो वीर्यवत्कर्मा व्यानो व्यानवृत्तिभेदो बाह्यः ॥ ८ ॥

तेजो दाहपाकप्रकाशपरं ह प्रसिद्धं * वावैव तेज एव न त्वन्यदुदानो बाह्य उदानवृत्तिभेदः । तेजस उदानत्वे हेतुमाह—तस्माद्यतस्तेज एवोदानस्तत उपशान्ततेजा उच्छिन्नजाठरजातवेदाः करस्पर्शेनानुपलभ्यमानोष्णिमा पुनर्भवमेतच्छरीरं प्रतिपद्यत इति शेषः । अथवा प्राणस्यैतद्विशेषणं व्यवहितं पुनः पुनः शरीरे शरीरे भवतीति पुनर्भवस्तं पुनर्भवम् । प्रतिपत्तिकालं सप्रकारमाह—इन्द्रियैर्वागादिभिर्मनस्यन्तःकरणे स्वस्ववृत्त्युपरमेण संपद्यमानैः संपत्तिं कुर्वद्भिः । यदेन्द्रियाणि मनसि संपद्यन्ते तदेत्यर्थः ॥ ९ ॥

यच्चित्तो यदेव देवतिर्यगादिशरीरं सम्यगिति सर्वदा चित्ते यस्य स यच्चित्तस्तेन देवतिर्यगादिसंकल्पविशिष्टेन मनसा सेन्द्रियेण सहैषोऽन्तःकरणाभिमानी मुमूर्षुः । प्राणं पञ्चवृत्तिं मुख्यप्राणं मधुकरराजसमायात्यागच्छति ज्ञानशून्यः सन्, श्वासैकसहायः परिशिष्यत इत्यर्थः । प्राण उक्तः श्वासोच्छ्वासकर्ता । तेजसा शरीरेण पाकप्रकाशोष्णकारिणोदानवृत्त्यात्मकेन । युक्तः संबद्ध उदानवृत्तिप्रधान इत्यर्थः । सहाऽऽत्मनाऽन्तःकरणाभिमानिना साकम् । यथासंकल्पितं कृतकर्मविद्याकशाघातसमुत्थितपूर्वप्रज्ञास्वविषयीकृतं देवतिर्यगादि यादृशसंकल्पविषयं यथासंकल्पितम् । लोकं कर्मविद्याफलं भाविशरीरमित्यर्थः । नयति प्रापयति ॥ १० ॥

प्रासङ्गिकं प्राणोपासनस्य फलमाह—यः प्राणोपासक एवमुक्तेन प्रकारेणाऽऽत्मनः प्राणो जायते मनःकृताभ्यां धर्माधर्माभ्यां शरीरं गृह्णात्यात्मानं च पञ्चध

* भाष्ये "ह वै" इति पाठ एव धृतः ।

विभज्य पायूपस्थयोरपानं स्वं चक्षुःश्रोत्रयोर्नाभौ समानं व्यानं नाडीसमूह उदानं च सुषुम्नायां स्थापयत्युदानेनोत्क्रामति बाह्यैः प्राणापानसमानव्यानोदानैः सूर्यपृथिव्याकाशवाय्वग्निभिरान्तरोपकारकैरध्यात्मव्यतिरिक्तमान्तरैश्च बाह्योपकारकैरध्यात्मं धारयति स एव चोदानवृत्तिप्रधानो लोकान्तरमपि नयतीति विद्वाञ्ज्ञानवान्। प्राणं पञ्चवृत्तिमात्मनश्छायारूपम्। वेद जानाति। न ह निश्चितं नेत्यस्य निषेधार्थस्य हीयत इत्यनेन संबन्धः। अस्य प्राणविदः। प्रजा पुत्रपौत्रादिसंततिरूपा। न हीयते न विनश्यति संततेरुच्छेदो न भवतीत्यर्थः। स्वयं च प्राणविज्ञानेन विशुद्धान्तःकरणसमुत्पन्नब्रह्मज्ञानोऽमृतो मरणकारणाविद्याशून्यो भवति स्पष्टं तत्तत्र प्राणविज्ञानेनोक्तोऽमृतो भवतीत्यस्मिन्नर्थे। एष वक्ष्यमाणः। श्लोको मन्त्रो भवतीति शेषः॥ ११ ॥

उत्पत्तिं प्राणस्याऽऽत्मनो जनिमायतिमायामं धर्माधर्मनिमित्तमागमनमित्यर्थः। अथवा छान्दसो दीर्घलोपः, आयातिमागमनम्। अथवाऽऽगमनस्योत्तरकालभावित्वादायत्या गमनमेव लक्ष्यते। स्थानं पायूपस्थचक्षुःश्रोत्रनाभिनाडीसमूहसुषुम्नाख्यमपानप्राणसमानव्यानोदानानां स्थानम्। विभुत्वं चैव सूर्यपृथिव्याकाशवाय्वग्निभिर्व्याप्तं (व्याप्तत्वं) चकार उ (तु)दानोत्क्रमणं च। एवकारो भिन्नक्रमः पञ्चधेत्यनेन संबध्यते, पञ्चधा बहिरध्यात्मं च सूर्यप्राणादिभेदैः पञ्चप्रकार एव न त्वधिको न्यूनश्च, अध्यात्मं चैवाऽऽत्मानं शरीरमधिकृत्य वर्तत इत्यध्यात्मं चकारादधिदैवमधिभूतं च। एवकारो भिन्नक्रमः प्राणस्येत्यनेन संबध्यते। प्राणस्य यद्यपि सूर्यादयश्चक्षुरादयश्च मुख्येन प्राणेन भेदरहितास्तत्रा(थाऽ)पि मुख्यस्य प्राणस्यैवैतद्विभूतिजातं न त्वन्यस्य सूर्यादेर्विज्ञाय विशेषेणोक्तेन प्रकारेण ज्ञात्वाऽमृतं मोक्षमश्नुते व्याप्नोति स्वेन प्रकाशेनाऽऽनन्दात्मरूपेण युक्तो भवतीत्यर्थः। विज्ञायामृतमश्नुते व्याख्यातम्। पादाभ्यासः प्राणविद्यापरिसमाप्त्यर्थः। इतिः प्रश्नसमाप्त्यर्थः॥ १२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरानन्दयतीन्द्रविरचितायामाथर्वणप्रश्नोपनिषद्दीपिकायां तृतीयः प्रश्नः॥ ३ ॥

अथ चतुर्थः प्रश्नः।

प्राणस्यानात्मत्वे निर्धारिते तद्व्यतिरिक्तात्मस्वरूपनिर्धारणार्थमुत्तरो ग्रन्थ आरभ्यते—अथ कौश(स)ल्याश्वलायनप्रश्नानन्तरं हैनं सौर्यायणी गार्ग्यः पप्रच्छ

भगवन्, व्याख्यातम् । एतस्मिन्प्रत्यक्षे । पुरुषे शिरःपार्ष्ण्यादिमति । कानि करणानि समूतानि स्वपन्ति स्वापं कुर्वन्ति । कानि व्याख्यातम् । अस्मिन्पुरुषे जाग्रति जागरणं कुर्वन्ति, कतरः करणभूतयोर्मध्ये क एष ज्ञानवानहं पश्यामीति-प्रत्ययेन प्रत्यक्षो देवो द्योतनात्मकः । स्वप्नान्वासनाविलासाद्रथरथयोगादीन्पश्य-त्यवलोकयति । कस्य भूतकरणाद्यन्यतमस्य तद्व्यतिरिक्तस्य वैतत्सौषुप्तं सुखमनु-कूलप्रत्ययवेदनीयम् । भवति स्पष्टम् । कस्मिन्कुत्र । नु वितर्के सर्वाधारस्यापि प्राणस्य जायमानाद्धि (मानत्वाद्धि) तर्कः । सर्वे सप्राणभूतरूपा देवा निखिलाः । संप्रतिष्ठिताः सम्यक्प्रतिष्ठां प्राप्ताः । भवन्ति स्पष्टमित्यनेन प्रकारेण । अयमर्थः— वागादीनां साकाशादीनां प्राणपरतन्त्रत्वात्प्राणस्य चाऽऽमरणमनुपरमात्स्वप्नजागरण-योश्चोपलम्भात्स्वप्नेऽपि जागरणवद्व्यवहारदर्शनात्करणेष्वनुपरतेषु स्वप्नस्यासंभवाच्च स्वप्ने चक्षुरादीनामुपरमस्य जागरणेऽनुपरमस्य च दर्शनेऽपि कानि स्वपन्ति कानि जाग्रतीति प्रश्न उपपन्नः । आत्मनोऽसङ्गोदासीनत्वात्प्राणस्य भूतस्याप्यचेतनत्वाच्च चक्षुरादीनां चोपरतत्वात्स्वप्नानुभवस्य चाध्यक्षत्वात्कतर एष देवः स्वप्नान्पश्यती-त्यभि(पि) प्रश्न उपपन्नः । सुषुप्तेऽपि सर्वकरणोपरमादात्मनश्च सुखस्वरूपत्वात्पूर्व-वत्कस्यैतत्सुखं भवतीत्युपपन्नः प्रश्नः । प्राणविलक्षणस्याद्याप्यनधिगतत्वात्कस्मिन्नित्या-द्यपि पृष्टमुपपन्नमेव । वागादीनां सप्राणभूतानामनात्मत्वकथनानन्तरमुक्ता एवैते प्रश्नाः, तथा च तथाऽक्षराद्विविधाः सौम्य भावा इति मन्त्रेणोक्ताक्षरस्य प्राणविलक्ष-णस्य भावानां च सप्राणानां व्याख्यानमप्युत्तरेणापि ग्रन्थेन क्रियत इति ॥ १ ॥

तस्मै गार्ग्याय । स होवाच व्याख्यातम् । मनःप्राणव्यतिरिक्तानि सर्वाणि करणानि स्वपन्तीत्यभिप्रायेण दृष्टान्तपुरःसरमुत्तरमाह—यथा दृष्टान्ते । गार्ग्य हे गार्ग्य । मरीचयः किरणाः । अर्कस्याऽऽदित्यस्यास्तं गच्छतः सायंकाले नयनप-थागोचरं दिशं व्रजतः । सर्वा निखिला एतस्मिन्प्रत्यक्षे तेजोमण्डले ज्योतिर्बिम्ब एकी भवन्ति, एकतां गच्छन्ति तेजोमण्डलादर्शने न दृश्यन्त इत्यर्थः । ताः पुनरादित्यमण्डल एकतां गता एव मरीचयः । पुरुदयतः सवितुर्भूयो नयनपथमा-गच्छतो द्वितीये दिवसे । प्रचरन्ति प्रकर्षेण विभागरूपेण गच्छन्ति सर्वासु दिक्षु, एवमनेन प्रकारेण ह प्रसिद्धं वै स्मर्यमाणं तद्वागादिकं मरीचिस्थानीयं सर्वं निखिलं पर उत्कृष्टे वागादिवृत्त्युत्पत्तिनिरोधनिमित्ते । देवे सर्वव्यवहारकारणे । मनस्यन्तः-करणेऽर्कस्थानीये स्वप्नावसर एकी भवति स्पष्टम् । तेनैकीभवनेन हेतुना तर्हि तदा स्वप्नावसर एष प्रत्यक्षः पुरुषः स्थूलो देहो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नाऽऽदत्ते नाऽऽनन्दयते न विसृजते नेयायते ।

श्रोत्रचक्षुर्घ्राणरसनत्वग्वाग्वस्तोपस्थपायुपादानां कर्मनिषेधकानि दश वाक्यानि स्पष्टानि । नेयायत इत्यत्र न गच्छतीति व्याख्येयम् । स्वपिति शयनं करोति, इत्यनेन प्रकारेणाऽऽचक्षते कथयन्ति विद्वांसः ॥ २ ॥

कानि स्वपन्तीत्यस्य बाह्यज्ञानकर्मेन्द्रियाणीत्युत्तरं जातं कान्यस्मिञ्जाग्रतीत्यस्योत्तरमाह—**प्राणाग्नय एव** प्राणाः प्राणवृत्तिभेदाः पञ्च त एवाग्नयः । यद्यपि जागरणं श्रोत्रादीनां जागरणे जागरणस्वप्नयोश्च मनसस्तथाऽपि सुषुप्ते नैकस्यापि, प्राणस्य पुनरवस्थात्रयेऽपि जागरणमेव तदभिप्रायस्त्वयमेवकारः। **एतस्मिन्प्रत्यक्षे पुरे नवद्वारे** शरीरे **जाग्रति** जागरणं कुर्वन्ति । प्राणानामग्नित्वमुपपादयति प्रसङ्गेनोपासनार्थम् । **गार्हपत्यो** गार्हपत्याभिधेयोऽग्निर्निरन्तरं रक्षणीयोऽग्निहोत्रिभिर्हं प्रसिद्धो **वै** स्मर्यमाण **एष** साक्षिप्रत्यक्षोऽपानो मलमूत्रापनयनकारी प्राणवृत्तिभेदः। **व्यानो दक्षिणसुषिरस्थः** प्राणवृत्तिभेदोऽन्वाहार्यपचनो दक्षिणाग्निः । इदानीमपानस्य गार्हपत्यत्वे प्राणस्य चाऽऽहवनीयत्व उक्ते वक्ष्यमाणे च साधारणं हेतुमाह—**यद्यस्माद्गार्हपत्यादुक्तादग्नेः प्रणीयते** प्रकर्षेण नीयते स्थानान्तरे पृथक्क्रियत इत्यर्थः । **प्रणयनादाहवनीयः प्राण** आधारस्थादपानाद्गार्हपत्यस्थानीयात्प्रकर्षेणाऽऽस्यकुण्डमदनीयाहुतिप्रक्षेपार्थमाहवनीयो नीयत इति प्रणयनेन हेतुनाऽऽहवनीयोऽग्निः प्राण इति ॥ ३ ॥

अपानव्यानप्राणेषु गार्हपत्यदक्षिणाग्न्याहवनीयाख्याग्नित्रय इ(इ)ष्टिमुक्त्वेदानीं समानश्वासोच्छ्वासमनउदानानामपूर्वाहुतियजमानेष्टफलत्वदृष्टिमाह—**यद्यस्मादुच्छ्वासनिश्वासौ** प्राणस्य **शरीराद्बहिर्गमनं** पुनः शरीर आगमनं **चैतावुक्तावुच्छ्वासनिश्वासौ** द्वित्वसंख्यासामान्यादाहुती काले काले पयःप्रभृतिद्रव्यप्रक्षेपेणाऽऽहवनीये संपन्ने द्वे आहुती ते **समं नयति** वातपित्तश्लेष्मणां त्वगादीनां च धातूनामशितपतितयोश्च समं समत्वं क्षोभराहित्यं यथा भवति तथा नयति प्रापयति शरीराद्बहिर्देशं शरीरं वाऽऽहुतिजन्यापूर्ववदिति यस्मात्तस्मादपूर्वं **स समानः** समानाख्यः प्राणवृत्तिभेदः । **मनो ह वाव** प्रसिद्धमन्तःकरणमेव सर्वव्यापारनिमित्तत्वसामान्येन **यजमानो** यागस्य कर्ता । **इष्टफलमेव** यागफलमेवोर्ध्वत्वसामान्यादुदानः सुषुम्नाचारी प्राणवृत्तिभेदः । **स** उक्त **उदान एनं** संघाताभिमानिनमात्मानं **यजमानं** मनउपाधिकमहरहर्नित्यं नित्यं **सुषुप्तिकाले ब्रह्म** सत्यज्ञानादिलक्षणमानन्दैकरसस्वभावं ब्रह्म **गमयति** प्रापयति । गार्हपत्योऽपान इत्याद्युक्तेन प्रकारेणोपासनं कुर्वतो ब्रह्मज्ञानोत्पादद्वारा मुक्तिरेव **फलं** भवतीत्येतद्बहिरेवावगन्तव्यम् ॥ ४ ॥

कतर एष देवः स्वप्नान्पश्यतीत्यस्योत्तरमाह—अत्रास्यां वागाद्युपरमरूपायां स्वप्नाव-

स्थायामेष वागाद्युत्पत्तिविनाशनिमित्तभूतः साक्षिप्रत्यक्षो देवः सर्वसंसारव्यवहारकारणमनआख्यः। स्वप्ने स्वप्नस्थाने महिमानं स्वात्मनो गिरिनदीसमुद्रादिरूपेण महत्त्वमनुभवति स्वयमेव कर्तृत्वं प्राप्य स्वप्नबलादवगच्छति । महिमानमनुभवतीत्युक्तं तदेतदुपपादयति—यत्प्रसिद्धं करिनरतुरगादि दृष्टं दृष्टं नयनपथमागतं पदाभ्यासो वासनाप्राबल्यमाह । अनु पश्चात्पूर्वं जागरणे दृष्टेत्यर्थः । पश्यत्यवलोकयति । श्रुतं जागरणावस्थायां श्रवणपथमागतं [श्रु]तमेव × श्रुतमेव न त्वन्यमर्थं विषयजातमनुशृणोति स्पष्टम् । देशदिगन्तरैश्च देशान्तरैर्गृहादिभिर्दिगन्तरैरुत्तराद्याशादिभिः, चकारादन्यैरपि कालादिभिर्निमित्तभूतैः प्रत्यनुभूतं प्रति प्रकर्षेण न केवलमित्यर्थः । अ[नुभूतम] धिगतं पुनः पुनर्भूयो भूयः स्वप्ने दिवसे दिवसे प्रत्यनुभवति अनेकवारमनुभवति । यद्येवं तर्हि स्वप्नस्मृतिः स्यादित्यत आह—दृष्टं चादृष्टं च दृष्टं नयनपथमागतमदृष्टं नयनसंप्रयोगमन्तरेण स्वप्नादिवदूहदृष्टमत्यन्तादृष्टे वासनानुपपत्तेः । चकारौ प्रत्यनुभवतीति क्रियापदस्य संबन्धार्थौ श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च श्रुतं श्रोत्रेन्द्रियसंबद्धं तद्विपरीतमश्रुतं प्रमाणव्यवधानेनान्तःकरणसंबद्धमनुभूतं तद्विपरीतमननुभूतम् । चकारौ पर्यायद्वयेऽपि पूर्ववद्वचाख्येयौ । सच्चासच्च दृष्टं श्रुतमनुभूतं सत्तद्विपरीतमसत् । चकारौ पूर्ववत्क्रियापदानुषङ्गार्थौ । अथवाऽस्मिञ्जन्मनि दृष्टं श्रुतमनुभूतं जन्मान्तरविषये सतीष्वपि वासनानु स्मृतेरभावादूदृष्टं श्रुतमनुभूतमप्यदृष्टमश्रुतमननुभूतम् । किं बहुना सर्वं निखिलं पश्यति स्पष्टं, स्वयं च सर्वो निखिलदेवतिर्यगादिरूपः सन्पश्यति स्पष्टम् ॥ ९ ॥

इदानीं कस्यैतत्सुखं भवतीत्यस्योत्तरमात्मन एव भवतीत्यभिप्रायेणाऽऽह—स मनआख्यो देवो यदा यस्मिन्काले तेजसा नाडीगतेन पित्ताख्येन ब्रह्मणा वाऽभिभूततिरस्कृतवासनो भवति स्पष्टम् । अत्रास्यां सर्ववासनोपरमरूपायां सुषुप्तावस्थायामेष देवः स्वप्नान्न पश्यति स्पष्टम् । अथ तदा यत्प्रसिद्धं ब्राह्मं स्वरूपं मनउपाधिकमात्मनस्तदेतस्मिञ्शरीर एतत्, स्पष्टम् । सुखं सुखस्वरूपं पूर्वमपि तद्रूपः सन्वि (पं सद्वि) शेषज्ञानाभावाद्भवति स्पष्टम् ॥ १ ॥

कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्तीत्यस्योत्तरमाह दृष्टान्तेन—स आत्मनि सर्वसंप्रतिष्ठात्वे प्रसिद्धो दृष्टान्तः । यथा दृष्टान्ते, सोम्य प्रियदर्शन गार्ग्य वयांसि पक्षिणो वासोवृक्षं सायंवासार्थं वृक्षं वासवृक्षमित्यर्थः । नित्यं नित्यं सर्वतो गत्वा पुनः सायंकाले संप्रतिष्ठन्ते सम्यक्तत्प्राप्तिफलत्वेन गच्छन्ति । एवमनेन प्रकारेण ह वै प्रसिद्धं स्मर्यमाणं तदुक्तं वागादिकं सप्राणभूतं सर्वं निखिलं परेऽविद्यातत्का-

× मूले क्वचित् " तमेव " इत्यपि पाठो वर्तते ।

र्यतत्संस्कारेभ्यो व्यतिरिक्त आत्मनि स्वयंप्रकाशमान आनन्दात्मनि संप्रतिष्ठते सम्यगवतिष्ठते ॥ ७ ॥

सर्वशब्दार्थमाह—पृथिवी च पृथिवीमात्रा चाऽऽपश्चाऽऽपोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाऽऽकाशश्चाऽऽकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहंकारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च । आपोमात्राऽऽमात्रा । रसो रसनम् । तेजो ज्ञानशक्तिसामान्यमन्तःकरणचतुष्टयानुगतम् । विद्योतयितव्यमन्तःकरणचतुष्टयसामान्यस्यैव सामान्यं विषयभूतम् । प्राणः क्रियाशक्तिः सूत्ररूप आध्यात्मिकबाह्यभेदभिन्नः । विधारयितव्यं सूत्रात्मन्योतं च प्रोतं च प्राणव्यतिरिक्तं निखिलं विश्वम् । द्वाचत्वारिंशच्चकारास्तावद्भिः पदैः पर आत्मनि संप्रतिष्ठन्त इति वाक्यानुषङ्गार्थाः । वाक्यानुषङ्गाच्च यथावचनं करणीयाः । पृथिव्यादिपञ्चमहाभूतस्थूलसूक्ष्मज्ञानकर्मेन्द्रियतद्विषयान्तःकरणचतुष्टयतद्विषयाभिधायकानि पदानि स्पष्टार्थानि ॥ ८ ॥

इदानीं सर्वाधारस्य परस्याऽऽत्मनो जीवादुपाधिकृतभेदमन्तरेण भेदं वारयति—एष हि एष एव सर्वाधारः पर एव न त्वन्यः कश्चन वस्तुतश्चक्षुर्धर्मानात्मन्यध्यस्यन्द्रष्टा चाक्षुषज्ञानस्य कर्ता । एवं त्वक्श्रोत्रघ्राणरसनाहंमतिबुद्धिक्रियाशक्तिधर्मानात्मन्यध्यस्यत्यन्तःकरणोपाधिकः सन्वस्तुतः पूर्ण एवोक्तेन्द्रियज्ञानानां क्रियायाश्च कर्ता भवतीत्याह—स्पष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता स्पष्टम् । मन्तृत्वादिपदत्रय उपलक्षणादिन्यायेन व्याख्येयाः (१) । विज्ञानात्मान्तःकरणोपाधिकः पुरुषः परिपूर्णः परमात्मैव सत्त्वनाद्यविद्यावशादन्तःकरणविशिष्टः पुरिशयो मनुष्यत्वाद्यभिमानीत्यर्थः । सोऽपि भेदविवक्षायां परेऽक्षर आत्मनि संप्रतिष्ठत* इति शेषः ॥ ९ ॥

ननु यद्येष विज्ञानात्मा पुरुषो द्रष्टृत्वादिगुणकस्तर्हि द्रष्टा श्रोतेत्यादिज्ञानात्पुरुषार्थः स्यादित्याशङ्क्य नेत्याह—स प्रसिद्धोऽधिकारी यो यः कश्चनाधीतवेदान्तवाक्यो ह प्रसिद्धं वै स्मर्यमाणं तत्सर्वाधारभूतं विज्ञानात्मस्वरूपं द्रष्टृत्वादिगुणकं

---

* "इति शेषः" इति पदत्रयस्थाने स्पष्टमिति पदमपेक्षितं किंचैतदग्रे "परमेवाक्षरं प्रतिपद्यते" इति पदचतुष्टयं वृद्धितम् ।

शरीरे वर्तमानमच्छायं छायाऽविद्या सप्राणा [तया वर्जितमच्छायमशरीरं शरीरमा-
त्रशून्यमलोहितं लौहित्यं तु रागस्तद्वाचिना लोहितशब्देन तत्कारणमन्तःकरणं
लक्ष्यते तेनान्तःकरणशून्यमलोहितमत एव सर्वोपाधिरहितत्वाच्छुभ्रं सर्वोपाधिरहितं
स्वयंप्रकाशमानानन्दात्मस्वरूपमक्षरं विनाशरहितं व्याप्तिमद्वा वेदयते वेत्ति योऽच्छा-
यादिगुणकं वेति स वेत्तीत्यभिप्रायः । इदानीमच्छायादिविज्ञानिनः पुरुषार्थमाह—
यस्तु यः पुनरच्छायादिविज्ञानी सोम्य हे प्रियदर्शन गार्ग्य स उक्तोऽच्छायादिरू-
पज्ञानी सर्वज्ञः सर्वमस्मीति जानातीति सर्वज्ञः सर्वो भवति वर्तमाने शरीरे सर्वस्य
वर्तमानोऽपि वस्तुतः सर्वरूपो भवति । तत्तस्मिन्नर्थे सर्वाधारात्माच्छायादिरूपविज्ञा-
नात्पुरुषार्थप्राप्तावेष श्लोकः [मन्त्रः] ॥ १० ॥

विज्ञानात्मा व्याख्यातम् । यद्यप्येष एव विज्ञानात्मा तथाऽपि विज्ञानस्यान्तःकर-
णस्य वैशिष्ट्यं पृथगङ्गीकृत्य तस्यापि तस्मिन्प्रतिष्ठोच्यत इत्यविरोधः । परमात्मैवा-
न्तःकरणविशिष्टः सह देवैश्च सर्वैर्निखिलैः करणैर्वागादिभिर्देवशब्दाभिधेयैरपि साकं
प्राणाः प्राणवृत्तिभेदाः पञ्च भूतानि पृथिव्यादीनि पञ्च महाभूतानि स्थूलानि सूक्ष्माणि
स्थावरजङ्गमानि च संप्रतिष्ठन्ति संप्रतिष्ठन्ते । यत्र यस्मिन्पर आत्मनि विज्ञानात्मा।
भिन्नेऽच्छायादिरूपे तत्सर्वाधारभूतमक्षरम् । वेदयते यस्तु सोम्य स सर्वज्ञो
व्याख्यातम् । सर्वमेव निखिलमेवाऽऽत्मत्वेनाऽऽविवेश समन्तात्प्रवेशं कृतवान्करो-
तीत्यर्थः । [इति मन्त्रसमाप्त्यर्थः ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरानन्दयतीन्द्रविरचितायां
माथर्वणप्रश्नोपनिषदीपिकायां चतुर्थः प्रश्नः ॥ ४ ॥

अथ पञ्चमः प्रश्नः ।

अक्षरविज्ञानात्परपुरुषार्थप्राप्तिरुक्ता । तत्प्रसङ्गेनोंकारस्याप्यक्षररूपत्वादोमित्येतदक्ष-
रमिदं सर्वमित्यादिना ब्रह्मसमानत्वेनोक्तत्वाच्च तद्विज्ञानात्परः पुरुषार्थः स्यान्न वेति
संदेहात्प्रश्नोत्थाने तद्विज्ञानादपि परः पुरुषार्थः प्रकारान्तरेण भवतीत्येतदर्थमयं प्रश्न
आरभ्यते—अथ गार्ग्यप्रश्नानन्तरं हैनं शैब्यः सत्यकामः पप्रच्छ व्याख्यातम् ।
स ओंकारब्रह्मणोऽक्षरशब्दाभिधेयत्वाभिज्ञो यो यः कश्चन त्रैवर्णिको ह वै प्रसिद्धः
स्मर्यमाणोऽधिकारिगुणैः, [तदद्भुतमिव] भगवन्हे भगवन्मनुष्येषु मनुजेषु मध्ये
प्रायणान्तं मरणपर्यन्तमोंकारं प्रणवमभिध्यायीताभिध्यायेत्सर्वतो ध्यानं कुर्यात्क-
तमेषु तेषु परापरविद्याफलभूतेषु कं वावैव परमपरमुभयं चे(वे)त्यर्थः । स ओंका-
राभिध्याता तेनोंकारध्यानेन लोकं विद्याफलं जयति प्राप्नोतीत्यनेन प्रकारेण ।
तस्मै शैब्याय स होवाच व्याख्यातम् ॥ १ ॥

एतद्वा एतदेव सत्यकाम हे सत्यकाम **परं चापरं च** [ब्रह्म] परं निरतिशयमपरमृग्वेदादिरूपं चकारौ यदस्ति यन्नास्ति च तदप्येतदेवेत्याहतुः । ब्रह्मशब्दवाच्यमेतच्छब्दार्थमाह—**यत्प्रसिद्धः** सर्ववेदेषु, **ओंकारः** प्रणवस्तस्मात्परमपरं च ब्रह्मोंकारस्ततो **विद्वानोंकारव्याप्तिज्ञानवानेतेनैव** सर्ववेदे प्रसिद्धेनोक्तेनोंकारेणैव न त्वन्येनाऽऽयतनेनाऽऽश्रयेणैकतरं स्वाभिप्रेतं परमपरं वा ब्रह्म परापरयोर्ब्रह्मणोर्मध्येऽन्वेति । शास्त्रोपदिष्टेन मार्गेणोपास्य पश्चाद्गच्छति ॥ २ ॥

इदानीं मात्राभेदज्ञानाद्विशेषफलान्याह—**सोऽभिध्याता यदि** पक्षान्तर **एकमात्रमेकमात्राकालमकारमात्रं वाऽभिध्यायीत** व्याख्यातं **स** एकमात्राभिध्याता **तेनैवैकमात्राध्यानेनैव न त्वन्येन संवेदित** एकमात्राव्याप्तिं सम्यग्बोधितस्तूर्णमेव शीघ्रमेव न तु विलम्बेन **जगत्यां** स्थावरजङ्गमव्याप्तिमत्यां भूमौ तादात्म्येन तदधिष्ठातृत्वेन **वाऽभिसंपद्यते** सर्वतः संपन्नो भवति **तं पृथिवीसंपन्नमृचः** पादबद्धा मन्त्रा ऋग्वेदाख्या **मनुष्यलोकं** मनुजशरीरफलं सर्वगुणसंपन्नं सार्वभौमानन्दमित्यर्थः । **उपनयन्ते** सत्कृत्य समीपतः प्रापयन्ति । स ऋग्भिर्मनुष्यलोकं प्रापितस्तत्र तस्मिन्मनुष्यलोके **तपसा** स्वधर्मवर्तनादिना **ब्रह्मचर्येण** सर्वात्मना मैथुनवर्जनेन **श्रद्धया** वेदोक्तार्थे आस्तिक्यबुद्ध्या **संपन्नः** संप्राप्तो **महिमानं** महत्त्वं स्वात्माभिन्नं मानुषमानन्दमित्यर्थः । **अनुभवति** साक्षात्करोति । एतदुक्तं भवति—ऋग्भिर्मनुष्यलोकं प्रापितोऽपि तपआदिवर्जितो न तं लोकमनुभवति राजमन्त्रिभिः स्निग्धो राजश्रियं प्रापितः पान्थ इव पुण्यहीनो न राजश्रियमनुभवतीति ॥ ३ ॥

अथैकमात्राद्व्यतिरिक्तेन यदि केनचिद्दैवयोगेन **द्विमात्रेण** द्विमात्रकालेनाकारोकाराभ्यां वा **मनसि संपद्यतेऽन्तःकरणे** संपन्नो भवति, अभिध्यायेदित्यर्थः । स मनसि संपन्नोऽन्तरिक्षमन्तरिक्षाधारं **यजुर्भिरविवक्षितच्छन्दस्कैर्मन्त्रैर्यजुर्वेदशब्दवाच्यैरुन्नीयत** ऊर्ध्वं प्राप्यते **सोमलोकं** सोमस्य प्रियदर्शनस्य लोकं प्रियदर्शनं मनुष्यानन्दादभ्यधिकानन्दं पित्रादिशरीरमित्यर्थः । स यजुर्भिः सोमलोकं प्रापितो ब्रह्मज्ञानहीनः **सोमलोके** व्याख्याते **शरीरे विभूतिं** परमैश्वर्यमनुभूय साक्षात्कृत्य दुर्मन्त्रीव महाराजप्रसादे **पुनरावर्तते** पूर्वमपि तस्मात्प्रच्युतस्तमारूढो भूयः खरशूकरादियोनिं ब्राह्मणादियोनिं वा स्वकर्मानुसारेणाऽऽगच्छति ॥ ४ ॥

यः पुनर्यस्तु प्रसिद्धः पूर्वेभ्योऽन्योऽभिध्यातैतं बुद्धेर्द्रष्टारमानन्दात्मानं **त्रिमात्रेणा**काराकारमकाररूपेण । त्रिमात्ररूपमाह—ॐ अवतीत्योमित्यनेन प्रकारेण त्रिमात्रः । **एतेनैवोक्तेन** त्रिमात्रेणैव परमपुरुषाभिधानेनाभिन्नेनाऽऽलम्बनेनाक्षरेण वर्णात्मकेनाविनाशिना व्याप्तिमता वा परमविद्यातत्कार्यतत्संस्कारेभ्यो व्यतिरिक्तं **पुरुषं**

परिपूर्णमभिध्यायीत व्याख्यातम् । सोऽभिध्याता तेजसि तेजोमण्डले सूर्ये शोभनाया गतेः कर्तरि संपन्नः सम्यक्प्राप्तः । इदानीं सूर्यं प्राप्तस्य पापविनिर्मोक्षे दृष्टान्तमाह—यथा दृष्टान्ते, पादोदर उदरमेव पादा यस्य स पादोदरः सर्प इत्यर्थः । त्वचा जीर्णेन कञ्चुकेन विनिर्मुच्यते विशेषेण निःशेषेण मुक्तो भवति । एवमनेनैव प्रकारेण ह प्रसिद्धो वै स्मर्यमाणः स सूर्यं प्राप्तः पाप्मना पापविनाभूतेन पुण्येन पापेन च विनिर्मुक्तो विशेषेण निःशेषेणासंबद्धः स पापरहितः सामभिर्गीतिप्रधानैर्मन्त्रैः सामवेदाभिधानैरुन्नीयते सूर्यादूर्ध्वं प्राप्यते ब्रह्मलोकं कार्यस्य ब्रह्मणो निवासभूतं देशम् । स ब्रह्मलोकं प्राप्त एतस्माद्ब्रह्मलोकस्थानाद्धिरण्यगर्भाज्जीवघनाज्जीवानां कार्यकारणात्मनां घनोऽखिलो जीवघनः सर्वकार्यकारणादिकारणमित्यर्थः । तस्मात्परात्स्थावरजङ्गमेभ्य उत्कृष्टात्परमुत्कृष्टमुत्कृष्टाज्जीवघनात्पुरिशयं सर्वशरीरे शयानं पुरुषं परिपूर्णमीक्षते साक्षात्करोति । एवमुक्तं भवति, ब्रह्मलोक उत्पन्नब्रह्मसाक्षात्कारो विदेहकैवल्यं प्राप्नोतीति । तत्तस्मिन्नुक्तेऽर्थे एतौ वक्ष्यमाणौ श्लोकौ मन्त्रौ भवतः स्पष्टम् ॥ ९ ॥

तिस्रश्चिसंख्याका मात्रा मीयन्तेऽध्यात्ममधिभूतमधिदैवं च याभिस्ता अकारोकारमकाराख्या मृत्युमत्यो ब्रह्मदृष्टिमन्तरेण दृष्टा मरणवत्यः प्रयुक्ता एता एव ब्रह्मज्ञानमन्तरेण स्वातन्त्र्येण ध्यानाय प्रकर्षेणावगता अन्योन्यसक्ताः परस्परसंबद्धाः । अन्योन्यसक्तत्वमाह—अनविप्रयुक्ता विशेषेण प्रयुक्ता एकस्मिन्नर्थे ध्यानकाले संबद्धा विप्रयुक्ताः (न विप्रयुक्ता अविप्रयुक्ता नाविप्रयुक्ता अनविप्रयुक्ताः । विप्रयुक्ता एवेत्यर्थः) क्रियासु कर्मरूपासु । क्रिया आह—बाह्याभ्यन्तरमध्यमासु जाग्रत्स्वप्नसुषुप्तिपुरुषविषयासु । अथवा यागादिक्रिया बाह्याः प्राणायामाद्या आभ्यन्तरा मानसजपाद्या मध्यमास्तासु बाह्याभ्यन्तरमध्यमासु । सम्यक्प्रयुक्ता-स्वहं ब्रह्मास्म्येता अपि ब्रह्मणोऽभिन्ना इति सम्यगवगत्य प्रकर्षेण कृतासु न कम्पते न चलति ज्ञो ब्रह्मवित् ॥ १० ॥

ऋग्भिः पादबद्धैर्मन्त्रैरेतं मनुष्यलोकं यजुर्भिरविवक्षितच्छन्दस्कैर्मन्त्रैरन्तरिक्षमन्तरिक्षाधारं * सोमलोकं सामभिर्गीतिप्रधानैर्मन्त्रैर्यत्तत्कवयो वेदयन्ते यत्प्रसिद्धं कवयः क्रान्तदर्शिनो ब्रह्मज्ञानिनोऽवगच्छन्ति तत्स्थानं ब्रह्मलोकाख्यमन्वेतीति त्रिष्वपि संबध्यते । किं बहुना तं स्वयंप्रकाशमानन्दात्मानमोंकारेणैवाऽऽयतनेनान्वेति विद्वान्, स्पष्टम् । तच्छब्दार्थमाह—यत्प्रसिद्धं वेदान्तेषु तत्तत्त्वमसीत्यादिनोक्तं

---

* एतदग्रे 'सः' इति पदमधिकं क्वचिन्मूले तच्च भाष्यदीपिकयोर्न गृहीतम् ।

शान्तं रागादिदोषरहितमजरं जरा शरीरवैरूप्यकारणं तया रहितममृतं मरणादि-दोषरहितमभयं द्वितीयाभावाद्भयवर्जितं परं चोत्कृष्टम्। चकारात्पूर्वोक्तमृग्यजुःसाममाप्यमपरमपि [इति वाक्यसमाप्तौ।] ॥ ७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरानन्दयतीन्द्रविरचितायामाथर्वणप्रश्नोपनिषद्दीपिकायां पञ्चमः प्रश्नः ॥ ५ ॥

अथ षष्ठः प्रश्नः।

ओंकारेणावाप्यं परं ब्रह्मेत्युक्तं न तत्स्वरूपं निर्धारितं तन्निर्धारणार्थमयं प्रश्न आरभ्यते—अथ शैब्यप्रश्नानन्तरं हैनं सुकेशा च भारद्वाजः पप्रच्छ भगवन्, व्याख्यातम्। हिरण्यनाभो नामतः कौसल्यः कोसलायां भवो राजपुत्रः क्षत्रियः कस्यचिद्ब्राह्मणस्तनयो मां भारद्वाजमुपेत्य समीपमागत्य विधिवदेनं (तं) * वक्ष्यमाणं प्रश्नं प्रष्टव्यार्थमपृच्छतापृच्छत्पृष्टवान्। षोडशकलं षोडशसंख्याकाश्चन्द्रस्येव कला उपचयापचयहेतुभूता यस्य स षोडशकलस्तं भारद्वाज हे भारद्वाज पुरुषं परिपूर्णं वेत्थ जानीषे, तं हिरण्यनाभं मा पृच्छन्तमहं भारद्वाजः कुमारं राजबालमब्रुवमुक्तवान्। नाहामिमं वेद, इमं षोडशकलं त्वत्पृष्टं पुरुषमहं भारद्वाजो न जानामि। स्वाज्ञानेऽन्यथाऽनुपपत्तिमाह—यदि पक्षान्तरे, अहमिमं व्याख्यातम्। अवेदिषं ज्ञातवानस्मि कथं केन हेतुना। ते तुभ्यं राजकुमाराय शिष्याय नावक्ष्यं न कथयिष्यामि तस्मान्न जानाम्येवेत्यर्थः। इत्यनेन प्रकारेण। मैवं शङ्किष्ठा अयमनृतं वदतीत्येवमाह—समूलो वै + सह मूलेन शुभकर्मविद्यादिना वर्तमानः समूल एवैषोऽनृतवादी परिशुष्यति सर्वतः शोषं गच्छति, इह परत्र वा सुखलेशेन शून्यः स्थावरजङ्गमैर्भूतैर्वाक्कायमनोभिस्तिरस्कृतस्त्रिविधदुःखाग्निना दंदह्यमानसर्वदेहेन्द्रियोऽयं भ्रमतीत्यर्थः। कः, यः प्रसिद्धोऽनृतवागनृतमयथादृष्टार्थवचनमाभिवदति सर्वतो ब्रूते। यस्मादेवं तस्मात्ततो नार्हामि न योग्यो भवाम्यनृतमयथाभूतार्थं वक्तुं भाषितुम्। अयमर्थः—यो ह्यनृतवदनजं दोषं न जानाति स तु वदतु नामानृतमहं तु तदभिज्ञः कथमनृतं वदामीति। एवं मद्वाक्यं श्रुत्वा स राजपुत्रोऽयमपि या (मा) दृश इति मत्समीपागमनेन लज्जितस्तूष्णीं साध्वसाधु वेति मां प्रतिवचनमदत्त्वैव रथमारुह्य स्वयानारूढः स्वं नगरं प्रवव्राज प्रकर्षेण

* क्वचिन्मूले " एनम् " इति पाठो वर्तते। + क्वचिन्मूले " ह वै " इति पाठः।

शीघ्रं जगाम । अनयाऽऽख्यायिकयैतद्दर्शितं महर्द्धीनां राज्ञां तपःश्रद्धादियुक्तानां मुनीनां च ब्रह्मविद्या दुर्लभा किमुतान्येषामिति । तं षोडशकलं पुरुषं हिरण्यनाभेन मां प्रति पृष्टं त्वा त्वां प्रति पिप्पलादं पृच्छामि क्व कुत्र प्रदेशेऽसौ षोडशकलः पुरुषः परिपूर्ण इत्यनेन प्रकारेण ॥ १ ॥

तस्मै भारद्वाजाय पृच्छते । स होवाच व्याख्यातम् । इहैवास्मिन्नेव स्थाने न त्वन्यत्र । सामान्यत उक्तं विशेषत आह—अन्तःशरीरे शरीरस्य मध्ये हृदयपुण्डरीक इत्यर्थः । सोम्य हे प्रियदर्शन स हिरण्यनाभेन भवन्तं परिपृष्टः पुरुषः षोडशकलः पुरुषो यस्मिन्हृदयपुण्डरीकस्थे पुरुष एता वक्ष्यमाणाः षोडश षोडशसंख्याकाः कलाः कं ब्रह्म लीयते तिरस्क्रियते याभिस्ताः कलाः प्रभवन्ति प्रकर्षेण भवन्ति, यत उत्पद्य यस्मिन्वर्तन्ते लीयन्ते चेत्यर्थः । इत्यनेन प्रकारेण ॥ २ ॥

संक्षेपेणोक्त्वा विस्तरेणाऽऽह—स हृदयपुण्डरीकस्थः षोडशकलः पुरुष ईक्षांचक्रे चिन्तनं कृतवान् । तच्चिन्तितमर्थमाह—कस्मिन्नु* विचारे केन नाम तत्त्वेन क्रियावताऽहमसङ्गोदासीनोऽद्वितीयः क्रियाकारकफलशून्यः स्वयंप्रकाशमान आनन्दात्मोत्क्रान्त उत्क्रान्तेनोर्ध्वं गतेन यथाश्रुतं वा कस्मिन्नुत्क्रामति सत्युत्क्रान्तो भविष्या × म्यूर्ध्वं गतः स्याम् । कस्मिन्वा कस्मिंस्तत्त्वान्तरे वाशब्दः क्रियान्तरनिर्देशार्थः । प्रतिष्ठितेऽवस्थिते । प्रतिष्ठास्यामि, अवस्थास्य इत्यनेन प्रकारेण विचिन्त्य प्राणस्य क्रिययाऽऽत्मनि क्रियामवलोक्य च ॥ ३ ॥

सोऽन्यक्रियया ऽऽत्मनि क्रियाकामी षोडशकलः पुरुषः प्राणमाधिदैविकं सर्वप्राणिसूत्रभूतमसृजतोत्पादितवान् । तावता च संसारयात्राया निर्वाहमपश्यञ्श्रद्धाद्या अप्यन्याः पञ्चदश कलाः ससर्जेत्याह—प्राणादुक्ताद्धिरण्यगर्भाद्भूतसूक्ष्मात्सर्वकारणाद्ब्रह्मणः प्रथमजाच्छ्रद्धामास्तिक्यबुद्धिमसृजतेत्यनुवर्तते । इदानीं शेषाण्यपि गणयति—खं वाय्वग्न्योतिरापः पृथिवी, स्थूलानि पञ्च महाभूतानि । इन्द्रियं मनः, भौतिकं ज्ञानकर्मारूयं चक्षुरादिकं वागादिकं च दशकमिन्द्रियं मनोऽन्तःकरणमन्नं प्रसिद्धं व्रीह्यादिकमदनीयमन्नादुक्ताद्वीर्यं शरीरेन्द्रियसामर्थ्यं तपः शरीरशोषणादिरूपं मन्त्रा ऋग्यजुःसामाथर्वाङ्गिरसः कर्म ज्योतिष्टोमादिरूपं लोकाः कर्मफलभूताः सोमलोकाद्या लोकेषु चोक्तेषु चशब्दादन्येष्वपि नाम [च] देवदत्तो यज्ञदत्त इत्यादि नामधेयम् ॥ ४ ॥

---

* भाष्यकृता नुशब्दरहितः पाठ एव स्वीकृतः । × ' भविष्यामि ' इत्येतदस्य इतिशब्दोऽधिकः क्वचिन्मूले ।

इदानीं पुरुषस्यास्य निमित्तमात्रत्वं न तूपादानत्वमितीमां शङ्कां वारयितुं दृष्टान्तेन षोडशकलानां पुरुष उपसंहारमाह—स दृष्टान्तः, यथा दृष्टान्त इमाः प्रत्यक्षा नद्यो गङ्गाद्याः सरितः स्यन्दमानाश्चलन्त्यः समुद्रायणाः समुद्रे गमनं यासां ताः समुद्रायणाः समुद्रं सिन्धुराजं प्राप्य तादात्म्येन संबध्यास्तं गच्छन्ति अदर्शनं प्राप्नुवन्ति । अस्तगमनं स्वयमाह—भिद्येते विनश्येते ता (इयतस्ता) सां नदीनां नामरूपे गङ्गेत्यादिकं नाम शुभ्रमधुरनीलत्वादिकं रूपं नाम च रूपं च नामरूपे । नामरूपभेदानन्तरं समुद्रः शब्दानुकरणमिति, अनुकरणार्थः । एवमनेन प्रकारेण प्रोच्यते प्रकर्षेण कथ्यते । एवमेवाननेव प्रकारेणास्य षोडशकलस्य पुरुषस्य परिद्रष्टुः सर्वतः सर्वसाक्षिण इमाः प्राणाद्या नामान्ताः षोडश कला व्याख्यातम् । पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चाऽऽसां नामरूपे पुरुष इत्येवं प्रोच्यते । समुद्रस्थले पुरुषेति तासामिति स्थले चाऽऽसामिति पाठतो विशेषः । ततः समुद्रनदीवाक्यवत्पुरुषकलावाक्यं व्याख्येयम् । नदीनां सर्वैः प्राणिभिः प्रत्यक्षीकर्तुमशक्यत्वात्तासामिति निर्देशः । कलानां च प्रतिप्राणिप्रत्यक्षत्वादासामिति । चकारः कैमुतन्यायार्थः । नदीनामसमुद्रजानामपि समुद्रे लयो दृष्टः किमुत पुरुषजानां कलानां पुरुषे लय इति । न चाननैव निदर्शनेन पुरुषस्यानुपादानत्वं, लयमात्रत्वस्य निदर्शनत्वात् । विवक्षितांशपरित्यागेनान्यत्र निदर्शनाङ्गीकारे सर्वत्रातिप्रसङ्गात् । स कलोपादान एष बुद्धेर्द्रष्टाऽकलो वस्तुतः कलारहितोऽमृतोऽविद्यातत्कार्यतत्संस्कारमरणहेतुशून्यो भवति स्पष्टम् । तत्तस्मिन्षोडशकलाधारेऽकले पुरुष एष श्लोको [व्याख्यातम्] ॥ ५ ॥

अरा इव रथनाभौ व्याख्यातं, कला यस्मिन्प्रतिष्ठिताः स्पष्टम् । तं कलाधारं वेद्यं वेदनीयं साक्षात्करणीयं पुरुषं परिपूर्णं * वेदयथा हे शिष्या मद्वचनादवगच्छतान्ये यूयं महद्भ्यः स्वशिष्येभ्यो वेदयत ब्रह्मविद्यासंप्रदायं प्रवर्तयतेत्यर्थः । ब्रह्मविद्यासंप्रदायप्रवर्तनेऽस्माकं संसारो भविष्यतीति भीतिं मा कुरुत भवतामयं मया वरो दत्त इत्याह—मा वो मृत्युः परिव्यथा वो युष्मान्ब्रह्मविद्यासंप्रदायप्रवर्तकान्मृत्युर्विपरीतज्ञानरूपो मा परिव्यथा मा परिव्यथयतु । अथवा वेदयथ(था) जानीथ । तज्ज्ञाने लाभमाह—वो ब्रह्मज्ञानिनो मृत्युर्मा परिव्यथाः । इदानीं श्रुतिराह—इत्यनेन प्रकारेण ॥ ६ ॥

तान्भारद्वाजसत्यकामगार्ग्यश्वलायनवैदर्भिकात्यायनान्ह किलोवाचोक्तवानेतावदेवेत्यमेवाहं पिप्पलाद एतत्परं ब्रह्म व्याख्यातं वेद जानामि । एवशब्दव्या-

* भाष्ये ' वेद यथा ' इति पृथक्पदे ।

वर्त्यं स्वयमाह—नातः परमस्ति, अतोऽस्मादुक्ताद्ब्रह्मज्ञानात्परमधिकं मम वाऽन्यस्य वा नास्ति [इति श्लोकसमासौ] ॥ ७ ॥

एवं पिप्पलादेनोक्ते सति ते पिप्पलादशिष्या भारद्वाजादयस्तं स्वगुरुं पिप्पलादमर्चयन्तो मनोवाक्कायैर्यथोचितं पूजयन्त इदमुक्तवन्त इत्याह—त्वं पिप्पलाद (दो) हि निश्चितं नोऽस्माकं भारद्वाजादीनां पिता जनकः । पितृत्व उपपत्तिमाह—यः प्रसिद्धो गुरुरस्माकं भारद्वाजादीनामविद्याया आवरणविक्षेपशक्तेः सर्वानर्थमूलायाः परं पारमगाधजलायाः सिन्धोरिव परतीरमविद्यालेशशून्यमानन्दात्मानमित्यर्थः । तारयसि दर्शयसि । इत्यनेन प्रकारेण । नमो नमस्कारः परमर्षिभ्य उत्कृष्टेभ्योऽतीन्द्रियब्रह्मविद्यासंप्रदायकर्तृभ्यो ब्रह्मादिभ्यः । नमः परमर्षिभ्यो व्याख्यातम् । वाक्याभ्यास उपनिषत्परिसमाप्त्यर्थः ॥ ८ ॥

इति प्रश्नोपनिषदि षष्ठः प्रश्नः ॥ ६ ॥

इति श्रीमदानन्दात्मपूज्यपादशिष्यस्य श्रीशंकरानन्दभगवतः कृतौ प्रश्नोपनिषद्दीपिका समाप्ता ॥